This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



पं. द. १०

११६ सिध्दान्तमंजरीदीपिका

Accession No:- ~~310~~ M 832

Title:- सिद्धान्तमञ्जरी दीपिका

subject:- न्याय

Author:- शितिकंठ रामा दिक्षित

पत्र - ~~158~~ 158

①

KKSU LIBRARY
RAMTEK
441 106
M-832
Dist Nagpur

Checked 2012

तर्क०ग्र०

१ श्रीगणेशायनमः ।। ।।संध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते रोषं मानिनि मालधा
त्वदपरा मे नान्यास्ति वंद्या मम ।। किंतु त्वामहमानमामि मनसेत्याचातवेचाटुतीरित्थं हर्षितशैल सि २
राजतनया हृष्टः शिवः पातु वः ।।१।। सिद्धांतेगूढवर्त्मैकभावनापरिशीलिता ।।श्रीकंठनिर्मिता
सेयं कृतिरातनुतां मुदं ।।२।। सत्येकस्मिन्बाधके साधकसहस्रस्यापि किंचित्करत्वेन प्रतिबंध
काभावस्यावश्यापेक्षितत्वया प्रकृतग्रंथसमाप्ति [illegible] प्रतिबंधकदुरितरूपविघ्नविघाताय
कृतं भगवन्नत्यात्मकं मंगलं शिष्यशिक्षार्थमादौ निबध्नाति ।। ।।नमस्यति।। ।।मंगलस्यस
ग्र टि ४ माप्तिं विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धांतस्थितिः ।।तत्रान्यथासिद्धनियतपूर्ववृत्तित्वरूप
कारणत्वघटकानन्यथासिद्धत्वं रोग्रहे वाव्यापकत्वरूपनियमाग्रहे वा स्वस्वव्याप्येतरयाव
त्कारणसत्त्वे पटस्य सत्त्वमवश्यं पटस्य तदभावे वश्यं पटाभाव इति नियमघटितयोर्नियतान्वयव्यतिरेक
ण १ योः कारणत्वेमानिश्चयेपि अन्वयव्यतिरेकाभ्यां विशिष्य तद्रूपकारणत्वग्रहे तिरिक्तकारणत्वग्रहे वा १

①

तयोर्हेतुतया तत्सहकृतत्वप्रत्यक्षप्रमाणगम्यत्वस्यापि नात्र संभवः॥ मंगलसत्वेपि समाप्त्यसत्वात्॥ मं
गलाभावेपि समाप्तेश्चेत्यन्वयव्यतिरेकव्यभिचारात्तथापि समाप्तिफलकत्वे लाघवमिति लाघवज्ञा
हेत नसंकृतं शिष्टाचारविषयत्वाहे[illegible]तुमौ कंसफलत्वानुमानमेवात्र मानं॥ जन्मांतरीयमंगलसंदेहेन
व्यतिरेकव्यभिचारसंशयेपि साध्यसंशयस्यानुमितिप्रतिबंधकत्वात् समाप्तिकोत्वानुमितेः समा रण४
स्ति रूपकार्येण जन्मांतरीयमंगलानुमानान्नव्यतिरेकव्यभिचारः॥ मंगले सति समाप्त्यनुत्पन्नं तं मंगलो न५
नाश्यविघ्नसत्वादनंतरोत्पन्नविघ्नसत्वाद्वेति नान्वयव्यभिचारोपीति॥ अत एव तद्धं कयामध्ये मं पि६
गलमाचरंति॥ एवं चाशुविनाशिनः कालांतरभाविफलजनकत्वं व्यापारं विनानुपपन्नमिति विघ्नध्वंसद्वा
रा समाप्तिं प्रति मंगलं हेतुरिति संप्रदायः॥ न चास्तु मंगलं विनापि नास्तिकादिग्रंथसमाप्तेर्न तत्र तद्धेतु॥
न च चरमवर्णरूपायाश्चरमवर्णध्वंसरूपाया वा समाप्तेराकाशनिष्ठतयात्मनिष्ठस्य मंगलस्य तज्जोन्य
घ्न विध्वंसस्य वा व्यधिकरणतया कारणत्वासंभवेन स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबंधे
चर नैरमवर्णध्वंससरूपसमाप्तिं प्रत्याश्रयत्वासंबंधेनात्मनिष्ठप्रत्यासत्त्या मंगलस्य हेतुतायां[illegible]त्व वर
त्वतया जन्मांतरीयमंगलानुमानान्नव्यतिरेकव्यभिचार इति वाच्यं॥ जन्मांतरीयसमाप्तिमुद्दिस्य

शिष्टैस्तदनाचरणात्॥ यारिप्सितसमाप्तिरेवफलं कारीरीवत् न तु जन्मांतरीयसमाप्तिरपि पुत्रेष्टिरिव
त्वेतु पुत्रमात्रफलकत्वश्रवणादैहिकामुष्मिकसाधारणफलकत्वं तस्मादात्मनिष्ठप्रत्यासत्त्या कारण
त्वे जन्मांतरीयसमाप्तिमुद्दिश्यापि मंगलकरणापत्तेः॥ स्वप्रतियोगिचरमवर्णावछेदकतासंबंधेन
चरमवर्णध्वंसरूपसमाप्तिंप्रति स्वोत्पत्त्यवछेदकजातीयतासंबंधेन शरीरानिष्ठप्रत्यासत्त्यात
कारणताया अवश्यं वाच्यतया नास्तिकशरीरे वछेदकतया मंगलस्य तज्जन्यविघ्नध्वंसस्य वाभा
वेन व्यतिरेकव्यभिचारोन्न कारणत्वसंभवः॥ ननु विघ्नस्थलीयसमाप्तित्वमेवं तु ऽऽन्यताव
छेदकं तत्र च न व्यभिचारः॥ विघ्नस्थलीयत्वं च विघ्नवज्जातीयशरीरकर्तृकत्वं मंगलजन्य
वैशिष्ट्यं च५ विघ्नध्वंसविशिष्टत्वं वा स्वावछेदकावछिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वो ता५
भयसंबंधेन जन्मांतरीयमंगलजन्यविघ्नध्वंसस्य चैस्वावछेदकावछिन्नप्रतियोगिकत्वोभ
यसंबंधेन नास्तिकसमाप्तावभावेन तस्यां कार्यतावछेदकानाक्रांतत्वादिति चेन्न॥ प्रथमे
प्र२ समाप्त्यव्यवहितपूर्वं विघ्नासत्वेन तस्य विसेषणं चासंभवात्॥ उपलक्षणत्वे तु प्रमत्तानुष्ठित
समाप्तेरपि उत्पद्यमानविघ्नवज्जातीयशरीरकर्तृकतया व्यभिचारस्य दुर्वारत्वात्॥ अन्य

× ताकत्वस्वाव्यवहितोत्तरक्षणोत्पत्ति ४

न२ विशिष्य२

विघ्नस्य च विघ्नवज्जातीयशरीरनिष्ठवृत्तिजन्यत्वरूपस्य तत्कर्तृकत्वस्य दुर्वचत्वात्। द्वितीये तु समाप्त्यव्यवहितपूर्व
तुर क्षणोत्पत्तिकत्वे न विशेष्यवाचकस्य व्यवहितोत्तरस्य वक्तव्यत्वेनाननुगमात् कारणस्य कार्यतावच्छेदकत्वाननुप
मत्त्व। अन्यथा काशीमरणस्यापि स्वविशिष्टमुक्तिं प्रति हेतुत्वस्य सुवचत्वात् काशीमरणान्मुक्तिरिति श्रुतेः हे
तुत्वपरतयोपपत्तौ प्रयोजकपरत्वोपवर्णनस्यासंगत्यापत्तेः। न च तमेव विदित्वेति श्रुत्या तत्त्वज्ञानस्यैव मुक्तिसा
प्रति५ मान्यहेतुप्रतिपादनेन तस्य साक्षात्कारणत्वासंभवात् श्रुतेः प्रयोजकत्वपरत्वमेवेति वाच्यं। तावतापि तत्त्वज्ञानद्वा त्व५
राहेतुत्वस्यादृष्टत्वादिविघ्नध्वंसद्वारा समाप्तौ मंगलस्येव। न च स्वजन्यतत्त्वज्ञानविशिष्टमुक्तिं प्रति काशीमरणस्य हे
तुत्वेऽन्यथासिद्ध्यापाद्यन्यथासिद्ध्या न तन्मुक्तिहेतुरिति वाच्यं। स्वजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मंगलस्य हेतु
त्वेपि तस्यापादुर्वारत्वात्। तस्मादन्यथासिद्धतया न मंगलं समाप्तिहेतुः। एतेन काशीमरणविशिष्टमुक्तौ काशी
मरणस्य हेतुत्वेऽदृष्टापत्तिः। तत्त्वज्ञानमद्वारीकृत्य न तद्धेतुरिति सूचनायैव पंचम्याः प्रयोजकत्वपरत्वमिति
पि५ निरस्तं। तथापि तद्वत्समाप्तिहेतुना बोधकग्रन्थस्य श्रुत्यभावेनोक्तदिशा मंगलस्यान्यथासिद्धेर्दुर्वारत्वादिति।
न च निर्विघ्नं समाप्यतामिति कामनया तदाचारात् समाप्तेः स्वफलत्वमिति वाच्यं। हीनविशेषणान्याये अ४
न विघ्नध्वंसकामनाया आवश्यकत्वे तस्यैव तत्फलत्वात्। न हि यदुद्दिश्य क्रियते तत्तद्धेतुः। चैत्यवंदनादे य७
रपि स्वर्गफलकत्वापत्तेः। तज्ज्ञाने कीमू तज्ज्ञानस्य भ्रमतया न तथात्वे दर्शापि समाप्तिजनकत्वज्ञानस्याप्र
मत्वमारोप्य विचारसंभवात्। पाकस्यैव निकोद्देशसकामनावदुत्पत्त्यैष्टसाधनताज्ञानेन समाप्तिकामस्यो

न१

=अगृहीतविशेषणा बुद्धिर्विशिष्येनोदेतीति न्यायेन=४

⑤

तर्क०प्र० ३ कार्ये १ × जन्यत्वं क्लृप्तेत्याद्यन्यथासिद्धिसत्त्वाच्च ॥ तस्माद्विघ्नध्वंस एव मंगलस्य फलं ॥ समाप्तिस्तु ×३

३

नायाद्युपपत्तेरिति न किंचिदेतत् ॥ अत एव नास्तिकसमाप्तिरपि तयोर्गत्याद्यं चरमवर्णे वेजात्यस्येत्यो हृत्यविजाती
२२ यचरमवर्णध्वंसरूपसमाप्तिं प्रति मंगलं हेतुरिति निरस्तं ॥ पुरुषविशेषजन्यतावच्छेदकजातिव्याप्यानन्तजातिक
ल्पने प्रमाणाभावात् ॥ अन्यत्र क्लृप्तसामान्यसामग्र्यैव तदुपपद्यत इति ॥ आदाविति तत्पक्षेप्युक्ते नाक्रमम
न्तं उत्पत्यात् ॥ अहमस्मादपकृष्ट इति ज्ञानविशेष एव नमस्कारपदवाच्यस्तत्कार्यं कृत्यमत आह परमात्मान
मिति परमत्वं च नित्यज्ञानादिमत्त्वेन सर्वोत्कृष्टत्वं तथा च सर्वमानसं विरुद्धे तत्तया सर्वस्मिन्न तदपेक्ष्यायाऽपक एकज्ञानं
ष्टत्वेन ज्ञाते सर्वतः पतितं निरस्वस्मिन्नपकृष्टत्वज्ञानान्नमस्कारनिर्वाह इति भावः ॥ न चात्र परममहत्परि पदत्वेन ५
त्म१ माणवत्वं परमत्वं तादृशपरिमाणविशिष्टत्वस्य स्वापेक्षया प्रकृष्टेपि संत्वेन नमस्कार्यतावच्छेदकत्वा
भावात् ॥ यद्यपि नित्यस्य सुखरूपयोग्यत्वे फल्गु वश्यं तावद् इति नियमेन सुखसमवायिकारणतावच्छे
दकतया सिद्धस्यात्मत्वस्य ईश्वरेस्वीकारे सुखस्यापत्तेः तादृशनिमातात्वात्संयोगजन्यभावावच्छिन्न यर
रूपेणैव कारणता तयान्याय्यत्वादीश्वरे आत्मत्वजातिसत्वे प्रमाणाभावस्तथाप्यात्मपदशक्यताव
च्छेदकतयात्मत्वजातिसत्ता ॥ धारणासिद्धैति कार्यतावच्छेदकतया कारणतावच्छेदकतया च जातिसि
द्धिवत्सतिबाधके शक्यतावच्छेदकतयापि जातिसिद्धेरदुष्टत्वात् सतिबाधके निर्विशेषणात्मवा
पद२ वैशक्यतावच्छेदकत्वात् ॥ अत एवाकाशादिजातिसिद्धिः ॥ जन्यभाववत्त्वावच्छिन्नकारणतानिरूपितकार्यतावच्छे
दकतया विभुत्वमपि जातिः सिद्ध्येदिति चेन्न तत्वापत्तिः ॥ एवं विधानेन जातिकल्पने प्रमाणाभावादिति कार पा१
१ ध्वंसत्वादेरपि जातित्वापत्ता तद्विशेषणस्याभवतोप्यावश्यकत्वादित्याहुः ॥ तद्विंसं ॥ तथा सति विभुपदशक्यतावच्छेदकतया ×१ २

(6)

णतावच्छेदकतया कार्यतावच्छेदकतया च जातिसिद्धिरित्येवांगीकरणीयं। एवं च सुखसमवायिकारणता
वच्छेदकात्मत्वजातेरीश्वरसाधारण्ये मानाभाव एव। वस्तुतस्तु नहि शक्यतावच्छेदकतया जातिसिद्धि
वे१ रिति द्रव्यमौयेनोक्तानुपपत्तिरुद्धा[illegible] तत्रापि तु सुखसमवायिकारणतावच्छेदकत्वेन जीवात्मनि सिद्धस्या
त्मत्वस्य आत्मात्मव्यवहारबलेन तत्संबंधमात्रमीश्वरे कल्प्यते। नित्यस्येत्यादिनियमस्य च अप्रयोजक व४
त्वात्। अदृष्टरूपसहकार्यंतराभावादेव कार्याभावस्योपपन्नत्वात्।। अत्यंताजनकव्यावृत्तरूपेणैव का व५
रणत्वकल्पने च प्रमाणमन्यत्वप्रयुक्तं। प्रकृते च आत्मात्मव्यवहारस्यैव मानत्वेनात्यंताजनकसाधा
रणरूपेणापि कारणत्वकल्पने युक्तिविरहात्। न च सुखसमवायिकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्ते ता ७
त्वेपि आत्मत्वस्यैवास्त्वेतावच्छेदकत्वे बाधकाभावादिति वाच्यम्। कारणतावच्छेदकत्वानतिप्रसक्तस्यैव का
पा६ रणतावच्छेदकतया गगनादिषु कारणत्वसंबंधकल्पने गौरवात्।। अन्यथा सत्वेनापि हेतुतापत्तेः स
पा५ म्भवति व्याप्यधर्मे कारणतावच्छेदके व्यापकधर्मेणान्यथासिद्धौ अतिप्रसक्तेरबीजत्वात्। तस्यास्तु
द्रव्यत्वेपि तुल्यत्वात्। आत्मत्वे तथात्वेपि आत्मात्मव्यवहारबलात् ईश्वरेपि कारणत्वसंबंधस्य कल्
प्यनीयतया अतिप्रसक्तेरभावात्। इत्थं च आत्मपदशक्यतावच्छेदकत्वमपि तस्यैति सारं। नव्या वे१
स्तु नष्टे एव पूर्वदेशसंयोगे उत्तरदेशसंयोगस्तथोत्तरदेशसंयोग पूर्वदेशसंयोगः प्रतिबंधको
वाच्यः। तत्र न तावत्सर्वदेशत्वमुत्तरदेशभिन्नत्वं उत्तरदेशभिन्नजत्रुरूपपूर्वदेशसंयुक्तस्यैव पा

गो२

तर्कसं॰

४ जातिः२

प्रस

रूपांतरदेशासंयोगात् । किंचात्मत्वं तथा वाच्यं तथाचात्मसंयोगेनैव प्रतिबंधकत्वं स्यात् एवं च तत्प्रतिबंध
नावच्छेदककोटिप्रविष्टत्वेन आत्मत्वसिद्धिः । विनिगमनाविरहेण तस्या ईश्वरसाधारण्यमपि न चै
वमेकस्मिन्नीश्वरे एव सा जातिरास्तां न तु अनेकवृत्तिजीवात्मस्विति वाच्यं । एकव्यक्तिकत्वेन तस्य जातित्वा
संभवात् । नादृष्टाधर्मस्वीकारेपि च प्रत्येकं जीवमादाय विनिगमनाविरहस्य तादवस्थ्यात् न चात्मनिरू
पितत्वविशिष्टसंयोगत्वेन प्रतिबंधकत्वे आत्मनिरूपितत्वसंयोगत्वयोर्मिथो विशेष्यविशेषणभा
वे विनिगमनाविरहेण विजातीयसंयोगत्वेनैव तत्प्रतिबंधकत्वं स्यात् । तथा च तत्प्रतिबंधकतावच्छेद क६
त्य ककोटौ प्रविष्टत्वाभावात् जातिसिद्धिरिति वाच्यं । विजातीयसंयोगसंबंधेनात्मनोपि विनिग
मनाविरहेण प्रतिबंधकत्वस्य दुर्वारत्वात् ।। न चैवं तज्जातेरीश्वर इव गगनादिष्वपि सत्त्वप्रसंग इति
वाच्यं । गगनादीनामीश्वरातिरिक्तत्वेन तत्साधारण्येपि क्षतिविरहात् इति पुनर्निर्व्यूढं कुः पंथा
ति५ इतिजाड्यः ।। प्रणम्येत्युक्तान्तपदस्य नमस्क्रियत इत्यनेनान्वयः । नमस्कारसिद्धेर्नमःपदेनैव संभवेपि प्रणा
मस्य कर्तव्यापेक्षयापि वैष्णावेदीरीति शिष्याध्येवं कुर्युरिति शिष्यशिक्षार्थमेवोक्तं तेन तन्न निर्देशः ।
अत्र प्रशब्देन भक्तिश्रद्धातिशयो द्योत्यते सुकुमारमतिरित्यनेन न पुंक्लीनामुक्तसादृश्यग्रंथेनेन द७
निर्दोषत्वं मंजरीपदेन चरमोपयवाक्यकलैः कोमलत्वं सूचितं । प्रबोधि साम्यज्ञानेष्टसाधनताज्ञानस्य ४
हेतुत्वात् प्रयोजनज्ञानं विना कथमेतद्ग्रंथप्रवर्त्ततामित्यत आह । हारहत्यादि ।। मननोपायमात्मनस्तत

मा२

।निखिललोकविमोक्षमुख्योपायमामनंतीति प्रयोजना।।तथा च सकल ४०

४८ श्रवणाधिकारिब्राह्मणादीनामपि काशीमरणादेर्मुक्तिसंभवेन तथाविवक्षितेप्यनुपपत्तेर्जागरूकत्वात्।।४८

ज्ञाने [illegible] कामनाविषयभूतापवर्गजन
कतत्त्वज्ञानप्रयोजकतया तत्त्वेन प्रवृत्त्यनुपपत्तिरिति भावः।।मोक्षमुख्योपायत्वं च मुक्त्यसाधारणप्रयोजकीभू
ताभावप्रतियोगित्वं।।केचित्तु काशीमरणादितोपि श्रवणानधिकारिस्त्रीशूद्रादिलोकस्य मुक्तिसंभवे
न तत्त्वज्ञानाभावस्य मुक्त्यभावे प्रयोजकत्वाभावात् लोकपदं श्रवणाधिकारिलोकपरं तथा व्याख्येयं।
तथा च श्रवणाधिकारिलोकमुक्त्यभावे तत्त्वज्ञानाभावस्य प्रयोजकत्वे तत्व्याख्याने नोक्तदोष इति व्याचक्षते तत्तद
सत्। तस्मात्तत्त्वज्ञाने मोक्षमुख्योपायत्वं स्वाव्यवहितोत्तरक्षणोत्पत्तिकमुक्त्यसाधारणप्रयोजकीभूताभावप्रति यो६
योगित्वमेव वक्तव्यं तत्र नोक्तानुपपत्तिः एवं च लोकपदं यथाश्रुतमेव।।अत एव काशीमरणजन्यमुक्तेर्म
ननोपायकतत्त्वज्ञानाजन्यत्वाद्विमोक्षोपि तत्काशीमरणप्रयोज्यमोक्ष इत्यपर्यवसितं तत्पूर्णमूहनीयं।।अत्र च स्व तर६
समानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसत्वं मुक्तित्वं।।दुःखध्वंसस्य इदानीमपि सत्त्वेनास्मदा स७
दीनामपि मुक्त्यापत्तिवारणाय कालीनांतं।।मुक्तस्यात्मकदुःखध्वंसस्य इदानीं तन्न दुःखप्रागभावसमान =अन्यो दी। पाठांतरं
कालीनत्वाद्वामदेवादिमुक्तानामप्यमुक्तत्वप्रसंगात् स्वसमानाधिकरणेति प्रागभावविशेषणं।।न च
दुःखासमानकालीनत्वेनैव सामंजस्यात्प्रागभावेति व्यर्थमिति वाच्यं।।येषां संन्निवेशे ४ वैयर्थ्याभावा न२
त्।।तथापन्नतिप्रयोजनकत्वेन स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वमिति

=यथा चिंतामणिकारैः संनिवेशाः कृतास्तथासन्निवेशेन २=

(७)

क्ष.

५ स्यास्तांत छ्रूणा॥ ननुस्वसमानाधिकरणदुःखासमानकालीनत्वे दुःखध्वंसत्वस्य मुक्तित्वरूपत्वे तस्य तत्त्वज्ञानज प्रत्ये
न्यतावच्छेदकत्वानुपपत्तिः स्वपदस्य दुःखध्वंससामान्यपरत्वे पुरुषांतरीयदुःखध्वंससमानाधिकरणदुःखा
समानकालीनदुःखध्वंसस्येदानीमप्रसिद्ध्यापत्तेः स्वपदस्य तत्तद्दुःखध्वंसपरत्वे च सामान्यतः मुक्तित्वस्य त
ज्ञ्याभावान्मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुताया असंभवं दुक्तिकतापत्तेरिति चेन्न॥ स्वसमानाधि व
द्वि करण्य कालिक विशेषणतोभयसंबंधेन दुःखवान्यत्वेन दुःखध्वंसत्वस्यैव मुक्तित्वरूपत्वात्॥ मत्वंस्य चास्य च
चार्थे परिष्कृतया नोक्तविकल्पावसर इति॥ अत्र च ज्ञानादीनां क्षणिकत्ववारणाय विभुसमवेतयोग्यविशेषगुणनाश
व्व त्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नविशेषगुणत्वेन नाशकतया तत एव मुक्त्यात्मकदुःखध्वंससंभवात् तत्र तत्त्वज्ञा
नत्वेन हेतुतामानाभाव इति विभाव्यते तदा दुरितध्वंसवद्भिन्नदुरितध्वंसत्वमेव मुक्तित्वमवसेयं॥ न चा
न्न तद् येदुरितानुत्पाददुरितवद्दुरितध्वंसत्वस्यार्थसमाजग्रस्तत्वात् कथं तत्त्वज्ञानजन्यतावच्छेदकत्वमिति (कारणा
वाच्यं॥ प्रमाणाभावस्यैवार्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वे बीजतया प्रकृते च मुक्तौ तत्त्वज्ञान वानंतर
कार्यकारणभावबोधकवेदस्यैव बीजत्वादर्थसमाजग्रस्तत्वेपि कार्यतावच्छेदकत्वे बाधकाभावात्॥ न च दुः
सुखदुःखाभावयोरन्यतरस्यैव पुरुषार्थत्वेस्येन मुक्तेरपुरुषार्थत्वप्रसंग इति वाच्यं॥ बलवद्द्वेषविषयाभावत्वे
न पुरुषार्थत्वस्य दुःखाभाव इव दुःखजनकदुरितध्वंसेपि संभवात्॥ ननु तथापि काशीमरणान्मुक्तिरिति
वाक्येन काशीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपादनान्मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुत्वेऽव्य
५

भिचार एवेति चेन्न ॥ तमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः तत्त्वज्ञानस्य मुक्तिसामान्यपूर्ववर्त्त्वा
वदारिति काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमित्येवं तद्र्थासंयुक्तिकं चैतत् । अन्यथा तयोः परस्परजन्य
मुक्तौ व्यभिचारेणोत्तेयत्राव्यवहितोत्तरत्वनिवेशो गौरवात् ॥ न च काशीमरणस्य तत्त्वज्ञानं प्रति हेतुत्वेऽपि
श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशः विशिष्य ~~निवेश~~ इति वाच्यं गंगामरणादि
जन्यतत्त्वज्ञाने व्यभिचारवारणाय श्रवणादिजन्यत्वावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्य तद्वतोऽप्यावश्य
कत्वात् ॥ श्रवणादिजन्यतत्त्वज्ञाने व्यभिचारवारणाय परं काशीमरणजन्यतावच्छेदककोटावेवाव्यवहितोत्तर
व७ त्वनिवेश इति तन्निवेशस्य क[illegible]संभवात् । एवं मते तु काशीमरणजन्यमुक्तौ व्यभिचारवारणाय तत्त्वज्ञा
नजन्यतावच्छेदककोटावव्यभिचा हितोत्तरत्वनिवेशः । एवं तत्त्वज्ञानजन्यमुक्तौ व्यभिचारवारणाय काशीम
ण७। रणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेश इत्युभयत्राप्यव्यवहितोत्तरत्वनिवेशस्यावश्यकत्वेनातिगौरवा
दिति ननु तथापि उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गति
रित्यनेन कर्मणामपि मुक्तिहेतुत्वप्रतिपादनात् कथं तत्त्वज्ञानस्यैव मुक्तिहेतुत्वमिति चेन्न । तस्य तत्त्वज्ञानप्र
तिबन्धकाधर्मध्वंसद्वारा तत्त्वज्ञान एवोपक्षयान्न तु मुक्तिं प्रत्येव साक्षात्तस्य हेतुता ॥ नान्यः पंथा विद्यतेऽयना
येति श्रुतिविरोधात् । तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतिविरोधा
च्च । किं च यस्याश्रमविहितकर्मण एव हेतुत्वे गृहस्थस्यामुक्तिप्रसंगः । कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥

श्राद्धकृत्सत्यवादीचगृहस्थोपिहिमुच्यतेइतिगृहस्थस्यापिमुक्तिश्रवणात्॥गृहस्थाश्रमविहितकर्मणए
वैर तेर वहेतुत्वेचयैरमुक्तत्वप्रसंगात्॥नहिमुक्तौज्ञात्समस्तियेनोक्तयोरपिहेतुत्वमुपपादनीयमिति॥अनशनका
शीमरणस्यकर्मणोवाज्ञानाद्वामुक्त्युपायत्वंनिरूप्यायंमोक्षमुख्योपायमित्यत्रमुख्येत्युक्तस्यार्थोमोक्षसाधा
रणकारणभिन्नत्वमित्यर्थः॥मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणत्वंचासाधारणत्वंतेनप्रागभावादीनामपि
तद्व्यक्तित्वेनहेतुत्वेपिनक्षतिरितिदिक्॥ननुआत्माशरीरादिभ्योभिन्नइत्याकारकतत्त्वज्ञानमिदानीम
पिसंभवतितत्कथंनमुक्तिरित्यतआह॥मननेनोपायमिति॥मननमुपायोयस्येत्यर्थः॥तथाचश्रवणमन
ननिदिध्यासनप्रयोज्यतत्त्वज्ञानमेवमुक्तिहेतुःतच्चनेदानींसंभवतीतिभावः॥यद्यपिश्रवणोपायमित्येव
वक्तुमुचितंतथापिमकारानुप्रासवशान्मननेनोपायमित्युक्तं॥युक्तिभिरनुचिंतनंमननंसाधकबाधकप्रमा
णोपन्यासश्चयुक्तिः॥श्रोतव्यःश्रुतिवाक्येभ्योमंतव्यश्चोपपत्तिभिरितिस्मरणात्॥अतस्यार्थस्यनैरंतर्ये
णदीर्घकालमनुसंधानंनिदिध्यासनमितिबोध्यं॥तदितितत्त्वज्ञानमित्यर्थः॥नीलपटीसुंदरःसच्चमानी
त्यादौसर्वनाम्नानीलोपस्थापकत्वंकिंतुमुख्यविशेष्यस्यैवेत्यतःअत्रापिपूर्वोपस्थिततत्त्वज्ञानस्यै
नै२ वोपस्थापनान्नतुतन्मननमित्यर्थः॥मननस्यमुख्यविशेष्यतयापूर्वमनुपस्थितत्वेनतद्बोधासंभवादि
णा२ त्यवधेयं॥प्रमाधीनमिति॥प्रमाणज्ञानप्रयोज्यमित्यर्थः॥श्रवणादिप्रयोज्यमात्मनिइतरभिन्नत्वेन
ज्ञानमेवहितत्त्वज्ञानंतच्चनेतरपदार्थतत्त्वज्ञानंविनातच्चनप्रमाणज्ञानंविनाअतःप्रमेयव्यवस्थितेःप्रमाणज्ञा ६

=सर्वनाम्नांस्वाव्यवहितोपस्थितमुख्यविशेष्यमात्रोपस्थापकत्वनियमात् ४

स्य न
नाधीनत्वाद्धितप्रमाणनिरूपणमावश्यकमिति भावः। यद्यप्यत्रान्मननद्वाराप्रमाणाधीनत्वसूचनाय मननोपा
यमित्युक्तं। वस्तुतस्तु बद्धुस्य लघुव्यवहितोपस्थितविशेषणस्यापि तच्छब्देन परामर्शदर्शनादव्यवहि
तोपस्थितमुख्यविशेष्यमात्रोपस्थापकत्वनियमस्यौत्सर्गिकत्वं नास्य यस्य नियामकत्वाच्चेनाक्तातिप्रसंगः।
एवं चतत्र मननं चेत्यर्थः। साधकबाधकप्रमाणोपन्यासरूपयुक्तिभिरनुचिंतनरूपस्य तस्य प्रमाणज्ञानं विना
असंभवादिति भावः। प्रमाणं निरूपयति। लक्षणस्य स्वरूपप्रामाण्यादिप्रकारकवर्त्तमाननिरूपणविषयीभ
या:१ तं प्रमाणमित्यर्थः। तत्रेति। प्रमाणे निरूपणीये इत्यर्थः। प्रमाकरणमिति। अत्र प्रमाणपदवाच्यत्वं लक्ष्यता
वच्छेदकं प्रमाकरणत्वं लक्षणं नातः प्रमाणत्वस्य प्रमाकरणत्वरूपत्वेन लक्षणत्वलक्ष्यतावच्छेदकयोरभे
दापत्तिः। यथा चैतयोरभेदे नेष्टापत्तिस्तथाग्रे विवेचनीयमुपरिष्टात्। ननु प्रमाकरणमिति विग्रह्य प्रमायाः
करणमित्युक्तौ किं बीजमिति चेन्न लक्षणवाक्यादादृशार्थविवक्षितस्यैव लक्षणत्वेन प्रमानिरूपित
करणत्वस्य लाभाय तथोक्तेः। अन्यथा तत्पुरुषे पूर्वपदलक्षणया प्रमासंबंध्यभिन्नकरणत्वमित्यर्थ
लाभेऽपि तरत्सेदानुमाने हेतौ वैयर्थ्यस्य दुर्वारिताहुरत्वा [illegible] लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैव
ण४ लक्षत्वोपगमेन प्रमानिरूपितकरणत्वं एवं तात्पर्येण तस्यैव हेतुतोपपादनेतु अयासंगगौरवमिति। वस्तुत
स्तु प्रमाकरणत्वमित्यत्र भेदेनान्वयभ्रमनिराकरणाय प्रमायाः करणमित्युक्तिः। असाधारणधर्मो हि लक्षणं॥
यथा सास्नाशृंगवतो गौरिति। सास्नावत्त्वमात्रं सरटे शृंगवत्त्वमात्रं महिष्यादावतिव्याप्तमिति सास्नात्वं
गवत्वविशिष्टधर्मो लक्षणं॥ तदितरावृत्तित्वे सति सकलतद्वृत्तित्वं असाधारणत्वं॥ शृंगवत्वं गगनल्कतसप

ः तस्यैव प्रमानिरूपितकरणत्वमित्यस्यैव हेतुतो उपपादनेरत
मितो॥

(13)

तर्क.ग.
७

वत्वादेर्गोर्लक्षणत्ववारणाय सत्यंतं द्वित्तिसाकल्यादेः । यथायथं निवेशः । तदिदमुक्तं । लक्षणे तान्येव पदानि सार्थकानि यैः पदैरति
व्याप्त्यव्याप्त्यसंभवा दोषा निराक्रियंते । अलक्ष्ये लक्षणगमनमतिव्याप्तिः । यथा शृंगवती गौरिति । लक्ष्यैकदेशे लक्षणस्या
वर्त्तनमव्याप्तिः । यथा कपिला गौरिति । लक्ष्यमात्रावर्त्तनमसंभवः । यथा एकशफा गौरिति । इत्थं चाव्यवहितक्रियाकरणकु
ठारादावतिव्याप्तिवारणाय प्रमापदोपादानं । दोषदुष्टचक्षुरादिके भ्रमात्मकज्ञानकरणत्वादतिव्याप्तेः प्रपदं । प्रमा प्रमाणमित्युक्ते
मा० ३५ [illegible]दिष्वव्याप्तिरतः प्रमाकरणमिति विशिष्टमुपात्तं । ननु दोषदुष्टचक्षुरादिकेणापि कदाचित्प्रमाजननात्तत्र प्रमाणव्यवहा
रापत्तिरेव । न च दुष्टतादशायां तादृग्व्यवहारापत्तिरिति वाच्यं । नहीदं कालत्वघटितं लक्षणं येन तस्मिन्काले आपत्तिः स्यात् ।
७ प्रमाणं ७ किंतु तद्दिक्रियेऽपापादनीयं । तत्र तु दोषशून्यता वा मिष्टापत्तेरिति चेन्न । यत्र घर्षणादिना खंडचक्षुरुत्पन्नं भ्रममेवोत्पादयत्
अ० १ न्नाशोपित यत्प्रमायाजनकेनापि प्रमाणव्यवहारस्यास्वीकारादतिव्याप्त्यापत्त्या प्रपदस्यावश्यकत्वात् । दोषवशेनान्यदीयेदंत्वस्य
वस्थानसंभवेन सर्वस्मिन् भ्रमस्यापि संभवात् । यद्वि च सर्वं ज्ञानं धर्मिण्यभ्रांतं प्रकारे तु विपर्यय इति नियमात्सर्वांशे न तत्र
२७ मसंभवः । तथापि तत्तद्धर्मादाय वप्रमाणव्यवहारोऽपि तः शंखः इति पीतं जनकेऽपि तत्त्वांशे प्रमाणत्ववारणाय तत्र चक्षुषि
प्रमात्वलाभाय प्रपदस्यावश्यकत्वात् । अनुभवस्यापि संस्कारद्वारा स्मृतिरूपज्ञानकरणत्वादतिव्याप्तेश्च प्र
दमिति । ननु प्रमाया यथार्थज्ञानत्वे तथा च स्मृतेरपि प्रमात्वे ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतु
त्वात्प्रमाज्ञानं विना कथं प्रमाकरणत्वं ज्ञानमित्यत आह । प्रमा चेति । यद्यपि अनुप्रमात्वं यथार्थज्ञानत्वं तथा च स्मृ
तेरपि प्रमात्वेन तत्करणेऽनुभवे प्रपदोपादानेऽप्यतिव्याप्तिस्तादवस्थ्यमतोऽनु[illegible] प्रमा चेति । तथा चानुभव
घटितप्रमात्वस्य स्मृतावसत्त्वेन न तत्करणे अनुभवेऽतिव्याप्तिरिति भावः । अत्र चानुभवत्वस्यैव प्रमा
त्वे रूपत्वे भ्रमेऽतिव्याप्तिः । यथार्थत्वस्यैव तद्रूपत्वे च स्मृतावतिव्याप्तिरित्युभयोपादानं नन्वनुभवस्या ७

१५

नुभवत्वघटितत्वेऽप्रमाणात्वावः। न चैवं स्मृतिरूपप्रमाकरणतयाऽनुभवस्य प्रमाणत्वापत्तिः। इष्टत्वात्। अनुमि
त्युपमितिशाब्दभिन्नप्रमितिकरणत्वेन प्रत्यक्षप्रमाणविभजनान्न विभागव्याघातोऽपीत्यत आह। यदाहुरिति॥
न ३ मानमित्यादि। यथार्थानुभवो मानमपेक्षतयेष्यतइति। [redacted]। तावेत्युपदूमानंमि[illegible]प्रमितिरियांवत्॥ अनपे ति ३
क्षतयेति। इतरप्रामाण्यानधीनप्रामाण्यकतया स्मृतेः प्रमात्वेऽपि अनुभवप्रमात्वाधीनप्रमितिस्मृतेरप्रमात्व
प्रतरमा मित्यर्थः। यद्वा साधारणं सहकार्यं साधं मनो बहिर्गोचरप्रमाजनयति तस्यैव प्रमाणत्वमिति नियमेनानुभ र ५
न ६ वसहकारेण मनसः स्मृतिरूपप्रमाजनकत्वादनुभवस्य प्रमाणत्वापत्तिरिति। स्मृतिव्यावृत्तमेवानुभवत्वघटि
तप्रमात्वमवश्यं वाच्यं। एवं प्रत्यक्षनिवेश्यानुमितित्वमनिवेश्य प्रत्यक्षोपमितिशाब्दभिन्नप्रमितिकरणत्वेना
नुभवस्यानुमानेऽप्यनन्तर्भावापत्तिः। विनिगमनाविरहादिति भावः। तद्वदिति॥ तद्वद्विशेष्यकत्वे सतीत्य
र्थः। न चैवं रू गुंजापुंजयोरिमौ गुंजापुंजावितीरीत्या विपरीतभ्रमे घ्यंशे वाकृत्य वद्विशेष्यकत्वस्य गुंजांशे
त्ववच्छिन्नप्रकारस्यैकत्वस्य सत्वात्। तत्रापि प्रमात्वापत्तिरिति वाच्यं। तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारक
त्वस्याविवक्षितत्वात्। तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमिति निष्कर्षः। तथा च तत्संब
न्धावच्छिन्नतद्वन्निष्ठविशेष्यतानिरूपिततत्संबंधावच्छिन्नतन्निष्ठप्रकारताशालिज्ञानत्वं तत्संबंधावच्छि च ४
न्नतत्प्रकारकप्रमात्वमिति फलितं। तत्संबंधावच्छिन्नत्वदलनिवेशात्तेन संबंधेन तद्विरहेऽपि कालिका हि
दिसंबंधेन तद्वत्वस्य सत्वेऽपि न भ्रमेऽतिव्याप्तिः। एवं रजत एव संयोगादिसंबंधेन रजतत्वप्रकारकत्वा

15

तर्क०प्र०
८

तस्यापि प्रमात्वापत्तिरित्यतस्तत्संबंधावच्छिन्नत्वनिवेशः॥ लक्ष्ये लक्षणं ग्राहयति॥ शुक्ताविति॥ तद्वति र- व-
जतत्ववति नेदवगाहि रजतत्वावगाहि। अलक्ष्ये लक्षणासत्त्वप्रदर्शनव्याजेन तद्वतीत्यस्य व्यावृत्तिमाह॥ शु-
क्तावित्यादिका। न तद्वतीति। न रजतत्ववतीत्यर्थः॥ किंतु रजतत्वाभाववति रजतत्वावगाहित्वात् भ्रम एवेति
भावः। एतेन तदभाववति तत्प्रकारकज्ञानं भ्रम इति भ्रमलक्षणं सूचितं। ननु वृक्षः कपिसंयोगीति ज्ञान-
स्यापि मूलावच्छेदेन संयोगाभाववति संयोग[illegible]प्रकारकत्वा[illegible]द्भ्रमत्वापत्तिरिति [illegible]चेन्न। प्रति-
योगिव्यधिकरणतदभावस्य विवक्षितत्वात्। वृक्षे संयोगाभावश्च न प्रतियोगिव्यधिकरण इति नानु-
पपत्तिः। न चैवं मूलेऽवृक्षः कपिसंयोगीति ज्ञानस्य भ्रमत्वानुपपत्तिरिति वाच्यं। तदवच्छेदकत्वांश एव
भ्रमत्वांगीकारात्। न तु संयोगांशेपीति। ननु तदभाववति तत्प्रकारकज्ञानत्वस्यैव भ्रमात्मकरूपत्वे संशयेऽतिव्या-
प्तिरतः निश्चयत्वघटितमेव तद्वाच्यमित्याशयेनाशंकते नन्वेवमिति। एवं निश्चयत्वाघटितस्यैव भ्र-
मात्मकरूपत्वे रजतत्वांश इति। एकधर्मिकविरुद्धनानाकोटिकज्ञानं संशय इति रजतत्वसंशये रजतत्वरज-
तत्वाभावौ कोटी तत्र रजतत्वाभाववति रजतत्वावप्रकारकत्वासमात्॥ रजतत्वाभावांशे प्रमात्वेपि
रजतत्ववति रजतत्वावगाहित्वात्तदंशे भ्रमत्वमिष्यत एवेति भावः। निश्चयत्वाघटितमेव भ्रमत्वमि-
ष्टं चाम्बीन संमतमित्याह। तद्वतीति। स्मृतिव्यावर्त्तनाय अनुभवत्वघटितं परमंगीकुर्वता न तु
संशयव्यावर्त्तनाय निश्चयत्वघटितमपीति भावः। शंकते शंख इति। क्वचिन्नन्वित्येव पाठः। कैस ८

पि०

ग १ योरहितेवृक्षे कपिसंयोगवत्त्वाभावान्न प्रमात्वं संभवइत्यतः कपिसंयोगवति वृक्ष इति ॥ तत्रापि मूलावच्छे
देन कपिसंयोगसत्त्वे प्रमात्वं इष्टापत्तिरतं शाखावच्छेदेनेति ॥ अवधारणं शाखावच्छेदेनैव न तु मूलावच्छेदेनापी सा २
त्यर्थः ॥ वृक्षः कपिसंयोगीति प्रत्ययस्य प्रमात्वे अविवादान्मूल इति ॥ मूलावच्छेदेनांततो गगनादिसंयो
गस्य सत्त्वान्मूले वृक्षः [illegible]संयोगीति प्रत्ययस्य प्रमात्वं सर्वमतमेवेत्यतः कपीसंयोगीति ॥ अवच्छेदकप्रत्यय
स्तु ॥ कपिसंयोगावच्छेदकप्रत्ययस्तु ॥ न तथा ॥ न प्रमा ॥ तस्यां मूलत्वस्य ॥ तदनवच्छेदकत्वात् ॥ कपिसंयो
गानवच्छेदकत्वात् ॥ कपिसंयोगवति वृक्षे कपिसंयोगप्रकारकत्वोक्त्या कपिसंयोगांशे प्रमात्वेव[illegible]दवच्छे
दकत्ववति अवच्छेदकत्वप्रकारकत्वाभावाच्च न तदंशे प्रमात्वमिति भावः ॥ ननु स्मृतिभिन्नं ज्ञानं चेदनुभ
वत्वमित्यत्र संस्कारजन्यज्ञानत्वं स्मृतित्वं वाच्यं तच्च प्रत्यभिज्ञानाद्यतिप्रसक्तमनुगतं दुर्वचं च ॥
=संस्कारत्व ५ संस्कारत्वेन तज्जन्यत्वं च स्मृतित्वस्य जातित्वमंतरा संस्कारत्वेन जनकतायां मानाभावेनासंभवा
ति ॥ तस्या जातित्वे च संस्कारजन्यत्व घटितत्वात् गुरुतर लक्षणस्याः ॥ यदि च स्मृतित्वं जातिः तद
क ७ वच्छिन्नप्रतियोगितकाभावस्यैव च निवेशान्न गौरवमिति विभाव्यते तदानुभवत्वमपि जातिः तद्भिन्नत्वं च सि ३
मेव लक्षणमास्तां कृतामेतावत्कुसृष्ट्येत्याशयेनाह ॥ जातिविशेषा इति ॥ ननु अत्र किं मानमत आ
ह ॥ अनुभवामीति ॥ अननुगतप्रतीतेरनुगतधर्मं विनानुपपत्तेरनुगतधर्मोऽभ्युपेयः ॥ तस्य चोपाधि

१७

=असंबंधाख्यबाधकस्य स्य समवायस्य सावद्ध्यधर्मत्वादिति भावः ।२

स्तुमल्वैगौरवाज्जातिरूपत्वमेवन्याय्यमिति भावः ।। अत्र सावदस्त्वनुगतप्रतीत्यै भावत्वरूपजातिसिद्ध्यापत्तिरत आह बा
व२ धकं विनेति । तत्र जातिबाधकस्यैव सत्वात् । निःस्यानेकसमवेतस्यैव जातित्वादिति भावः । तथा चोक्तं ।। व्यक्तेरभे
दस्तुल्यत्वं संकरोथानवस्थितिः ।। रूपहानिरसंबंधो जातिबाधकसंग्रहः ।। व्यक्तेरभेदः स्वाश्रयव्यक्ते
रैक्यं । यथा आकाशत्वादीति । व्यक्तेस्तुल्यत्वं ।। अन्यूनानतिरिक्तव्यक्तिकत्वं ।। यथा घटत्वकलशत्वादि । ८ ४
परस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः । यथा भूतत्वमूर्तत्वादि । अनवस्था
यथा जातित्वादि । विशेषत्वजातिस्वीकारे रूपहानिः । रूपस्य लक्षणस्य सामान्यभिन्नत्वे सति समवेतत्वे
सति सामान्यरहितत्वरूपलक्षणस्य हानिः । विशेषत्वरूपजातेरेवेतरव्यावर्तकत्वस्वीकारे स्वव्यावर्तकत्वरूप
विशेषस्वरूपहानिरिति वाच्यं ।। असंबंधः असमवेतत्वं । यथा कंबुग्रीवादिमत्वादि । केचित्तु । स्मृतौ व्य
भिचारवारणाय विशिष्टवैशिष्ट्यावगाह्यनुभवत्वस्यैव । विशेषणतावच्छेदकप्रकारकनिर्णयजन्य
क५ तावच्छेदकत्वमुपेयं । तथा च तज्जन्यतावच्छेदककोटिप्रविष्टत्वेनानुभवत्वं जातिरित्याहुः । अत्र स्वर्गादिकमनु
मिति शाब्दबोधानंतरं स्वर्गादिकमनुभवामीति प्रत्ययापत्तेः साक्षात्कारत्वरूपमेवानुभवत्वम
नुभवामीति प्रत्ययविषय इति न तादृशप्रत्यक्षविषयतया जन्यज्ञानादिचतुष्टयसाधारणत्वासिद्धिः ।।
यद्यपि विशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकतया नासिद्धिरिति तदपि न । नित्यव्यावर्त
नाय जन्यानुभवत्वमेव तत्कार्यतावच्छेदकमुपगंतव्यं । तत्र जन्यत्वं ध्वंसप्रतियोगित्वं प्रागभावप्रति भा

=यद्व्यवहितोत्तरक्षणकार्योत्पत्तित्वमेव फलायोगव्यवच्छिन्नत्वं=

योगित्वं कालिकसंबंधेन घटादिमत्त्वं वेति निर्वक्तुमशक्यतया जन्यप्रत्यक्षमात्रवृत्तिवैजात्यमेव कार्यतावच्छे-
दकं वाच्यं ॥ तथा च कुतः सकलतत्त्वपक्षादिसाधारणानुभवत्वजातिसिद्धिरित्यास्तामसदाग्रहेन । प्रमाकर-
णत्वघटककरणत्वं लक्षयति ॥ व्यापारवदिति ॥ कपालेति । तत्राप्यसाधारणकारणत्वसत्त्वादिति
भावः ॥ असाधारणेति ॥ असाधारणकारणत्वं च कार्यतानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं । ई- ता ४
श्वरज्ञानस्य तु उपादानप्रत्यक्षविषयाकार्यत्वावच्छिन्नं प्रत्येव हेतुत्वान्नातिव्याप्तिरिति भावः ॥ ननु का-
र्यतावच्छिन्नकार्यतानिरूपितकारणतान्यत्वं तत्र । तथासति कार्यतामात्रं प्रति कालिकस्य हेतुत्वे-
(हेतुतया) न कालोपाधिविधया चक्षुरादीनामपि कार्यमात्रं प्रति असंगत्यापत्तेरिति ध्येयं । ननु फलायोगव्य-
वच्छिन्नं कारणमेव करणं ॥ अत एव आत्मा न ज्ञानकारणं तस्य नित्यत्वेन फलायोगव्यवच्छेदाभावादित्यभि-
प्रायेण शंकते नन्वेवमिति ॥ एवं ॥ एवंविधलक्षणकरणे व्यापारस्यासत्त्वादिति । जन्यज्ञानत्वावच्छिन्नं प्रति अ-
साधारणत्वाभावेत्यपि द्रष्टव्यं ॥ तज्जन्यत्वे सतीति ॥ तज्जन्यत्वस्य फलेऽपि सत्त्वात्तज्जन्यजनक इति ॥
तज्जन्यजनकत्वस्य चेश्वरज्ञानादावपि सत्त्वात्तज्जन्यत्वे सतीति ॥ स्यादेवेति । सहकारिविरहे फला-
योगव्यवच्छेदस्यासंभवितत्वात् सहकारिसमवधाने फलायोगव्यवच्छेदस्य चात्मन्यपि सत्त्वेन त्वन्मते फलं
तेप्यगतेरिति भावः ॥ नन्वेकस्यैव कर्तृत्वकरणत्वस्वीकारे कर्ता करणमिति नानाविधव्यवहारोऽनु ध्वस

असाधारणत्वानापत्तेः=

(19)

पपन्नः॥ व्यवहर्त्तव्यभेदस्यैव व्यवहारभेदनियामकत्वादित्यत आह॥ उपाधीनामिति॥ तथा चोपाधेय संकरे उपाधेरसं
करादिति न्यायेन व्यवहर्त्तव्यभेदेऽपि व्यवहर्त्तव्यतावच्छेदकभेदादेव व्यवहारभेदः॥ यथा घटरूपव्यवहर्त्तव्यभेदेऽपि घ
टत्वद्रव्यत्वादिरूपव्यवहर्त्तव्यतावच्छेदकभेदात् घटो द्रव्यमित्यादिव्यवहारभेदः॥ एवं पाचकपाठकादिव्यवहारोऽपी
ति भावः॥ अत एवेति॥ एकस्यैव कर्त्तृत्वकरणत्वस्वीकारादेवेत्यर्थः॥ अत एवात्मनः करणत्वस्वीकारादेव॥ तृ आ ४
तीयेति॥ तृतीयायाः करणेऽर्थकत्वादिति भावः॥ अंगी चक्षुरित्यस्य स्वंसोऽङ्गावनं तन्द्वीजं तु सर्वत्र वा खंडोपाधे
रेवानुगतप्रतीतिविषयत्वेऽस खंडोपाधेरुच्छेद एवेति॥ न च कर्त्रादिव्यावृत्तकरणत्वनिर्वचनानुपपत्त्या
तस्याखंडोपाधिरूपत्वमेव ज्याय[illegible]ति वाच्यं॥ तस्य तत्साधारण्यपक्षे तेषां व्यवहारभेदस्य व्यवहर्त्तव्यता
वच्छेदकभेदादेवान्यथाप्युपपत्तेः॥ नन्वेवमात्मनः प्रमाणत्वापत्तिरिति चेन्न॥ अनुभवत्वव्याप्यजात्यवच्छि तिः
न्नप्रमावृत्तिकार्यतानिरूपितकारणताश्रयत्वे सति व्यापारवत्त्वस्यैव प्रमाणत्वरूपत्वेनात्मनि तद
संभवादिति॥ यत्तु तमोभिन्नचाक्षुषत्वस्यालोकजन्यतावच्छेदकत्वादालोकेऽतिव्याप्तेर्जात्यवच्छिन्नेत्य
त्रावच्छेदकतापर्याप्तिनिवेश आवश्यकः॥ इत्थं च जन्यज्ञानत्वावच्छिन्नं प्रत्येव परमात्मत्वेन हेतु
तया ज्ञानत्वजातेरवच्छेदककोटिप्रविष्टत्वेऽपि कार्यतावच्छेदकतापर्याप्त्यधिकरणत्वाभावात् एव वा वा
रणे अनुभवत्वव्याप्येति नोपादेयमिति तन्न॥ तथा नित्यवृत्तिसामान्यस्यापि कार्यतावच्छेदकत्वोपगमे
पि

व्याप्य

॥अनुभवत्वजातिपर्याप्तावच्छेदकताककार्यतानिरूपित-
अनुभवत्वव्याप्यजातिपदेन तन्मोऽभिन्ने चाक्षुषत्वजातिर्घटितुं न श
क्यते कुतः तस्या जातौ पर्याप्तेरधिकरणतासत्त्वात् अतः आ
॥तिपदेन केवलं चाक्षुषत्वजातौ ति स्त्री घा। तस्यां पर्याप्तिसंबन्धे
॥नविद्यमाना अवच्छेदकता यस्याः कार्यतायाः तादृशकार्यतानि
रूपितकारणता आलोकत्वास्ति लिकत्वास्तीति

ज्ञानत्वावच्छिन्नं प्रतिसंयेवात्मत्वेन हेतुतया ज्ञानत्वावारणाय तदावश्यकत्वादिति ॥ आत्मत्वं तु जन्यज्ञानत्वाव
च्छिन्नं प्रत्येव कारणत्वादिति भावः ॥ चार्वाकमते प्रत्यक्षस्यैव प्रमाणत्वाद्भाट्टानां चानुपलब्धेरपि प्रमाणत्वात्तन्नि
रासायाह ॥ चतुर्विधमिति ॥ तत्रेति ॥ चतुर्विधप्रमाणमध्य इत्यर्थः ॥ तत्र प्रथमोद्दिष्टं प्रत्यक्षप्रमाणं लक्ष
यति ॥ साक्षात्काररूपेति ॥ साक्षात्कारेति अनुमानादावतिव्याप्तिवारणाय साक्षात्कारत्वमेव कः साक्षा
त्कारस्य प्रमेति धर्मस्याह ॥ साक्षात्कारिप्रमेत्यस्य कावपि तथ्यतः रूपेति ॥ इयं साक्षात्करोमीति प्रतीतिः ॥
इंद्रियेति ॥ तथा च न साक्षात्कारत्वरूपजातिसिद्धिरिति भावः ॥ ज्ञानमात्रस्येति ॥ तथा च मनोरूपेंद्रियजन्यत्व य
स्यानुमित्यादावपि सत्त्वेन तत्रापि साक्षात्करोमीति प्रतीतिः स्यादिति भावः ॥ ननु इंद्रियत्वावच्छिन्नजनकतानि
ख्रि रूपितजन्यत्वमेव विषयः ॥ मनस्तु मानसज्ञानं प्रत्येव इंद्रियत्वेन हेतुत्वं अनुमित्यादिकं प्रति तु मनस्त्वेन इत्य त्व
तिप रुचेराह ॥ इंद्रियाप्रतीतावपि इंद्रियाप्रतीतावित्यर्थः ॥ तथा चेंद्रियज्ञानं विना तद्घटितानुगमज्ञानाभावान्न ता
दृशधर्मस्य विषयत्वसंभव इति भावः ॥ वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इंद्रियत्वे कार्यकारणभावसंभ
स्पग चितयेंद्रियत्वेनेंद्रियजन्यत्वे साक्षात्कारत्वरूपत्वासंभवमवलम्ब्यैव मवतारणीयं ॥ परं तु ननु इंद्रियनिरू इंद्रियजन्यज्ञा
पितविषयतासंबंधावच्छिन्नजन्यताशालि ज्ञानत्वमेवानुमित्यादिव्यावृत्तं तादृशविषयद्वयं तत आह ॥ इंद्रियेति ॥
इंद्रियाज्ञानेपीत्यर्थः ॥ तथा प्रतीतेः साक्षात्करोमीति प्रतीतेरित्यर्थः ॥ एतेन ज्ञानाकारणकं ज्ञानं प्रत्यक्षमि

११ तिरैनिरस्तं ॥ तदज्ञानेपि तत्प्रतीतेर्यथार्थज्ञानत्वादिति ॥ अवश्याभ्युपेयचाक्षुषत्वादिजातिरेव नास्याविषयदु
पाह ॥ नापीति ॥ अननुगतत्वादिति ॥ अननुगतप्रतीतेरप्यनुगतधर्मं विना नोपप[illegible]त्तेरिति भावः ॥ ननूप
नीतमज्ञानं न रसाक्षात्करोमीति प्रतीत्यापत्ते लौकिकविषयतायास्तत्रव्यञ्जकत्वेनावश्यकत्वाल्लौकि
कविषयताशालिज्ञाने त्वमेव साक्षात्करोमीति प्रतीतिविषयएवमनुगतप्रतीत्यैव जातिसिद्धौ विप्रति
त्यनुगतप्रतीत्या विभुत्वरूपजातिसिद्धिः स्यात्किंतु कारणतावच्छेदकतया कार्यतावच्छेदकतया वा तत्सिद्धिः ॥ ता५
प८ नैवोक्त[illegible]त्वं नेदर्शितं नत्वेंद्रियत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतयास्तु सिद्धिरिति वाच्यं इंद्रिय
त्वस्यैकस्याभावादिंद्रियनिष्ठैकत्वेषु वैजात्यस्यावश्यकत्वविजातीयैकत्ववत्त्वरूपस्य तस्य सत्त्वेपि कार्यमात्रव =अनुगमकस्य
७निस्सा त्तिधर्मस्यैव कार्यतावच्छेदकत्वेन साक्षात्कारत्वस्यानिरुक्तत्वाच्चतया जन्यतानवच्छेदकत्वात् ॥ जन्यत्वं निव
स्य८ शेनजन्यत्वं ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वादिविकल्पेप्राप्ते निर्वक्तुमशक्यत्वाज्जन्यसाक्षात्का
=साक्षात्कारत्वव्यतिरिक्तो ॥५ रमात्रवृत्तिवैजात्यस्य कृते तस्यैव तज्जन्यतावच्छेदकत्वावश्यकतया कुतस्तत्कोटिप्रवेश इत्याह साक्षात्कार
चा४ त्वरूपजातिसिद्धिः ॥ एवं चाक्षुषस्पार्शनादौ विशिष्यचक्षुरादीनां हेतुत्वावश्यकतया तादृशसामान्यका
र्यकारणभावे मानाभावाच्चेत्यत आह ॥ यद्देत्यादि । जन्यधीत्यादि । जन्यायाधीज्जन्यमात्रवृत्ति
र्यज्ञानत्वस्य जन्यज्ञानत्वसाक्षात्कारत्वमित्यर्थः ॥ लक्ष्यैकलक्षणं गमयति । सर्वाहीति । अनुमिति
त्वादिपदात्तु मितित्वशाब्दत्वादिपरिग्रहः ॥ तत्र हि जन्यं ज्ञानं व्याप्तिज्ञानं अतिदेशवाक्यार्थज्ञानं १२

दीसा१

प१ स्य५

ला० २= ईश्वरसाक्षात्कारचाक्षुषत्वाद्जातेः अन्यत्वाद्लक्षणसमन्वयः =१

पदस्थानादि ॥ तज्जन्यमनुमित्यादि ॥ तन्मात्रवृत्तिअनुमितित्वादितद्भिन्नान्यत्वं साक्षात्कारत्वमित्यर्थः । अथज्ञानं
त्वं साक्षात्कारत्वमित्युक्तावनुमित्यादावतिव्याप्तिः ॥ अतः अन्यत्वांते जातिभिन्नज्ञानत्वं साक्षात्कारत्व
मित्युक्तावसंभवः । ज्ञानत्वादिजातेरेव तत्र सत्वादित्यतः जन्यधीजन्यमात्रवृत्तिजातिविशेषणं । ज्ञा
ला०४ नत्वस्य च जन्यधीजन्यभिन्ने ईश्वरसाक्षात्कारे निर्विकल्पके च वृत्तित्वान्न तन्मात्रवृत्तित्वमिति नासंभ
वः । जन्यधीजन्यवृत्तीत्युक्तावपि तथा ॥ ज्ञानत्वादेर्जन्यधीजन्यसविकल्पकरूपे वृत्तेर्मात्रेति । जन्य ला०५
धीजन्यभिन्नावृत्तित्वे सति जन्यधीजन्यवृत्तित्वं च तन्मात्रवृत्तित्वं । चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृ २६
त्तित्वादव्याप्तिरतः प्रथमजन्यपदोपादानं । तस्य च जन्यज्ञानाजन्ये निर्विकल्पके वृत्तेर्न तन्मात्रवृ क०६
त्तित्वं । जन्यजन्यमात्रवृत्तीत्युक्तावपि निर्विकल्पकस्य जन्यशरीरादिजन्यत्वेन चाक्षुषत्वादेर्जन्यजन्यमा
धी०८ त्रवृत्तित्वादव्याप्तिरतो धीपदोपादानं । जन्यमात्रवृत्तीत्युक्तावपि चाक्षुषत्वस्य जन्यज्ञानमात्रवृत्तित्वा
दतो द्वितीयजन्यपदोपादानं । जन्यमात्रवृत्तीत्युक्तावपि धेत्यतो ध्यंतोमति । धीमात्रवृत्तीत्युक्तौ ज्ञानत्वा
धी०९ दिकमादायासंभवस्तेनेति समुदितमुपात्तं । जन्यजन्यमात्रवृत्तिः धर्मः अन्यत्वमित्युक्तौ सविकल्पकत्वस्य तन्मात्र ल्पक ८
वृत्तित्वेनाव्याप्तिरतो जातिपदं । सविकल्पकत्वं तु न जातिः । चाक्षुषत्वादिना संकरात् । समवायसंबंधा
वच्छिन्नजातिभिन्नान्यत्वं वा बोध्यं । अन्यथा कालिकादिसंबंधेनानुमितित्वादेरपि प्रत्यक्षादौ सत्वेना
संभवापत्तेः । एतद्धर्ममेव जातिपदं । घटादावतिव्याप्तिवारणाय ज्ञानवृत्तित्वेन उपादानमत्र प्रत्यक्षस्य क
=समवायसंबंधेन अन्यत्वलाभात् धर्ममेव । न च जातिपदानुपादाने सविकल्पकत्वमादाय अव्याप्तिरिति वाच्यं । सविकल्पकत्वस्य समवायसंबंधेनचाप्रसिद्धेनतेनसंबंधेनअन्यत्वमितिभावः ।१

२= आदिशब्देन विषयतासंबंधः =२

४ = तारकमन्त्रविषयकशाब्दबोधः ।। = ४

पमात्रे हेतुतया कपालविषयकोपादानप्रत्यक्षरूपजन्यत्वान्जन्यमात्रवृत्तिघटत्वादिजातिसत्वात्तत्र नातिव्याप्ति
रितिचेन्न।सर्गादौकुलालाद्यसत्वेपीश्वरेणैवघटोत्पादनादीश्वरकपालज्ञानस्यचाजन्यतयाघटत्वादेर्जन्य
धीजन्यमात्रवृत्तित्वाभावात् घटत्वादावतिव्याप्त्यसंभवात्।सामान्यादावतिव्याप्तिसंभवाच्चेतिदिक्।।नि
दिध्यासनेत्युपलक्षणं।काश्यांमरणस्थलेतारकोपदेशजन्यज्ञानेत्यपिद्रष्टव्यं।।निदिध्यासनेत्यादिनाजन्यधी =तत्त्वज्ञाने ४
जन्यमात्रवृत्तित्वंसूचितं।ननुतत्त्वसाक्षात्कारत्वंश्रवणादिप्रयोज्यात्मविषयकशरीरादिभिन्नत्वप्रकारकसा
क्षात्कारत्वंतच्चविशिष्टस्यानतिरेकात्साक्षात्कारत्वमेवतच्चनजन्यधीजन्यमात्रवृत्तीतिकुतोऽव्याप्तिरित्यतआ
ह।मोक्षेति।।तथाचमुक्तित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयासिद्धस्यतत्त्वज्ञानवृत्ति
वैजात्यस्यनिदिध्यासनादिजन्यमात्रवृत्तित्वात्तच्छून्यत्वाभावेनाव्याप्तिरितिभावः।।मानसेति।।तथा
चमानसावृत्तिअनुमितित्वादिकमेवतच्छून्यत्वस्यसत्वान्न व्याप्तिरितिभावः।।इदमुपलक्षणं।।आ
राध्यत्वप्रकारकज्ञानरूपस्यभक्तिवृत्तिजभक्तिफलावश्यंभावनिश्चयरूपश्रद्धानिष्ठश्रद्धारूपजात्यादौ
न्यधीजन्यमात्रवृत्तित्वान्मानसावृत्तीतिविशेषणमावश्यकमेवेतिध्येयं।।ननुमानसत्वंमनोजन्यत्वंतथा
चानुमितित्वादेरपिमानसवृत्तित्वाभावादनुमित्यादावतिव्याप्तिः।।नचतादृशजात्यसिद्धिःदेवदत्तस्य सि ३
सत्वतावच्छेदकशब्दवृत्तिजातेरेवतादृशत्वादित्यतआह।।मानसत्वंचेति।।ननुमानसत्वस्यजातित्वेप्रमा
णाभावइत्यतआह।।आस्तांविस्तरइति।।आत्ममानसत्वावच्छिन्नंप्रतिविजातीयमनःसंयोगत्वेनहेतु १२

तयात ज्ञातावच्छेदकतया मानसत्वजातिसिद्धिरिति भावः ॥ वैशिष्ट्यानवगाहि ज्ञानं निर्विकल्पकं तदेव साक्षात्का-
रः ॥ अयं घट इति वैशिष्ट्यविषयक इति शेषः ॥ घटत्वाद्यलीकेति ॥ तन्मते अनुगतधर्मो घटत्वादि[illegible]रितरव्यावृत्ति- ग २
रूप एव व्यावृत्तिरन्योन्याभावः ॥ अभावश्च तन्मते तुच्छः ॥ अलीक इति यावत् ॥ तथा च भावरूपघटत्वस्य अ-
लीकस्य प्रमाणासदसतोश्च संबंधाभावाद्विशिष्टोप्यलीक एव ॥ असद्विषयकं च ज्ञानं [illegible] भ्रम इति सवि-
कल्पकं ज्ञानं भ्रमः ॥ निर्विकल्पके च घटत्वादेरभानात्पारमार्थिकविषयकत्वेन तच्चैव साक्षात्कार प्रमा ॥ अर्थजस्ये-
व प्रत्यक्षत्वादिति भावः ॥ बाधकं विनेति विषयविसंवाद एव हि भ्रमत्वे बाधकः यथा शुक्तौ रजतस्य प्रत्य-
ते च घटत्वस्य विसंवाद एवेति भावः ॥ ननु विषयविसंवादस्य बाधकत्वेन भ्रम ॥ अपि तु अलीकविषयकत्व-
स्य समिषे स्यादेन चेति ॥ अलीकत्वसिद्धिरिति ॥ अभावस्यापि घटादिपदार्थवदनुभूयमानतया अलीकत्व-
टृ६ मसिद्धमिति कुतस्तत्स्यात् तद्व्यावृत्तिरूपघटत्वस्यालीकत्वं ॥ एवमतद्व्यावृत्तिरिव च घटभिन्नत्वं यत्किंचित्प्रतियो-
गिकभेदस्य पटेपि सत्त्वाद्घटभिन्नत्वं यावत्तत्तद्व्यक्तित्वावच्छिन्नभेदकूट एव घटत्वं वाच्यं ॥ तथा च याव-
त्प्रतियोगिज्ञानाभावात् घटत्वबुद्ध्युच्छेद एव स्यात् ॥ यदि चाभावत्वेनाभावज्ञान एव प्रतियोगिज्ञानापेक्षा
न त्वेवं स्वरूपत एव घटत्वभानान्नानुपपत्तिरिति विभाव्यते तथापि घटत्ववानिति बुद्धेरुच्छेदापत्तिः
तत्र घटत्वत्वेन घटत्वस्य भानात्तस्य च भवन्मते यावत्प्रतियोगिज्ञानं विना असंभवादिति ॥ किं च तत्त-
द्व्यावृत्तिभिन्नस्यैव घटत्वादिरूपत्वमन्याभावरूपत्वमिति ॥ अस्यालीकत्वसंभावनेति भावः ॥ त २
ट२

(26)

४= अनाद्यनंतत्वं नित्यवस्तुनि तद्दशायां लक्षणसमन्वयः ४=

तर्क॰प्र॰२२

प्रत्यक्ष॰१३

त्वदृष्टादिभिरीश्वरानंगीकारेण ज्ञानस्य सुतरामसंभवितत्वेन साक्षात्कारस्यैकविधत्वमेवांगीक्रियत इत्यतस्तन्मतं निराकर्तुमाह ॥ स चेति कार्यं प्रति उपादानप्रत्यक्षस्य हेतुतया परमाण्वादिरूपोपादानप्रत्यक्षं विना द्व्यणुकादिरूपकार्यस्यानुत्पत्त्या स ईश्वर एवावश्यकमंगीकर्तव्यः। तथा च तज्ज्ञानसत्त्वेन द्वैविध्यमेव तस्येति भावः। द्वैविध्यमेव विवृणोति। नित्यमित्यादिना। नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं। सत्यंतानिवेशान्न ध्वंसेऽतिव्याप्तिः। प्रागभावेऽतिव्याप्तिवारणाय विशेष्यदलनिवेशः। अनित्यत्वं च प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं वा। अन्यदिति। भगवत्संबंध्यन्यदित्यर्थः। अस्मदादिसाक्षात्कार इति यावत् ॥ तत्र निर्विकल्पकसविकल्पकयोर्मध्ये। वैशिष्ट्यानवगाहीति। वैशिष्ट्यविषयताशून्यज्ञानत्वमित्यर्थः। निर्विकल्पकज्ञाने विशेषणज्ञानसंपत्त्यर्थं घटत्वविषयकत्वमावश्यकं व्यक्तिभानमंतरा च जातिभानासंभवादिति घटविषयकत्वमपि तस्यांगीक्रियते वैशिष्ट्यविषयकत्वे तु न किंचित्साधकमिति वैशिष्ट्यानवगाहित्वमक्षतं सविकल्पके च वैशिष्ट्यस्यापि विषयत्वान्न तत्रातिव्याप्तिरिति भावः। नृसिंहाकारकज्ञानस्वीकारेनु न्नरत्वेपि तद्वैशिष्ट्यविषयताशून्यज्ञानत्वं तन्निर्विकल्पकत्वमिति ध्येयं ॥ ननु चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपकारणबलात् घटघटत्वयोर्भानवत् च चक्षुःसंबद्धविशेषणतारूपकारणबलात्तत्संबंधस्यापि भाने बाधकाभावः। प्रतिबध्यप्रतिबंधकभावकल्पने च गौरवं तथा चेदं लक्षणमसंभवग्रस्तमित्यत आह ॥ निराकारमिति। निष्प्रकारकमित्यर्थः। क्वचित्तथैव पाठः। वस्तुतस्तु वैशिष्ट्यानवगाहित्वस्य संसर्गमर्यादया वैशिष्ट्यानवगाहित्वमर्थः। वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यत्वत्वमिति निष्कर्षः।

क॰

=सविकल्पके८

ननुप्रकारतासामान्यशून्यत्वंविशेष्यतासामान्यशून्यत्वमपिलक्षणंकर्तुंशक्यतएवेतितत्कथंनोक्तमित्यतइष्टापत्यात
येवेत्या[illegible]ह॥निराकारंवेति॥निष्प्रकारकंनिर्विशेष्यकंवेत्यर्थः॥वाकारस्त्वात्रव्यवस्थितविकल्पेद्रष्टव्यइतिपु
नर्निर्व्यलीकःपंथाः॥नन्वयंघटइतिज्ञानोत्तरंघटत्वेनेमंजानामीत्याकारकोनुव्यवसायः॥तत्रवैशिष्ट्यस्यतृतीयार्थत्वे न
घटत्वविशिष्टविषयकज्ञानवानितिप्रकारत्वस्यतृतीयार्थत्वेचघटत्वप्रकारकज्ञानवानितितदाकारः॥तथाच
तादृशानुव्यवसायबलात्सविकल्पकस्यप्रत्यक्षसिद्धत्वेपिनिर्विकल्पकस्यानुव्यवसायगम्यत्वाभावान्तत
चप्रत्यक्षंप्रमाणंनाप्यनुमानमप्रयोजकत्वादितिमीमांसकमतंहृदिस्थीकृत्यशंकते॥नचेति॥निर्विकल्पकंचे
७अ त्यर्थः॥प्रत्यक्षसिद्धमनुव्यवसायात्मकप्रत्यक्षप्रमितिगम्यम्॥अभ्युपगमादिति॥नैयायिकैरितिशेषः॥अ
नुमेयं॥अनुमानगम्यम्॥तच्चायंघट[illegible]इत्याकारकः॥जन्यघटत्वविशिष्टसाक्षात्कारः॥जन्यघटत्वज्ञानपू ८
शि शि र्वकः॥जन्यघटत्वविशिष्टज्ञानत्वात्॥यद्विशिष्टज्ञानंभवतितत्तद्ज्ञानपूर्वकंभवति॥इतिसामान्येमुखी
व्याप्तौदंडीपुरुषइतिप्रत्यक्षदृष्टांतः॥नन्वत्रकार्यकारणभावानुकूलतर्काभावादप्रयोजकत्वमित्यतआह
तथाहीति॥जन्येति॥जन्यतद्विशिष्टज्ञानत्वावच्छिन्नंप्रतिजन्यतद्विशेषणज्ञानत्वेनहेतुत्वमितिकार्यकारणभा
वएवानुकूलतर्कइतिभावः॥घटंचज्ञानाद्दंडविशिष्टज्ञानवारणायतत्तदंतर्भावः॥नित्यव्यावर्तनायाचकार्य
तावच्छेदकेजन्यत्वप्रवेशः॥नित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावइतिनियमात्कारणतावच्छेदकेपिज
न्यत्वप्रवेशः॥वस्तुतस्तुसामानाधिकरण्यप्रत्यासत्त्यातस्यहेतुत्वबोधनायकारणतावच्छेदकेजन्यनि
वेशनमितिबोध्यं॥निर्विवादमिति॥यथाचनविवादस्तथोपरिष्टाद्दृश्यते॥तथाचकार्यकारणभाव
यर

28

=प्राथमिकज्ञानात्सर्वविशिष्टज्ञानस्य ४

रूपानुकूलतर्कसत्त्वान्नाप्रयोजकत्वमनुमानस्येति भावः। पक्षे हेतुं संगमयति। सचेति। धारावाहिकस्य
ले द्वितीयादिविशिष्टज्ञानस्य पूर्वपूर्वविशिष्टज्ञानजन्यत्वसंभवान्न निर्विकल्पसिद्धिरित्यतः प्राथमिकमिति॥
तत्रापि घटत्वविशिष्टज्ञानेपि॥ ननु घटत्वप्रकारकं ज्ञानमेवांगीक्रियतामित्याशंक्य निराचष्टे। न चेति।
तदानीं प्राथमिकघटत्वविशिष्टज्ञानात्पूर्वं ज्ञानाभावादिति॥ तथा च विशेषणज्ञानं विना तस्य न प्रकारत्वमि क४
ति भावः। तत इति। विशेषणज्ञानाभावेन तस्य सप्रकारकत्वासंभवादित्यर्थः। तदिति। घटत्वविषयकं ज्ञान
मित्यर्थः। ननु वैशिष्ट्यानवगाहिघटत्वविषयकज्ञानसिद्धावपि निर्विकल्पकसिद्धिरित्यत आह। तदेव न
चेति। अनन्यथासिद्धपूर्ववर्त्तिन एव कारणत्वाज्जन्मांतरीयघटत्वविशिष्टज्ञानस्य पूर्ववर्त्तित्वादेव कार ष॰
णत्वमस्त्वित्याशंक्याह॥ न चेति। अव्यवहितेति॥ न हि पूर्ववर्त्तित्वमात्रं कारणत्वघटकमपि त्वव्यवहि
तपूर्ववर्त्तित्वं तच्च न तत्रेति भावः। कार्यमात्रं प्रति ईश्वरीयज्ञानत्वेन हेतुत्वादीश्वरीयज्ञानस्यैव हेतु
हेप त्वमस्त्वित्याशंक्याह॥ न चेति। तज्ज्ञानं घटत्वविशिष्टज्ञानजनकं॥ सामानाधिकरण्येति॥ एकस्य दे
ज्ञाने पुरुषांतरस्य घटत्वविशिष्टज्ञानकारणाय समवायसंबंधेन तद्विशिष्टबुद्धिं प्रति समवायसंबंधेन तद्वि
य॰ शेषणज्ञानस्य हेतुत्वमिति सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वेन न प्रागवज्ञानस्य हेतुत्वमिति भावः।
व्यधिकरणत्वात्॥ अस्मदीयघटत्वविशिष्टज्ञानव्यधिकरणत्वात्॥ तत्कारणमिति। घटत्वविशिष्टा
नुभवे कारणमित्यर्थः। तदेवाह स्मरणात्मकं विशिष्टज्ञानमेव॥ एवं चानुभवस्य समवायसंबंधेन स्मरण

(29)

= विशिष्टस्मरणजनकं विशिष्टस्मरणात्मकं

ति २

तं

म१ एवं सति त्वाद्विशिष्टज्ञानस्य विशेषणज्ञानकार्यतानवच्छेदकत्वेन विशिष्टानुभवत्वमेव कार्यतावच्छेदकं वक्तव्यमि
त्याह ॥ विशिष्टानुभवे हीत्यादिना ॥ ननु स्मरणेऽपीति ॥ ननु विशिष्टस्मरणेऽपि तेन विना विशेषणज्ञानेन वि ण २
ना । तदुपपत्तेरिति । विशिष्टस्मरणोपपत्तेरित्यर्थः । कदाचिद्दृष्टज्ञानासत्वे संस्काराभावेनैव दण्डविशिष्टस्म रा ३
णज्ञा ४ रणाभावात् तत्र विशेषणज्ञानहेतुत्वस्यानर्थकत्वात् ॥ पूर्वानुभवस्य विनष्टत्वाद्विशेषणज्ञानस्य स्मरणा
जनकत्वाच्चेति भावः । ननु पूर्वानुभवस्य नष्टत्वात् स्मरणजनकत्वासंभवेऽपि विशिष्टस्मरणमेकस्मरणपू स्मरणात्मक
र्वकल्पनीयमित्यत आह ॥ अन्यथेति ॥ अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानस्य हेतुत्वे पूर्व विशिष्टज्ञानस
मनुभवस्यासत्वात्तज्जनकमपि स्मरणमेव वाच्यं । एवं तत्रापि स्मरणान्तरमित्यनवस्था इत्यर्थः ॥ ननु अनु
भवत्वजातौ मानाभावेन स्मृत्यन्यज्ञानत्वरूपस्य तस्य निवेशे गौरवाद्विशिष्टज्ञानमात्रे विशेषणज्ञानस्य
हेतुत्वेन विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानं हेतुः । न चानवस्था तत्पूर्वं निर्विकल्पकस्मृतेरेवापगमात् ।
न च ममापि घटत्वविशिष्टज्ञानपूर्वं घटत्वविशिष्टस्मरणस्यैव तत्पूर्वं च घटत्वनिर्विकल्पस्य कल्पनेन दो
ष इति वाच्यं । तत्पूर्वं ज्ञानद्वयकल्पने गौरवात्तदपेक्षया घटत्वनिर्विकल्पकानुभवस्यैव स्वीकर्तुमुचितत्वमित्य
त आह । अस्तु वेति । तथा सति ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वनिर्विकल्पकस्मरणमेव कल्प्यत
इति न ज्ञानद्वयकल्पने गौरवमिति भावः ॥ न च निर्विकल्पकात्मकस्मृतेरस्वीकारान्निर्विकल्पात्मकज्ञानं का ३
सिद्धमेवेति न विवादः इति वाच्यं । तथापि निर्विकल्पकात्मकानुभवस्यासिद्धत्वादिति । ननु निर्विकल्पका
त्मकस्मरणमेवानुपपन्नं तद्विशेष्यकतत्प्रकारकज्ञानजन्यस्मृतितावच्छिन्नं प्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन

न

हेतुत्वाज्जायमानं ज्ञानं सप्रकारकमेव स्यान्न तु निष्प्रकारकमिति चेत्॥ तद्विषयकस्मृतिं प्रति तद्विषयकसंस्कारत्वेनापि सा
मान्यकार्यकारणभावकल्पनाद्विशेषणज्ञानं विनाजायमानं ज्ञानं निर्विकल्पकमेव जायत इत्यादि कृ॥ ननु सर्वत्र विशि
का ष्टानुभवपूर्वाविशिष्टस्मरणस्य निर्विकल्पकात्मकस्मरणस्य वा हेतुत्वकल्पने तत्स्मरणे अनुभवः कारणं तदनु
भवे च स्मरणांतरमित्यनवस्था॥ किंच पूर्वाननुभूतपदार्थस्य घटादेराद्यनुभवे स्मरणमेव कारणं वाच्यं
तच्च न संभवति तज्ज्ञानकानुभवाभावात्॥ जन्मांतरीयानुभवादेव तत्स्मरणोपगमे च जन्मांतरानुभूतानां घ
टादिपदार्थानामपि स्मृतिप्रसंग इति चेन्न॥ आद्यनुभवजनकस्मरणस्य जन्मांतरीणानुभवाद्वा नोयस्यादृष्टवि
दि शेषोद्बोधकसहकृतादुपपत्तेः॥ न च परंतो स्मृतिप्रसंगः तत्र फलानुपपत्तेरभावेनादृष्टोद्बोधकत्वकल्पना
त्॥ अनवस्थायाश्च प्रामाणिकत्वेनादुष्टत्वादिति न किंचिदेतत्॥ तदसंभवात्॥ स्मरणासंभवात्॥ नन्वदृष्टविशेषो
द्बोधकवशाज्जन्मांतरीणानुभवैरेतं चैत्रं चमपि स्मर्यतामित्यत आह॥ न हीति पूर्वमिति जन्मांतर इत्यर्थः॥ अननुभू तन्त्रा
तमिति॥ चैत्रत्वादिज्ञानेस्तत्तच्छरीरवृत्तिचैत्रचैत्रशरीरस्य च जन्मांतरे अभावेन तद्वृत्तिचैत्रत्वादेर्ग्रहका
भावादनुभवासंभवेन न स्मृतिसंभवः॥ तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादिति भावः॥ नन्वप्रयोज
कोयं नियमो नादरणीय इत्यत आह॥ न चेति॥ तस्यानुभवस्य॥ तद्धेतुत्वात्॥ स्मरणहेतुत्वात्॥ तथा च
स्मृतित्वावच्छिन्नं प्रति अनुभवस्य हेतुतया न तादृशनियमस्याप्रयोजकत्वमिति भावः॥ न चेदृशकार्यका
रणभावे मानाभाव इति वाच्यं॥ तथा सति कदाचिदप्यननुभूतस्यानुभूतस्य वा तद्देशे परोक्षकालके ज्ञानविषय
स्य स्मरणापत्तेरपेक्षान्यज्ञानत्वेन तद्धेतुताया आवश्यकत्वात्॥ न च संस्काराभावान्नायमापत्तिरिति वाच्यं॥ सं
स्कारस्य व्यापारद्वारा तस्यापि हेतुत्वात्॥ व्यापारेण च व्यापारिणोऽन्यथासिद्ध्यभावेन संस्कारेणानुभवस्यान्यथा स्या १
अनुभवस्यापि

१ संसर्गा=५● स्वावच्छिन्नप्रतियोगिकत्वसंबंधेनैव भावत्वावच्छिन्न[कार]णतावच्छेदको यो धर्मस्तद्वत्त्वस्यैव प्रतिबंधकपदार्थत्वात् ॥ तद्भावावच्छिन्नकार्यता ॥
भावत्वावच्छिन्नकारणता निरूपितस्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नावच्छेदकताकधर्मवत्त्वस्य तद्भावावच्छिन्नप्रतिबंधकत्वरूपत्वात् ॥ तिनिवृत्तेः● ५=

कारणविरोधात् । नु

सिद्धेरसंभवात् उपजीव्यविरोधाच्च ॥ तथाहि ॥ आशुविनाशिनः कालान्तरभाविफलं प्रति कारणत्वं व्यापारं विना नुपपन्न
मित्यनुपपत्तिज्ञानात् चिरध्वस्तानुभवस्य कालान्तरीयस्मृतिहेतुत्वोपपत्त्यर्थं व्यापारे कल्पनीये संस्कार एव व्यापारः कल्प्य
३=गतिसैव३ल१ त इति ॥ ननु अनुभवस्य कारणत्वे उपजीव्ये संस्कारसिद्धिरिति ॥ ननु तर्हि क्लृप्तत्वादनुभवध्वंसस्य व्यापारत्वमास्तां क्लृप्त तत्र क्लृप्तसंस्कारकल्पने
ना ॥ न च कारिणीभूताभावप्रतियोगित्वरूपप्रतिबंधकपदार्थत्वात् स्मृतिकारिणीभूतानुभवध्वंसप्रतियोगित्वस्यानुभवे सत्त्वात् प्रति त्वा४
स्यैप बंधकत्वापत्त्या न तस्य हेतुत्वमिति वाच्यं ॥ प्रतिबंधकसंसर्गाभावत्वेनैव कार्यमात्रे हेतुतया संसर्गाभावत्वावच्छिन्नकारणताया एव प्र
तिबंधकशरीरघटकत्वात् ॥ तथा चानुभवध्वंसस्य ध्वंसत्वेन कारणत्वाभावत्वेन कारणत्वान्न प्रतिबंधकत्वापत्तिरिति चेन्न
हि सर्वांशोपेक्षस्मृतिकज्ञानादपि स्मरणापत्तेः ॥ अस्मन्मते चोपेक्षात्मकज्ञानत्वेन संस्कारहेतुतया तदभावादेव न स्मरणम् ॥ न च स्मर
णा८ णं प्रत्येकत्वेन रूपेण हेतुत्वमसिद्धं किं तु अनंतरोद्बुद्धसंस्कारत्वेनैव ॥ उपेक्षात्मकस्यैकस्यापि नैव तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिता
कात्यन्ताभावस्यैव निवेशनीयतया स्मृतिजनकतायां सर्वांशोपेक्षाभेद आंशिकोपेक्षाभेदानामेकं च निवेशे असंगतेः परस्परं विशेष्य
णविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानंत्यप्रसंगात् ॥ मन्मते च संस्कारजनकतावच्छेदककोटौ सर्वांशोपेक्षाभे भेदानां आंशिकोपे
रूपा७ दानां च स्मृतिजनकतावच्छेदककोटौ निवेशेन एकत्र तेषामनिवेशात् लाघवमखंडितमेवेति संस्कारसिद्धेरावश्यकत्वादिति तत्तं प्र क्षा८
सूचितेन ॥ ननु प्रमेयवान्निरस्तानुभवे अयमयमेव रूपेण चैत्र चाविशिष्टस्यापि पूर्वमनुभूतत्वाद् दृष्टविशेषस्य च प्रमेयत्वां
शे उद्बोधकत्वकल्पनेन केवलं चैत्रत्वविशिष्टस्मरणोपपत्तिः ॥ तदंशे अन्याप्रकारकस्मृतिं प्रतितदंशे अन्याप्रकारकत्वेन तत्तदनु
नुभवस्य हेतुत्वं ज्ञातिमानिस अनुभवोत्तरं घट इति स्मरणापत्तेश्चैत्रत्वांशे उद्बोधकत्वाभावस्य कल्पनेनैव वारणात् उद्बोधकत्वा
[illegible]त्वांशयोः फलान्तरत्वादिति ॥ अनेनैव दिशा अदृष्टदर्शनस्यादिसत्तमःपदोदितात्किन्त्वहपीत्सद्धतमाह ॥ किंचेति ॥ न स्मर
णमिति ॥ उद्बोधविरहादिति शेषः ॥ विशिष्टज्ञानसामग्र्यभावात् ॥ घटत्वज्ञाने रूपघटत्वज्ञानप्रकारकज्ञानसा
मग्र्यभावात् ॥ साक्षात्कारसामग्रीतः चक्षुःसंयोगचक्षुःसंयुक्तसमवायरूपचाक्षुषजनकसामग्रीतः ॥ साक्षात्का
कार

=द्वारघपदं प्रमेयवच्चत्तं॥

(32)

तर्क॰ग्र॰२६ वि ३ कं२ ग्रसह २६

रोत्पत्तौ चाक्षुषप्रत्यक्षोत्पत्तौ ॥ नन्वेतावता साक्षात्कारोत्पत्तावपि न निर्विकल्पकसिद्धिरित्यत आह ॥ न चेति ॥ घट ट
त्वज्ञानशून्यकाले जायमानं प्रत्यक्षमेवेत्यर्थः ॥ अस्मान्नैयायिकानां ॥ निर्विकल्पकमिति ॥ तथा च घटत्वज्ञानाभावे ट२
जायमानं घटत्वज्ञानं निष्प्रकारकं स्यादिति सिद्धं निर्विकल्पकज्ञाने निश्चयः ॥ ननु रक्तो दंडो न वेति संशये रक्तत्वविशि
४=विषय कं=५ ष्टदंडवैशिष्ट्यावगाहिज्ञानानुदयात् विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन
हेतुतया आवश्यकत्वात् तत एव दंडज्ञानशून्यकाले दंडविशिष्टपुरुषज्ञानानुत्पत्तिनिर्वाहः ॥ अतो विशिष्टबु
य९ ण६ द्धिं प्रति विशेषणज्ञानस्य हेतुतया ॥ न च विशिष्टवैशिष्ट्यमिति न्यायेन विषयतारीत्या बुद्धित्रयेऽपि विशेषणताव विशिष्ट ६
च्छेदकप्रकारकनिर्णयस्य हेतुत्वेन दंडज्ञानशून्यकाले विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेन द
व॰ ना॰ ण्डविशिष्टज्ञानापत्तिवारणाय तद्धेतुत्वमावश्यकमिति वाच्यं तथापि तद्धेतोरवैतन्यायेन विशेषणविशेष्ययोः स
न्निकर्षादेव विशिष्टप्रत्यक्षोपपत्तेः ॥ अनुमित्यादौ तु परामर्शादिरेव नियामक इत्याशयेन मीमांसकशंकते ॥
नन्विति ॥ हेतुत्वासिद्धौ विशिष्टज्ञानं प्रति हेतुत्वासिद्धौ सर्वमेतन्निर्विकल्पकादिसाधनं ॥ एवं स्यात् पूर्वोक्तन्याय
ण५ नस्य युक्तिकं स्यात् ॥ तत्रैव चेति ॥ विशेषणज्ञानस्य विशिष्टज्ञानस्य हेतुत्व एवेत्यर्थः ॥ मानमिति ॥ विशेषणविशेष्यो
र्द्वयसन्निकर्षादेव तदुपपत्तेस्तत्र प्रमाणाभावादित्यर्थः ॥ प्रमाणाभावस्याप्रमेयत्वव्याप्यत्वादिति भावः ॥
ण३ अन्वयव्यतिरेकाभ्यामिति ॥ विशेषणज्ञानसत्त्वे विशिष्टज्ञानं विशेषणज्ञानाभावे विशिष्टज्ञानाभाव इत्येवं
रूपान्वयव्यतिरेकाभ्यामित्यर्थः ॥ तदवधारणात् ॥ विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वावधारणा
त् ॥ यथा अन्वयव्यतिरेकाभ्यां दंडे कारणत्वग्रहस्तथा अत्रापीति भावः ॥ ननु न केवलान्वयव्यतिरेका

83

केवकारणतायां हकौ प्रतिबन्धे संगात् ॥ अपि त्वनन्यथासिद्धान्वयव्यतिरेकाभ्यां वा ॥ प्रकृते च विशेषणविशेष्येन्द्रियसन्निकर्षेण
विशेषणज्ञानस्यान्यथासिद्धत्वान्न तथाविधयोस्तयोः संभवइत्यत आह ॥ विस्तरस्त्विति ॥ अनुसंधेयस्तत्र कदाचिद् घट
इतिस्वरूपतो घटत्वप्रकारकज्ञानस्य कदाचिच्च जातिमान् इति जातित्वरूपेण घटत्वप्रकार[illegible]कज्ञानस्योत्पत्तिरि ८३
तिनियमाभिवाद्धाय स्वरूपतो घटत्व[illegible]विशिष्टबुद्धिं प्रति स्वरूपतो घटत्वज्ञानत्वेन जातित्वेन घटत्वविशिष्ट
बुद्धिं प्रति च जातित्वेन घटत्वज्ञानस्य हेतुताया आवश्यकतया विशेषणज्ञानस्य हेतुतायां सिद्धिः ॥ अथ घटत्वज्ञान
सत्त्वेपि कदाचिदयं घट इत्याकारकघटत्वप्रकारकज्ञानस्य कदाचिच्च अत्र घटत्वमित्याकारकघटत्ववि
शेष्यकज्ञानस्योत्पत्त्या तन्नियमनाय स्यात् तत्र ज्ञाने अदृष्टविशेषस्यैव नियामकत्वकल्पनमावश्यकं तथा
च प्रकृतेपि अदृष्टविशेषेणैव तथाविधप्रकाराचित्कज्ञानद्वयोपपत्तेर्न विशेषणज्ञानहेतुतेति चेन्न ॥ एवं ॥
तत्र गत्यन्तराभावेनादृष्टस्य नियामकत्वकल्पनेपि प्रकृते दर्शितरीत्या गतिसत्त्वे ऽदृष्टविशेषस्य नियामक
त्वकल्पनायामन्याय्यत्वात् एवं चादृष्टस्य नियामक[illegible]त्वकल्पना[illegible]त् अन्यत्रापि तस्यैव नियामक[illegible]
त्वकल्पने कार्यकारणभावमात्रोच्छेदापत्तेरिति ननु तथापि स्वरूपतो[illegible] घटत्वविशिष्टबुद्धित्वं नाम च
टत्वांशे ऽन्याप्रकारकघटत्वप्रकारकबुद्धित्वं तत्र च जातित्वादिभासकसामग्रीसत्त्वे जायमानं ज्ञानं घटत्वांशे
न्यप्रकारकमेवोत्पद्यते तदंशे जातित्वादिभासकसामग्र्यसत्त्वे च घटत्वांशे ऽन्याप्रकारकमेव जायत इति
तादृशधर्मस्य नीलेतरघटत्वादिवत् अर्थसमाजग्रस्तत्वेन जन्यतानवच्छेदकत्वात्कथं तादृशज्ञानं प्रति स्व

तर्क॰प्र॰२८ ट तं॰ नौ न्याय॰ २८

रूपतो घटत्वज्ञानस्य हेतुत्वं कल्प्यमिति त्वा विशेषणज्ञानस्य हेतुत्वासिद्धिरिति चेत्। जातित्वस्य सकलसामग्रीसत्वेपि जाति
मान् घट इतिवत् ततो घटत्वविशिष्टबुद्ध्युदयाद्घटत्वांशे निरवच्छिन्नप्रकारकं तादृशविशिष्टज्ञानत्वमेवस्व
रूपतो घटत्वविशिष्टबुद्धित्वं तदवच्छिन्नं प्रति च स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पनं विनापि निवारणा
यत्संवादादिति। ननु निर्व्यापकत्वेनाप्यजन्यविशिष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावच्छेदकं वाच्यं। न च तज्ज
न्यत्वं च सजातीयोगित्वं वा प्रागभावप्रतियोगित्वं वा कालिकादिसंबंधेन घटादिमत्वं वेत्यविनिगमनाविर त्र५
ता॰ ६ हादिति चेत्। नैनित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वसंभवतिविरहात्॥ अथैवं कारणाऽनुपपत्तिः कारणत्वं ता
दिकार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणदेशनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदधर्मवत्वं तत्र घटा
धिकरणकपाले यत्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन दण्डाभावस्य सत्वात् कारणत्वानुपपत्तिरिति तत्का
क्षणा र्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वं वाच्यं। तथा सति
घटत्वावच्छिन्नं प्रति रासभत्वेनापि कारणत्वप्रसंगः। यत्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन कपालेत
स्य सत्वात्। तथा च कार्यतावच्छेदकावच्छिन्नयावद्धर्मिसत्तत्तद्धर्मिकत्वेन घटात्तत्तत्कार्याव्यवहितपूर्वक्ष
णावच्छेदेन तत्तत्कार्याधिकरणवृत्त्यभावत्वेन वाच्यं। एवं च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे कार्यत्वाव सण२
च्छेदावच्छिन्नयावद्धर्मिनित्यव्यक्तेरपि प्रविष्टतया तदव्यवहितपूर्वक्षणाप्रसिद्धेरिति चेन्न। कार्यकार
णभेदेन कारणतायां भिन्नतया प्रकृते नित्यव्यक्त्यतिरिक्तानामेव तत्तद्धर्मिकत्वेनोपादानान्नासाधारण।

पं३

35

रूपेणकार्यत्वेपिकारणत्वेबाधकाभावात्॥एवंसमवायकालिकविशेषणतोभयसंबंधेनविशिष्टज्ञानत्व
कार्यतावच्छेदकत्वेननित्यसाधारण्याभावाच्च॥वस्तुतस्तुजन्यप्रत्यक्षमात्रवृत्तिवैजात्यंस्वीकृत्यविजातीय
विशिष्टज्ञानत्वस्यैवतत्कार्यतावच्छेदकत्वात्प्रत्यक्षत्वादिनासंकरभियाचनिर्विकल्पकेपितद्वैजात्यस्वीका
रः॥अतएवजन्यधीजन्यमात्रवृत्तिएतादृशवैजात्यमजन्यत्वाभावाज्जन्यसाक्षात्कारेजागृत्कसोसाक्षात्का
रलक्षणस्याव्याप्तिरितिनिरस्तंतस्यनिर्विकल्पवृत्तिसाधारण्येनजन्यधीजन्यमात्रवृत्तित्वाभावात्॥
मानसावृत्तित्वाभावाच्च॥तल्लक्षणेनुमानसाधारण्यवृत्तित्वेनजातेर्विशेषस्वीयत्वादिप्रयुक्तत्वादितिदिक्॥नि
र्विकल्पकंनिरूप्यक्रमप्राप्तंसविकल्पकंनिरूपयति॥वैशिष्ट्यावगाहीति॥संबंधविषयकमित्यर्थः॥
ॐर नन्विन्द्रियसंबंधविशेषणतारूपकारणबलान्निर्विकल्पकेपिसंबंधभानेबाधकाभावात्स्यादपिवैशि
ष्ट्यावगाहित्वमस्तीत्यतिव्याप्तिरित्यरुचेरसादाह॥सप्रकारकंवेति॥किंचिन्निष्ठप्रकारताशालीत्यर्थः॥
निर्विकल्पकेचप्रकारतयाघटत्वादेर्भानान्नतत्रातिव्याप्तिरितिभावः॥वस्तुतस्तुवैशिष्ट्यावगाहीत्यस्य
संसर्गमर्यादयावैशिष्ट्यावगाहीत्यर्थः॥किंचिन्निष्ठसांसर्गिकविषयताशालित्वमितिपर्यवसितोर्थः॥ननु
किंचिन्निष्ठप्रकारताशालित्वमित्यपिवक्तुंशक्यतएवेतिकुतोनोक्तमित्यतस्तत्स्वरूपमात्रथेवाह॥सप्र
कारकमिति॥इदमुपलक्षणं॥किंचिन्निष्ठविशेष्यताशालित्वमपितत्त्वमित्यपिबोध्यं॥ननुसप्रका
रकमित्यत्रप्रकारकत्वनिवेशात्तत्प्रकार[illegible]त्वमित्यत्रतन्निरूपयति॥प्रकारतामिति॥ज्ञानेतिनिरूपितं
दे१ नत्वमित्यर्थः॥घटत्वादिरितिनिष्ठत्वंचषष्ठ्यर्थः॥ज्ञाननिरूपिताघटत्वनिष्ठविषयताविशेषपदस्यार्थः॥विषयता॥

विषयताविशेषइति। विशेष्यताख्यविषयताप्रकारताख्यविषयतासांसर्गिकविषयतारूपत्रिविधविषयताभेदइ
त्यर्थः। ननु किं तद्विषयत्वमतआह। विषयत्वञ्चेति विषयेति। घटोज्ञानविषयः पटोज्ञानविषयइत्येवंगत उ२
प्रतीतिसाक्षिकइत्यर्थः। स्वरूपसंबंधविशेषइति। ज्ञानविषयरूपस्वरूपसंबंधइत्यर्थः। ननु विषयतायाः स्व ष३
ज्ञा४ रूपसंबंधत्वांगीकारेप्राचीनमतेतस्यानस्वरूपत्वं विषयस्वरूपत्वंवा। नताबदाद्यः। ज्ञानरूपत्वेघ
टभूतलवृत्तिविषयतयोरैक्येन घटवद्भूतलमिति ज्ञानोत्तरं घटनिष्ठप्रकारतानिरूपित[illegible]भूतलनि
ष्ठविशेष्यताशालिज्ञानवानहमित्याद्यनुव्यवसायवद्भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्य
ताशालिज्ञानवानहमित्यनुव्यवसायापत्तेः। घटपटाविति समूहालंबनज्ञानस्य भ्रमत्वापत्तेश्च। ज्ञा
अ० नस्यैक्येन तस्य घटपटादिविषयतायामपि भेदेन घटत्वाभाववन्निष्ठविशेष्यतानिरूपितघटत्वनि वै८
ष्ठप्रकारताशालिज्ञानत्वरूपभ्रमत्वस्यतत्रसत्वात्। नद्वितीयः। घटस्यभूतलसंयोगाद्घटवद्भूतलमितिस
मूहालंबनविशिष्टबुद्ध्योः विषयाणामैक्येनविषयस्वरूपत्ववैलक्षण्याभावाद्विषयताकृतमेववैल
प्र४ क्षण्यंवाच्यं। नच विषयताया विषयस्वरूपत्वेतत्स्वरूपाणां तासामपि वैलक्षण्याभावात्समूहालंबनवि
शिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिर्जागरूकेव। नचसमूहालंबनविषयस्यघटप्रतियोगिकत्वं भूतला
नुयोगिकत्वरूपसंबंधसंबंधस्यापि विशिष्टबुद्धिविषयत्वान्नवैलक्षण्यापत्तिरितिवाच्यं। घटप्र नुप
तलसंयोगप्रतियोगिकत्वानुयोगिकत्वानीतिसंबंधसंबंधविषयस्यापि समूहालंबनस्य संभवात्। नच

न्यै४ रू७

मेकु ५

समूहालंबने संयोगत्वेन संयोगभा[illegible]नान्नानुपपत्तिरिति वाच्यं ॥ घटवद्भूतलं संयोगश्चेति विशिष्टज्ञानस्य तादृशसमूहालंबना
द्वैलक्षण्यानुपपत्तेरिति तस्याः स्वरूपसंबंधरूपत्वं दुर्वचमित्यत आह ॥ पदार्थांतरमिं ॥ तथा चातिरिक्ताया विषयताया विषयभेदेन भि तिर
ष्य३ न्नतया नपूर्वोक्तानुपपत्तिरिति भावः ॥ केचित्तु स्वरूपसंबंधरूपाया विषयताया अननुगमेनानुगतप्रत्ययानुपपत्तिरित्यत आ
ति ह ॥ पदार्थांतरमितीत्याहुः ॥ तदसत् ॥ अतिरिक्तायाअपि तस्याः विषयभेदेन भिन्नतया अनुगतप्रत्ययानुपपत्तेस्ताद[illegible]त् ॥ न चानु स्थ्या ४
शि५ गतत्रसयानुपपत्तिः कथं वारणीयेति वाच्यं ॥ विषयतात्वमंगीकृत्या वैशिष्ट्य तरवघटत्वविशिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन
हेतुताया विषयतायाः प्रकारताविशेष्यत्वादिभेदेन भिन्नतया एकस्यानिवेशे अन्यविधविषयताया तादृशत्वि ज्ञानादिशिष्ट
र२ बुद्ध्यनुत्पत्त्यापत्तिरपि [illegible]निरस्ता ॥ तत्र विषयतायेन प्रकारताविशेष्यतयोरननुगमेनानुपपत्त्यभावादित्यास्तां विस्तरः ॥ घ
टं जानातीत्यादौ ज्ञानजन्यं घटनिष्ठं ज्ञाततारूपं पदार्थांतरमंगीकार्यं ॥ अन्यथा घटस्य कर्मत्वानुपपत्तेः क्रियाजन्यफल
शालित्वस्यैव कर्मत्वरूपत्वात् तत्र ज्ञाने निमित्तकारणसमवायिकारणं [illegible] च घटः तदेव च विषयत्वमिति निष्कृष्टमह
नद मंमाद्रियति ॥ भट्टस्त्विति ॥ ज्ञानजन्यः निमित्तकारणविधया ज्ञानजन्यः विषयनिष्ठ इति ॥ समवायेन विष
यवृत्तिरित्यर्थः ॥ सैवेयं ज्ञाततेतं च संबंधस्वरूपेति ॥ अतिरिक्तसंबंधस्वरूपेत्यर्थः ॥ कुत्र ॥ समुक्तिके ॥
प४ एतत्र ॥ ज्ञानजन्यविषयनिष्ठज्ञाततारूपदार्थांतरांगीकरणे ॥ जन्यथेति ॥ ज्ञानजन्यविषयनिष्ठ ज्ञात
का३ तारूपपदार्थानंगीकार इत्यर्थः ॥ ज्ञानं कर्मत्वमिति ॥ घटं जानातीत्यादौ घटादेः क्रियाजन्यफलशालि
घट त्वं पंकर्मत्वमित्यर्थः ॥ क्रियेति ॥ ज्ञानरूपधात्वर्थजन्यफलवत्त्वा [illegible] भावादित्यर्थः ॥ विन
ष्ट इति ॥ घटस्य नष्टत्वेन तत्र ज्ञानजन्य ज्ञाततायाअसंभवादिति भावः ॥ तदेवो २९

३१ पपादयति।नहीति।तौचिनष्टघटे।नष्टस्यैव।।घटस्यैव।।असत्वात्।।नष्टत्वात्।ननु यथा मनस्त्वानष्टेघटेपि विषयतासं
बंधेन ज्ञानमुत्पाद्यते तथा ज्ञानेनापि तत्र तदुत्पादने बाधकाभाव इत्यत आह।।नचेति।।समवायीकारणत्यकार्य
सहभावेन हेतुत्वाद् घटनाशे न तदुत्पत्तिसंभवः।अन्यथासमवायीकारणनाशस्य समवेतनाशे हेतुत्वात् ज्ञात
तोस्येति द्वितीयक्षण एव तस्यानाशापत्त्या क्षणिकत्वप्रसंगादिति भावः।।ननु तत्र विषयतायाः ज्ञाततारूपत्वाभाव
पि स्वरूपसंबंधरूपत्वमेवास्त्वित्याशंकते।तवेत्यादिना।।तत्र।नष्टघटस्थले।अतीतेः ज्ञातोघट इति प्रतीतेः।। १
अन्यत्रापि।विद्यमानघटस्थलेपीत्यर्थः।स एवास्त्विति।स्वरूपसंबंधविशेषयोरस्त्वित्यर्थः।अधिकेनेति।।स्वरूप
संबंधातिरिक्तज्ञाततारूपविषयत्वस्वीकारेणेत्यर्थः।ननु सर्वत्र स्वरूपसंबंधस्य विषयत्वरूपत्वे तस्य ज्ञानजन्य
त्वाभावात् घटस्य क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेन कर्मणि द्वितीयेति सूत्रेण घटं जानातीत्या
८७ तौ८ दौ घटपदोत्तरं द्वितीयाविभक्त्यनुपपत्तिरित्यत आह।कर्मेति।कर्तेरपीति।द्वितीयापि सत्करपीत्यर्थः।तद्वदेव।।न
ष्टघटस्थलवदेव।तथा च त्वया नष्टघटस्थले घटपदोत्तरं द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्व विधि
ष्टपरत्वं कर्मणि द्वितीयेति सूत्रस्य कर्मपदस्यावश्यमंगीकार्यं।।ममापि चैवं तेनैव विद्यमानघटस्थलेपि घटपदो
नि४ त्तरं द्वितीयोपपत्तिरिति भावः।।एवं च क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेपि ज्ञानविषयवाचकधातुसमभि
व्याहारस्थले विषयत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरिति निष्कर्षः।।नैतन्मते।अभावोत्पाद इति प्रतीत्याऽभावेपि नु३
सादितायाः अवश्यमंगीकारे समवायीकारणं विना भावकार्योत्पत्त्यसंभव इति न नियमस्तथा च नष्टघटस्थलेपि ना
नुपपत्तिरित्यत आह।संक्षेपरति।समवायस्यातिरिक्तस्येतरनंगीकारात् विलक्षणस्वरूपसंबंधेन स्वात्म

(३१)

ण। यत्वमेव समवायीकारणत्वं एवं चाविलक्षणसंबंधेन स्वाश्रयं विनाशस्यानुत्पत्तिरित्येव नियमः॥ अभावस्यत्वे च विलक्षण
संबंधेन स्वाश्रयत्वम् तावस्यांगी॥ अस्तु ते विलक्षणसंबंधेन स्वाश्रये घटध्वंसस्यापि चाक्षुषत्वस्य केनुपपत्तिं जागरु
कैवेति भावः॥ स्वमते तावच्चक्षुःसंयुक्तविशेषणत्वमित्यपि केचित्॥ वस्तुतस्तु गौणाकमतेनापुपपत्तिरिति दितु ज्ञाततायाः प्रमाणा
बा४ नाप्नि तदुपलब्धिविषयतायाः इत्येव दूषणं सारं॥ प्रकारतानिविषयताविशेषः किं तु प्रतियोगित्वमेवेत्यङ्गीकर्तृणां केषां ४.
मतमाह॥ अन्ये त्वित्यादिना॥ भासमानवैशिष्ट्यसंबंध स्तत्प्रकारतानियोगित्वमित्यर्थः॥ पुरुषदृष्टिज्ञाने पि दंडस्य प्र दं उः ५
कारत्वापत्तिः संयोगप्रतियोगित्वस्य दंडे सत्वादतो भासमानेति॥ तत् ज्ञाने दंडप्रतियोगिकसंयोगस्याभानान्ना च ६
ति व्याप्तिः प्रतियोगित्वं च स्वरूपसंबंधविशेष एवेदमेव संगमयति॥ अपमिति॥ घटत्वस्य वैशिष्ट्यं घटनिरू
पितः समवायः संयोगे ही वस्तुगत्या भासमानो यः संयोगः तत्प्रतियोगित्वस्य दंडे सत्वात् प्रकारतापत्तिरित्यर्थः॥ ननु
तत्प्रतियोगिकत्वेन भासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वमित्यर्थः॥ समूहालंबनविशिष्टबुद्ध्योरविशेषदानुपपत्त्या विशि
ष्टज्ञाने प्रतियोगिकत्वानुयोगिकत्वरूपसंबंधसंबंधोभिलाप तद्बोधोपेयते समूहालंबने दंडप्रतियोगिकत्वेन पो ५
संयोगस्याभानान्नातिव्याप्तिरित्यत आह॥ दीधितौ॥ तथापि दंडपुरुषदंडप्रतियोगिकसंयोगः इति समूहालंबनेति
ध ४ व्याप्तिः॥ नच्चात्र दंडप्रतियोगिकत्वस्य संबंधसंबंधविधया न भासमानत्वमिति वाच्यं॥ तथा सति संसर्गविषयतायाः अति
कत्वाभ्युपगमे क्षमपराध्दं प्रकारतया संबंधसंबंधस्य विशिष्टज्ञानविषयत्वे गौरवं॥ विषयकृतवैलक्षण्याभाव
पि विषयताकृतवैलक्षण्येनैव ज्ञानानां वैलक्षण्योपपत्तिरित्याद्यूह्यं॥ तद्धर्मितासंसर्गताकारिरूपप्रमाकरणं नेत्यर्थः॥
तृतीयानुव्यवसायरूपप्रमाकरणत्वस्य व्यवसाये पि सत्वात् हानोपादानोपेक्षादिप्रमाकरणत्वस्य निर्विकल्पके

40

सत्वान्निर्विकल्पादिरूपप्रमाकरणत्वस्य चक्षुरादिसंयोगेसत्वस्यबद्धविरोधत्वमितिमतनिराकरणायाहा॥इंद्रियात्मकमि ग॥ २
ति॥चक्षुरादिकमेवगत्य क्षंप्रमाणं॥अन्येषांतुव्यापारत्वमितिभावः॥किंतु तस्यप्रत्यक्षप्रमात्वमनिराकरणायेंद्रियेतिप्र
व्ययाहृत्कत्वंद्रव्यविषयक लौकिकसाक्षात्कारजनकतावच्छेदकधर्मवत्वं॥तेनोपनीतभानमादायनरसनेंद्रियादा
=फलाजनक ३ वतिप्रसंगः॥अनुपधायकस्य चक्षुःसंग्रहायजनकतावच्छेदकधर्मवत्वविशेषः॥तदाह कंचद्रव्यग्राहकं चेत्यर्थः॥
द्रव्यग्राहकत्वंचद्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मशून्यत्वं तेनानुपधायकस्य चक्षुषोविना
तिव्याप्तेःप्रसंगः॥तथापिच क्षुःसस्यसत्वादिति॥अन्यत्॥द्रव्यग्राहकेति॥नन्वेवंघटस्यघटसन्निकर्षेस्पार्शनं २६
जायतएवेत्यतआह॥विजकस्येति दूरवर्तीत्यर्थः॥तन्मनः॥आत्ममात्रग्राहकमिति॥तथाचमनसःआत्मभिन्ना
ग्राहकत्वान्नतेनघटादिग्रहापत्तिरितिभावः॥सर्वेति॥मनःसर्वविषयकज्ञानजनकमितिसिद्धांतभंगप्रसंगादित्यर्थः॥
सर्वविषयकमपि सर्वविषयकज्ञानजनकमपि॥तथाचनतादृशसिद्धांतभंगइतिभावः॥परंत्वमिति॥स्वेतरब
क॰६ हिर्विषयेज्ञानजनकसामग्रीसापेक्षमित्यर्थः॥तथाचांधस्यविप्रकृष्टघटादीनांमनसानग्रहापत्तिः॥तत्सहका ५८
५ वा रिचक्षुरादेरभावादितिभावः॥किंतत्परमतमत आह॥परीमिति॥मीमांसकैर्ज्ञानलक्षणासामान्यलक्षणायोगजा
धर्माद्यस्वीकारान्मनसश्चक्षुरादींद्रियमात्रसहकारित्वमेवापेक्षणीयं॥अतएवात्मामनसासंयुज्यतेमनइं
द्रियेणइंद्रियमर्थेनइंद्रियाणांवस्तुप्राप्यप्रकाशकारित्वनियमादितिसंगच्छतेइतितन्मतंनिराकर्तुमाह॥नपु
नरिति॥चक्षुरादिमात्रमिति॥चक्षुरादिकमेवपरीमितिनपुनरित्यन्वयः॥मात्रपदेनज्ञानलक्षणादिव्यव
चे१ च्छेदः॥तथाचचक्षुरादिव्यापारंविनापिज्ञानलक्षणादिसहकारेण मनसाज्ञानजननेमानाभावइत्यत आह॥कोपि
५ कथंचिन्मनसाज्ञानजननमतोपायमपिसहकारित्वमावश्यकमुपदर्शितंनियमस्तुलौकिकप्रत्यक्षस्थलएवेतिभावः॥ननुज्ञानल
क्षणासहकारेण

=पदपदार्थसंसर्गो हि वाक्यार्थः।३

स्मृतोतिसंसर्गेति। परस्परसंसर्गयदादित्यर्थः। परस्परसंसर्गोंऽपि हे काक्षीतिरत्राह। कथमन्यथेति। अन्यथा ज्ञान
लक्षणासहकारेण मनसाऽनुभूतपदार्थानां परस्परसंसर्गस्य ह इत्यर्थः। कविकाव्यादिति। कविनूतननिर्मितविषयी
भूतपदार्थानां परस्परसंसर्गो ह्येककाव्ये विरच्यते तेनान्यथा काव्यप्रयोगे काव्यप्रयोगो वा कृत्यार्थज्ञानस्य हेतुत्वा
न४ न तथा च दर्शीकारसंसर्गयदा भावेन काव्यरचनोच्छेदप्रसङ्गः इतित्स्वीकारस्यावश्यकत्वमिति भावः। दृष्टमुपल
क्षणं। लौकिकसन्निकर्षं विनापि घटो नास्तीत्यादौ अभावांशे घटस्य ज्ञानात्। एवं सौरभे लौकिकसन्निकर्षं वि क५
नापि सुरभिचंदनमिति चाक्षुषोदयाच्चतत्स्वीकारस्यावश्यकत्वमिति ध्येयं। लौकिकान्यविषयताशालि
ज्ञानत्वलौकिकविच्छिन्नं प्रति किंचिद्विषयत्वावच्छिन्नतन्निष्ठविषयताशालिज्ञानत्वेन हेतुतेति कार्यकारणभावे बो
ध्यः। कार्यतावच्छेदके लौकिकान्यत्वनिवेशान्मायामिकविशिष्टबुद्धौ लौकिकसन्निकर्षजन्यानां निर्विकल्पकेन
न व्यभिचारः। कारणतावच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशाच्च नो निर्विकल्पकोत्तरमुपनीतभाना
पत्तिः। निर्विकल्पकस्याप्युपनायकत्वांगीकारे तु तद्विषयताशालिज्ञानत्वेन हेतुतेति बोध्यं। सामान्यलक्ष
णाजन्ये ज्ञाने व्यभिचारवारणाय अव्यवहितोत्तरत्वसंबंधेन कारणत्वं विशेष्यं निवेश्यं वा। न नु तद्वृत्तिधर्मप्रका
रकज्ञानजन्यत्वनिवेशेन तद्वृत्तिघटत्वद्रव्यत्वादिरूपनानाधर्मप्रकारकज्ञाननिरूपितजन्यतानामननुगमकत्व
पाद्भावादिति। इत्थं च कार्यतावच्छेदके लौकिकान्यत्वानिवेशेऽपि न क्षतिरिति ध्येयं। योगजन्यधर्मसामान्यलक्ष
णाप्रत्यासत्तिस्वीकारेऽनुभवमेव प्रमाणयति। योगिनामित्यादिना। योगिनां योगजधर्मसहकारेण मनसा
चक्षुरादिव्यापारं विनापि सर्वविषयकालौकिकसाक्षात्कारोदयात्तस्य सहकारित्वमावश्यकमिति भावः।

(42)

तर्कप्र.२१

य
× मैत्रादिनेयैति। सर्वत्रप्रमेये चक्षुरादिव्यापारं विनापि नैँ प्रमेयत्वेन प्रमेयसामान्यविषयकलौकिकसाक्षात्कूँ प्रत्यक्ष २१
स्वतंत्रमिति॥ बहिर्विषयकज्ञानजनकसामग्र्यनपेक्षमित्यर्थः॥ अबाह्येति॥ अबाह्यविषयकज्ञानज
३२ ननेत्यर्थः॥ अबाह्यानि योग्यानीति शेषः॥ तद्योग्येति॥ आत्मयोग्यगुणा इत्यर्थः॥ तदभावः॥ योग्यगुणा
भावः॥ तद्वृत्तीति॥ आत्मतत्समवेतयोग्यगुणवृत्तिजातिश्चेत्यर्थः॥ सो चात्मत्वज्ञानत्वादिः॥
तदेकत्वेति॥ आत्मैकत्वपरममहत्परिमाणे चेत्यर्थः॥ द्रव्यासाक्षात्कारसामग्रीसत्वेन तत्संख्या
पा६ परिमाद्रिग्राहकसामग्र्याः अपि सत्वाद्द्रव्यसाक्षात्कारस्य संख्यापरिमाणविषयकत्वनियमेना
त्ममानसे तयोरपि भानसंभव इति भावः॥ न योग्येति॥ न लौकिक●मानससाक्षात्कारविष
यीभूत इत्यर्थः॥ अत्रैँ मनःसंयुक्तसमवायरूपकारणबलादज्ञानादीनामिव तयोरपि मा
नसे बाधकाभावः॥ न च यौतैँ सति संस्कारादीनामपि मानसापत्तिः॥ सामग्रीसत्वादिति
वाच्यं॥ तत्रानापत्या संस्कारस्य प्रातिस्विकरूपेण विजातीयगुणत्वेन वा प्रतिबंधकत्वक
ल्पनात्तद्वत्संख्यापरिमाणयोरपि प्रातिस्वीकरूपेण प्रतिबंधकत्वे प्रतिँ कतावच्छेदैँ वैजात्य बंध॰
स्वीकारे च गौरवात्तत्र यत्किंचिद्बाधक॥ न च ज्ञानादियोग्यगुणेष्वेव संस्कारव्यावृत्तं वैजा
त्यं स्वीकृत्य विजातीयगुणविषयकमानसं प्रति विजातीयगुणत्वेनापि हेतुत्वात्तादृशवैजा
त्यस्य तत्संख्यापरिमाणयोः स्वीकारगौरवात्तयोरप्ययोग्यमिति वाच्यं॥ मनःसंयुक्ते साम

ति२ त१

२ रोद्भवादेर्यत्तस्याश्चापि सहकारित्वमावश्यकमिति भावः॥

43

त्व

वायेन विजातीयगुणं विनापि आत्ममानसज्ञाननाद्विजातीयगुणस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीवि
लात्संस्कारप्रत्यक्षापत्तिवारणाय विजातीयगुणत्वेन हेतुताया आवश्यकत्वादात्मत्वमानसे आत्मत्वेनापि हे ते
मा२ तुत्वं कल्पयितव्यं सामग्र्याः फलैकजननीयं विजातीयगुणत्वात्मत्वयोरन्यतरस्य सहकारित्वकल्पनेन संस्का त२
रप्रत्यक्षापत्तिवारणे लौकिकगौरवात्तदपेक्षया विजातीयगुणत्वेन कारणताया एवौचित्यादिति तयोः प्रत्यक्ष
त्वस्वीकारपक्षोऽप्युचितस्तस्यैवैतत्स्पष्टीकरणाह तदेत्यनेनेन चिंतनं इत्यर्थमिति ॥ आत्मनः आत्मसमवेतगुणानां च
पो६ मनःसंयोग्यत्वमित्यर्थः । परमात्मनः पुरुषान्तरीयात्मनां तद्गुणानां । परात्मसमवेतगुणानामित्यर्थः । चकारेण गुणसमवेत
जात्यादीनां तदभावानां च संग्रहः ॥ समायत्तेनेति । परायोग्यत्वात् । पुरुषान्तरीयमनःसंयोगायोग्यत्वात् ॥ आत्म
त्वं मानसत्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेनात्मसमवेतमानसं प्रति विजातीयमनःसंयुक्तसमवा
यत्वेनात्मसमवेतसमवेतमानसत्वावच्छिन्नं प्रति विजातीयमनःसंयुक्तसमवेतसमवायत्वेन त्र्यादीनां का
र्यकारणभावकल्पनात्पुरुषान्तरीयात्मान्यदीयमनसोः संयोगस्य वैजात्यानभ्युपगमेन न तत्प्रत्यक्षापत्ति
रिति भावः ॥ गृह्णन्तीति । परमाण्वादिषु चक्षुःसंयोगसत्त्वादिति भावः । तेषां परमाण्वादीनां ॥ चक्षुस्या
ग्रहणादिति ॥ चक्षुर्जन्यलौकिकसाक्षात्कारायोग्यत्वादित्यर्थः । वक्ष्यमाणलौकिकचाक्षुषसामग्र्यसत्त्वादिति
भावः ॥ महदित्यादि ॥ द्रव्यवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषं प्रति समवायेन महत्त्वत्वेन एवं उ
तद्रूपत्वेन च हेतुत्वेत्यर्थः । परमाणोर्महत्त्वाभावात् ॥ आत्मनि रूपाभावात् पिशाचादेश्चोद्भूतरू
पवत्त्वाभावान्न तत्प्रत्यक्षमित्यखण्डार्थः । तदेवाह । परमाण्वित्यादि । तद्रूपस्य पिशाचादि

स्पर्शस्य॥ अनुद्भूतत्वात्॥ उद्भूतासिन्त्वात्॥ यद्यपि पि प्रभाचादिदेशादुरूस्य वायवीयत्वेन तत्र रूपात्तावात्तद्रूपस्यानुद्भूतत्वादिस्पर्शसं
गतं तु यापि पिशाचादिस्थले तन्निमित्तान्निमित्तकारणपार्थिवपरंपरकभागो बोध्यः॥ ननु अथवा विजातीयचक्षुःसं
योगत्वेनैव द्रव्यचाक्षुषं प्रतिहेतुत्वं परमाण्वादिचक्षुःसंयोगत्ववैजात्यानभ्युपगमान्न तत्प्रत्यक्षापत्तिरिति किं महदुद्भू
पृ४ तरूपादिहेतुतया॥ न च विजातीयचक्षुःसंयुक्तविशेषणतायाः स्यावचाक्षुषे हेतुतया वायावुद्भूतरूपाभावत्र त्वदी
तु रोधात्ते तत्र विजातीयचक्षुःसंयोगस्यावश्यकतया वायोश्चाक्षुषापत्तिरिति रूपे हेतुत्वमावश्यकमिति वाच्यं॥ स्प५
द्रव्यचाक्षुषजनकतावच्छेदकतया वैजात्यान्तरस्वीकारात्तस्य च तत्रानंगीकारात्॥ न चैतथापि विजातीयचक्षुःसंयोग
स्प७ स्य चाक्षुषेऽपि सत्वात् त्वाचाक्षुषापत्तिरित्युद्भूतरूपं हेतुत्वमावश्यकमिति वाच्यं॥ त्वगीतयोगिकसंयोगस्य स्वस्मि
न्नभावेन चक्षुषि चक्षुःजातीययोगिकसंयोगाभावादिति चेन्न॥ विजातीयक्रियायाः एव विजातीयसंयोगनियाम
कत्वेन यत्रैक एव चक्षुःक्रियया घटे परमाणौ च युगपत्संयोगस्तत्र परमाणावपि विजातीयसंयोगस्य दुर्वार
तया तत्प्रत्यक्षापत्तेर्वारणासंभवात्॥ न च तत्र तत्कुतरदेशस्यापि विजातीयसंयोगस्य नियामकत्वात् परमा
ण्वादिरूपोत्तरदेशस्य च तत्वान्नियामकत्वात् कल्पनेन न तत्र विजातीयसंयोग इति वाच्यं॥ अनंतोत्तरदेशानां
विजातीयसंयोगनियामकत्वकल्पनापेक्षया महदुद्भूतरूपादिहेतुतायाः स्वीचित्वादिति दिक्॥ एकेनैत
नेनास्पर्शस्सूचितः॥ स च उद्भूतत्वस्य जातित्वे नीलत्वादिना सांकर्यप्रसंगः॥ न च नीलत्वादिव्याप्यनानैवोद्भू
तत्वमिति वाच्यं॥ तथा सति चाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन कारणत्वानुपपत्तेः कारणतानुगमेनव्यभि
चारादिति॥ अनुद्भूतत्वेति॥ न च नीलत्वादिना सांकर्ये माप्येति वाच्यं॥ नीलत्वादिव्याप्यनानानुद्भूतस्यैव

पगमात्॥अनुद्भूतेति।स्वपकूटीविशिष्टरूपत्वेनचक्षुरयंसंप्रतिहेतुत्वेनव्यभिचारासावादिदितिभावः॥प्रसंगा
च्चक्षुर्योग्यगुणानाह।योग्यगुणा इत्यादिना।योग्यद्रव्यरूपमितीति।चक्षुर्योग्यद्रव्यवृत्तिरूपमित्यर्थः।तन्मात्रेति।
योग्यद्रव्यमात्रवृत्तीत्यर्थः।ननुतन्मात्रवृत्तित्वमात्रपदमनर्थकमतआह॥मात्रपदमिति॥घटाकाशसं
योगस्याकाशेपिवृत्तित्वान्नयोग्यद्रव्यमात्रवृत्तित्वमितिभावः॥ननुत्वाचप्रत्यक्षेत्वक्संयोगस्यहेतुत्वात्प
वायु ५ रमाणुद्व्यणुकादीनांस्पार्शनापत्तिरितित्वगिंद्रिययोग्यमेवद्रव्यंत्वचागृह्यतइत्येववाच्यं॥तत्रकिंयोग्यमिति
हृदिस्थशंकायामाह॥त्वचइति॥महदित्यादि।तथाचद्रव्यवृत्तिलौकिकविषयतासंबंधेनत्वाचप्रत्यक्षत्वावच्छिन्नं
त्व ७ प्रतिमहत्त्वेनोद्भूतस्पर्शत्वेनचहेतुत्वान्नतत्प्रत्यक्षापत्तिरितिभावः॥सामान्यतःबहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं
प्रत्युद्भूतरूपत्वेनहेतुत्वात्त्वाचप्रत्यक्षेपिरूपंहेतुः।तेननवायोःप्रत्यक्षमितिहृदयं॥यथाक्रमंपरमाण्वादिप्र
त्यक्षंवारयति।तेनेत्यादिना॥प्रभायामिति।नचप्रभायांतेजसोरूपमित्यनेनप्रभायांरूपत्वमेवनद्रव्यत्वमितिवा
च्यम्।तदन्यमतानुसारेणेत्युक्तत्वादिति॥प्रसंगात्त्वगिंद्रिययोग्यगुणानाह॥गुणाश्चेत्यादिना॥त्वचायो
ग्याइतिशेषः।चक्षुषायोग्यस्यरूपस्यापित्वचाग्रहणप्रसंगाद्रूपातिरिक्तमितिमहदुद्भूतस्पर्शवन्मात्रेति।त
न्मात्रवृत्तित्वंचवक्ष्यमाणवृत्तित्वेसतितद्वृत्तित्वं॥महदुद्भूतस्पर्शश्चेति।सामानाधिकरण्येनमहत्त्वविशिष्टोद्भू
तस्पर्शश्चेत्यर्थः॥ननुचक्षुषायोग्यादित्यव्यर्थमतआह॥अतएवेति॥अतएवचक्षुर्योग्यविशेषणा त्व २
देव।वायाविति।वायुपरिमाणस्यचक्षुरयोग्यत्वादितिभावः॥ननुउद्भूतस्पर्शवद्वृत्तेश्चक्षुर्योग्यगुणस्यवा

(48)

प्रसिद्धत्वान्तेनैव तत्प्रत्यक्षापत्तिवारणे कृतं महदित्यादिविशेषणेनेत्यत आह।। नवेति। तथा च प्रभापरिमाणस्य चक्षुर्यो-
ग्यत्वात्तस्यापि त्वाचप्रत्यक्षापत्तिरतस्तद्विशेषणमावश्यकमेवेति भावः।। न च चक्षुर्योग्यत्वविशेषणेनैव परमाणु
गुणवारणे त्र्यणुकस्य महदिति विशेषणवैयर्थ्यमिति वाच्यं। त्रुटिपरिमाणस्पार्शनवारणाय प्रकृष्टपरत्वयो।
तदुपादानस्यावश्यकत्वात्।। मा चपदव्या[illegible]वृत्तिमाह।। नवा घटेति। उद्भूतस्पर्शवन्मात्रावृत्तित्वादुद्भूतस्पर्शवदितर उत्पन्न तद
वृत्तित्वात्तथा च। नतदिति रावृत्तित्वरूपं तन्मात्रवृत्तित्वं तस्येति भावः।। अहि।। प्रभायांहि।। कर्म चेति।। च योग्यं सम-
वेतं कर्म च योग्यमित्यर्थः।। वायोरपि स्पार्शनप्रत्यक्षं वादिमीमांसमतं दर्शयति। मीमांसकास्त्वित्यादिना।। लाघवा-
त्वाचप्रत्यक्षे रूपस्य हेतुत्वाकल्पनेन लाघवात्।। महदिति।। महत्वविशिष्टोद्भूतरूपमित्यर्थः। तस्य जनकत्वा-
च्चप्रत्यक्षप्रयोजकं गौरवात्।। प्रभास्पार्शनवारणाय उद्भूतस्पर्शहेतुत्वावश्यकतया त्वाचप्रत्यक्षं प्रति रूपहेतुत्वे गौ-
रवात्।। अतएवेति। उद्भूतरूपस्य त्वाचप्रत्यक्षप्रयोजकत्वादित्यर्थः।। बहिरिंद्रियेति।। आत्मप्रत्यक्षे व्यभिचा-
रवारणाय बहिरिंद्रियजन्यत्वनिवेशः।। अतएव तन्नित्यसाधारण्यमपीति भावः।। तदभावादुद्भूतरूपा- त
भावात्।। नैवमिति।। न वायोः स्पार्शनप्रत्यक्षमित्यर्थः।। लाघवादिति।। बहिरिंद्रियजन्यद्रव्यसाक्षात्का-
रत्वापेक्षया द्रव्यचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वे लाघवादित्यर्थः।। अत्र मीमांसकानामयमाशयः।।
आत्मप्रत्यक्षे व्यभिचारवारणाय बहिरिंद्रियजन्यद्रव्यप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवादुद्भूत
रूपस्य कार्यतावच्छेदकं बहिर्द्रव्यप्रत्यक्षत्वं वाच्यं।। तत्र च बहिर्द्रव्यत्वं आत्मान्यत्वं वा मानसविषयो-
न्यत्वं वेति विनिगमनाविरहः।। अयमर्त्ते प्रत्यक्षत्वमेव तत्कार्यतावच्छेदकं स्पंदस्समवायिकारणता

अत एव जन्यत्वानिवेशादेव नानित्यसाधारण्यं नेश्वरसाधारण्यं=२

47

बच्छेदकत्वाच्च रूपत्वं जातिरिति चेत्तथापि त्रुट्याः स्पार्शनवारणायोद्भूतस्पर्शस्यैव स्पार्शनं प्रति हेतुत्वावश्यकतया
चाक्षुषत्वमेव रूपत्वजन्यतावच्छेदकं कल्प्यते ॥ ननु मन्मते स्वसमवायेत्यत्र संदेहे न तस्य संदिग्धव्यभिचारकत्वात् ॥ त
दुक्तं परित्यज्य चर्मनिश्चितव्यभिचारकं रूपं गृह्यमाणव्यभिचारकेण कार्यबकल्पनायां अयोगादिति तथा वायोः स्प
र्शनबाधकाभावः ॥ आधिकाकसमीरोयं मंदो विस्तृतोऽस्यादिप्रतीतिः ॥ नचोद्भूतस्पर्शेन वायोरनुमानान्नतावदत्र
तीत्यनुपपत्तिरिति वाच्यम् ॥ वाय्वादिप्रतीतेः स्थाने विनाप्यतादृशप्रतीतेरायमानत्वात् ॥ अन्यथा घटं स्पृशामीत्या
दिप्रतीतेरनुमानादिनैवोपपत्तौ घटादीनामपि स्पार्शनोच्छेदापत्तेरिति ॥ अत्राहुर्नैयायिकाः ॥ कारणाभावात्का
र्याभाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं तत्र मूर्त्तत्वविशिष्टत्वावच्छिन्नं प्रति उद्भूतरूपत्वे
अ कु नैव प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्येति विशेषाभावकूटस्य प्रयोजकत्वं वाच्य
मिति गौरवात् मन्मते चोद्भूतरूपाभावस्यैव लाघवं ॥ उद्भूतरूपत्वेनाकारणत्वे च तद्वच्छिन्नाभावस्य प्रयोजक
त्वासंभवात्तद्धेतुत्वमावश्यकमेव ॥ ननु तर्हि उद्भूतस्पर्शत्वेन हेतुत्वमादाय विनिगमनाविरहः ॥ त्वन्मते वायोरि
व मन्मतेपि त्रुट्याः प्रत्यक्षानंगीकारादिति चेन्न ॥ इह उपरिदेशे विहंगम इत्यत्र प्रभामंडलस्यैवोपरिदेशात् =विहंगमनिरूपितसंयोगः=४
पातस्य प्रत्यक्षानंगीकारे इह उपरिदेशे विहंगम इति प्रतीत्यनुपपत्तेः ॥ संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् ।
ग२ एवं संयोगविभागलिंगकं चंद्रतादौ गस्यानुमानं न स्यात् ॥ न च पूर्वोत्तरदेशयोः चंद्रादेरुपलंभानुपलंभाभ्यां सं
योगविभागयोरनुमानत्ताभ्यां गस्यानुमानमिति वाच्यम् ॥ अस्मामं उद्भूतरूपयोस्तयोः स्वमतेऽप्रत्यक्षत्वात् ॥ तस्मा
=पूर्वोत्तरदेशयोः=

रा२

अभावाद्वायुप्रत्यक्षत्वांगीकारावश्यकत्वादुद्भूतस्पर्शत्वेन कारणत्वासंभवः॥ नैमित्तिकस्य प्रत्यक्षत्वस्य नित्यसाधारण्यात्कथं ज
न्यतावच्छेदकत्वमिति वाच्यम्॥ समवायकालिकविशेषणतोभयसंबंधेन प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वात्॥ एवं री
त्या सिद्धकार्यकारणभावे वायोरूपाभावेन न तत्प्रत्यक्षमिति॥ वायुर्वा नीतिजातिरनुमानादिनैवोपपादनीया॥
घटादौ चोद्भूतरूपसत्त्वेन तत्प्रतीतेः प्रत्यक्षत्वमेव॥ ननु गगनघटसंयोगस्पार्शनवारणाय विजातीयसहस्पार्शनं
प्रतिसामानाधिकरण्यसंबंधेन स्पार्शनाभावस्य प्रतिबंधकत्वावश्यकतया वायोरस्पार्शने वायुस्पर्शस्पार्शनानुपपत्तिः॥
चतुरणुकस्पार्शनेऽव्याप्तिवारणाय स्वविजातीयत्वनिवेशः वैजात्यं च द्रव्यावृत्तिगुणकर्मसाधारणं तच्च प्रति
बध्यतावच्छेदककोटौ विजातीयसत्तास्पर्शान्यत्वनिवेशान्नानुपपत्तिरिति वाच्यम्॥ तथा सति विजातीयसत्त्वस्पर्शा
न्यत्वयो विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात्॥ एवं त्वक्संयुक्तसमवायरूपसामान्यसामग्र्या स्पार्शनेच्छा
वाभावरूपकारणं विनापि वायुस्पर्शस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवे न त्वक्संयुक्तसमवायरूपसा
मान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वात्॥ न च स्पर्शस्पार्शनं प्रति स्पर्शत्वेनापि हेतुत्वं कल्पयित्वा
सामान्यसामग्र्या द्रव्यसमवेतस्पार्शनत्वावच्छिन्नं जननीयं स्पार्शनाभावाभावं स्पर्शयोरन्यतरस्य सहकारित्वकल्प
नान्नानुपपत्तिरिति वाच्यम्॥ तथा सति जनिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन वा
योरप्रत्यक्षत्ववादिमते गौरवादिति वायुप्रत्यक्षत्वस्वीकारपक्षे नैरीति चेन्नैवं॥ तादृशप्रतिबंधकाभावं विनापि त्व
क्संयुक्तसमवायेन द्रव्यत्वस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीबलाद्गगनघटसंयो
गस्पार्शनापत्तेर्दुर्वारत्वात्॥ अभिन्नस्पार्शनं प्रति स्वभिन्नत्वेनापि कारणत्वं कल्पयित्वा सामान्यसामग्र्या

प ६

चि ३

म २

59

फलेननीयेतादृशप्रतिबंधकभावस्य द्विन्न[illegible]योरन्यतरस्य सहकारित्वकल्पनेनापत्तिवार
णेत्तु तिगौरवात्तद्रूपे स्पगगनघटसंयोगस्पार्शनानुवारणाय स्पार्शनाभावविशिष्टविजातीयसत्वेनैवता
दात्म्येन प्रतिबंधकत्वौचित्यादिजातीयसत्वे स्पार्शनाभाववैशिष्ट्यं न सामानाधिकरण्यघटितसामानाधि
५४ करण्यसंबंधेन। नेच विजातीयसत्वस्पार्शनाभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरह इति वा
च्यम्। विजातीयसत्वविशिष्टस्पार्शनाभावत्वेन प्रतिबंधकत्वे सामानाधिकरण्यस्यैव प्रतिबंधकता
वच्छेदकसंबंधतया गौरवात्। स्पार्शनाभावविशिष्टविजातीयसत्वेन प्रतिबंधकत्वे तु तादात्म्यस्यैव प्रति
बंधकतावच्छेदकसंबंधतया लाघवात्। प्रतिबध्यतावच्छेदकं च स्पर्शान्यस्पार्शनत्वं तेन न वायोरप्रत्यक्षत्वेऽपि घट
न तत्स्पर्शस्पार्शनजननात्तस्य विशेषसामग्रीबाधसत्वेन सामान्यसामग्रीबलात्तु गगनसंयोगस्पार्शनाप
त्तिरिति वाच्यं। स्पर्शस्पार्शनं प्रति स्पर्शत्वेनापि हेतुताकल्पनेन सामान्यसामग्र्याः फलेऽजननीये स्पर्शत्वावि
धप्रतिबंधकाभावयोरन्यतरस्य सहकारित्वोपगमात्। न च प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वानिवेशे
न स्पर्शत्वेन हेतुत्वकल्पनेन च वायोः प्रत्यक्षत्वानंगीकारे गौरवात्। तथाहि। परिमाणवादिघटितस
न्निकर्षत्वलाघवे द्रव्यत्वस्पार्शनवारणाय द्रव्यसमवेतस्पार्शनं प्रति कलकसंयुक्तस्पार्शनं च समवायत्वेन हेतुत्वं वा
च्यं तत्र च त्रसरेणुकस्पार्शने व्यभिचारवारणाय द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं। त्वन्मते च स
च्छिन्न द्रव्यद्रव्यसमवेतस्पार्शनत्वस्य कार्यतावच्छेदकत्वमादाय विनिगमनाविरहः। वायोरप्रत्य
५ वायुप्रत्यक्षतास्वीकार एवोचित इति वाच्यम्। वायुप्रत्यक्षत्वानंगीकारे प्रकारांतरेण लाघवसंभवात्। ४
१ ५ व्यभिचारः। न च तादृशप्रतिबंधकाभावं विनापि वायुस्पर्शस्पार्शन १

=येन संबंधेन प्रतिबंधकता स संबंधः प्रतिबंधकतावच्छेदकसंबंधः २९

50

तर्क०प्र०२५ प्रत्य०ल०२५

त्वसेतु वायुस्पर्शस्पार्शनेव्यभिचारेण द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वस्य कार्यतावच्छेदकत्वासंभवेन सद्भिन्नद्रव्य
समवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया विनिगमनाविरहस्याभावात्॥ न चैवमसन्निकृष्टगुणकर्मस्पार्शनाप
त्तिरिति वाच्यम्॥ एकाश्रयघटितसन्निकर्षाद्वित्वादिप्रत्यक्षवारणाय विजातीयसहस्पार्शनं प्रतिसामानाधि
करण्यसंबंधेन त्वक्संयोगस्यावश्यकतया तेनैव असन्निकृष्टगुणकर्मस्पार्शनापत्तिवारणसं
५ स्पार्शनत्व भवात्॥ न चैवं त्वक्संयुक्तसमवायहेतुतायामेव बीजाभावात्। येन तत्कार्यतावच्छेदके विनिगमनाविरहः
वाच्यं ६ वायुप्रत्यक्षतावादिमते प्रसज्येतेति। असन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय त्वक्संयुक्तस्पार्शनत्वसमवाय
त्वेन सद्भिन्नद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रतिहेतुता। तत्र च द्रव्यान्यद्रव्यसमवेतत्वमादाय न विनिगमना
विरहः॥ वायोरप्रत्यक्षत्वेन वायुस्पर्शस्पार्शनेव्यभिचारात्॥ वायुप्रत्यक्षत्ववादिमते तु द्रव्यान्यद्रव्यसमवेतस्पा
र्शनत्वमादाय विनिगमनाविरहेणानंततत्पुरुषभेदभिन्नसन्निकर्षानंततत्सन्निकर्षहेतुहेतुत्वे कल्पनागौरवापत्तेर्वायोर्न प्रत्यक्षस्वी
कारे एवोचितः। एतन्मते तत्तद्रूपेण स्पर्शान्यत्वनिवेशेन स्पार्शने हेतुत्वे कल्पने न चाक्षिप्यमदोरवसंबंधेपि कृ६ स्वीय हेतु
पुरुषभेदभिन्नसन्निकर्षहेतुत्वकल्पनापेक्षया लाघवानपायादिति सिद्धांतानुयायी पंथाः॥ नव्यास्तु॥ अ
सन्निकृष्टद्रव्यत्वस्पार्शनवारणाय पुरुषभेदभिन्नसन्निकर्षहेतुतां नोपेयते। अपितु सद्भिन्नसमवेत
कृति ३ स्पार्शनं प्रति स्ववृत्तिगमाभावप्रतियोगित्वविशिष्टं यत्त्वग्वृत्तिस्पार्शनविषयतासंबंधेन तद्घनत्वसमवेत
त्वसंबंधेन कृतित्वेनैव कारणत्वं। स्ववृत्तित्वं च कालिकसंबंधेन एवं च वायुप्रत्यक्षत्वस्य स्वीकारे पुरुषभेद
भिन्नसन्निकर्षहेतुतायाः कार्यतावच्छेदकउपदर्शितगौरवस्यानवकाशात् तद्भेदस्यैवाकल्पनात्॥ न तु

स्या

त्वतिकार्यतावच्छेदकेऽस्त्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहसंभव इति वाच्यं ॥ भवन्मते स्पर्शान्यत्व
तु५ निवेशेन स्पर्शे चेन्न तैलकल्पने च गौरवस्यातिस्फुटत्वात् ॥ वस्तुतस्तु व्यापकधर्मेण कारणतायाद्द्व कार्यतापि
कल्पनात् द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वे न कार्यतावच्छेदकत्वमिति वायोस्त्वगिन्द्रियस्पार्शनं च स्यैव वायुप्रत्यक्षता
वादिमतेपि सन्निकर्षकार्यतावच्छेदकत्वादिति ॥ वस्तुतस्तु गुरुत्वाद्यतीन्द्रियगतसत्त्ववारणायैतेषां तत्त्वं किंचिद्वारणे
नप्रतिबंधकत्वे न गौरवात् लाघवेन विषयत्वे नैव लौकिकप्रत्यक्षविषयत्वं च लौकिकविषयतयास्य [illegible] कारत्वमे हेतुत्वं ५
तथा च तेनैव गगनघटसंयोगस्पार्शनवारणे न तदनुरोधेन स्पार्शनं प्रति स्पार्शनाभावप्रतिबंधकत्वमिति न वायु
स्पर्शस्य स्पार्शनानुपपत्तिः ॥ नन्वेवं विषयतायावद्धर्मनिरूपप्रतिवारणरूपहेतुमत्त्वस्य कुत्रापि वाच्यं ॥ पूर्वोदेः पाको स१ त्वे
हेतुत्व दिनानीत्वपि [illegible] दशायां लौकिकप्रत्यक्षतापत्तेः नैरूप्यमावश्यकं [illegible] तत्त्वं मनसान्यजन्यत्वेनेन ॥ समवायातीन्द्रियत्व
ता वादिवैशेषिकमतमुपन्यस्यति वैशेषिकास्त्विति ॥ प्रत्यक्षं नेन्द्रियजन्यलौकिकजन्यसाक्षात्कारविषयः ॥ संबंधप्रत्यक्ष त्वात्८
इति ॥ संबंधत्वस्य समवायसाधारणत्वादिति भावः ॥ ननु तादृशकार्यकारणभावे मानाभावः इत्यत आह ॥ कथमन्य
थेति ॥ अन्यथा तादृशकार्यकारणभावाकल्पने न प्रत्यक्ष इति ॥ न चापि चक्षुःसंयुक्तसमवायस्य प्रकरणसत्त्वेन
द्रव्यसमवेतचाक्षुषापत्तेरिति भावः ॥ न चेति ॥ न हीत्यर्थः ॥ तथा हेतुतायामिति ॥ संबंधस्य प्रत्यक्षतावद्द्रव्यप्रत्य
क्षत्वेन हेतुतायामित्यर्थः ॥ घटाकाशसंयोगप्रत्यक्षापत्तेरेवमनित्यत्वाद्युपनिरासः ॥ न चेत्यादि ॥ योग्यति
द्रव्यत्वादिजातेर्योग्यमात्रसमवेतत्वात् वा योग्यत्वं न स्यात् ॥ अयोग्यस्येति ॥ योग्यत्वादिति ॥ घटाकाश
संयोगस्य चायोग्याकाशवृत्तित्वेनायोग्यत्वादिति भावः ॥ नन्वेवं वायुस्पर्शस्पर्शबोधस्य च प्रत्यक्षं न स्यात् ।

तर्कज०२६

त्वयोरयोग्यवृत्तित्वादित्यतआह ॥ किंचेति ॥ लाघवात्संबंधत्रयसापेक्षया लाघवात् ॥ लाघवमेवाह ॥ संबंधतेसति ॥ संयोगत्वस्य जातित्वनयेन लाघवमस्त्येवेति तत्त्वं ॥ घ्राणग्राह्यगुणमाह ॥ घ्राणग्राह्यइति ॥ ननूक्तंगंधगतंसामान्यं गंधत्वं क्षितिः गंधगंधत्वयोः ॥ अतएवगंधेमहत्वसमानाधिकरणविशेषणत्वादेवं ॥ उद्भूतविशेषगुणत्वादितिमाह ॥ नवेति ॥ रसनयोग्यगुणमाह ॥ रसनेति ॥ श्रवणयोग्यगुणमाह ॥ श्रवणेति ॥ ननु चक्षुरादीनां द्रव्यग्राहकत्वेनिमीलितनयनस्यापितद्ग्रहापत्तिरतआह ॥ तस्य चेति ॥ सन्निकृष्टार्थग्राहकत्वात् ॥ असन्निकृष्टार्थग्राहकत्वादित्यावत् ॥ सहकारिणः प्रत्यक्षजननीये अपेक्षणीयाः ॥ तथाचइंद्रियसंयोगादेरपिप्रत्यक्षहेतुतयानिमीलितनयनस्यप्रत्यक्षतापत्तिरितिभावः ॥ ननु इंद्रियत्वस्यतेजस्त्वादिनासंकरजातित्वासंभवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रतीति इंद्रियत्वसंयोगयोर्हेतुत्वमिति चेन्न ॥ इंद्रियनिष्ठैकत्वेपुवेनात्वं स्वीकृत्य विजातीयैकत्ववत्त्वेनैव तद्धेतुत्वात् नच चक्षुःसंयोगादरायांस्पार्शनवारणाय त्वक्चक्षुःसंयोगादरायांचाक्षुषवारणाय चक्षुस्त्वक्संयोगयोर्भ्यां चाक्षुषस्पार्शनहेतुत्वावश्यकतया इंद्रियसंयोगादीनां प्रत्यक्षसामान्यहेतुत्वेमानाभावइतिवाच्यं ॥ प्रत्यक्षसामान्यानुत्पादस्य चक्षुःसंयोगाभावत्वक्संयोगाभावादीनां प्रयोजकत्वे गौरवात् लाघवेनेंद्रियसंयोगाभावस्यैव प्रयोजकत्वेनेंद्रियसंयोगहेतुत्वावश्यकत्वात् ॥ अकारणविरहस्यकार्यविरहप्रयोजकत्वात् ॥ इंद्रियसंयोगस्यसंयोगेनइंद्रियस्याहेतुत्वमिति विनिगमनाविरहादिंद्रियत्वेनापितद्धेतुत्वमिति ॥

त्वा

सन्निकृष्टार्थमात्र
ग्राहकत्वात् २५

मस्प०२६

53

ननुसर्वेषामेवसन्निकर्षाणांद्रव्यादिग्राहकत्वेआत्मनःप्रत्यक्षानुपपत्तिः॥ननुसंयुक्तसमवायाभावात्।एवंरूपादेरपि
तत्रसंयोगाभावादितिप्रत्येकमेवद्रव्यादिग्राहकतावाच्या॥तत्रकेनग्रहणंतदाहतएवोक्तं॥अन्यकेनेति।उत्तरयति।द्रव्यमि दि.२
ति॥संयुक्तसमवायस्यगुणमात्रग्राहकत्वेशब्दाग्रहोनस्यात्॥स्वप्निमश्रोत्रेसंयोगस्याभावेनश्रोत्रसंयुक्तसमवा
यस्यशब्देसत्त्वात्अआह॥शब्देतरेति॥जातिःद्रव्यत्वादिः।संयुक्तसमवायस्यशब्दत्वेसिद्धत्वाच्छब्देयेहानुपपत्तिः॥
शब्देतरेतिगुणविशेषणं॥तत्रसमवायेऽभावेचतथापिघुसन्निकर्षाभावेनविशेषणतयैवतद्ग्रहइतिभावः॥
तस्यशब्दाभावस्येत्यर्थः॥घटेचतस्यघटाभावस्येत्यर्थः॥नन्विन्द्रियसन्निकृष्टविशेषणतायाइन्द्रियसंयुक्तविशेषण॥
तातयाचरूपादौरसत्वाभावग्रहानुपपत्तिरितिअतआह॥इन्द्रियसन्निकृष्टेतिबहुव्रीहिरिति॥इन्द्रियसंयुक्तविशेष
णता॥तादीन्द्रियसंयुक्तसमवेतविशेषणतेत्यादिबोध्या॥इन्द्रियसंयुक्तसमवेतविशेषणतयारूपादौरसत्वा
भावग्रहसंभवान्नानुपपत्तिरितिभावः।बहुत्वात्संयुक्तसमवायादिभेदेनबहुविधत्वात्॥ननुरूपादिग्राहकत्वा
र्थमेवत्वयाभ्युपेयतयासंयुक्तसमवायगत्यासन्निकर्षेघटाग्रहोपपत्तेरलंसंयोगस्यप्रत्यासत्तित्वेनेतिशक्यते॥
नचेति॥नद्रव्यग्राहकत्वंसंयुक्तसमवायस्यमानाभावादितिशेषः॥ननुघटादिग्रहान्यथानुपपत्तिरेवमानमतआह॥सं
युक्तेतितद्ग्रहसंभवात्।संयुक्तसमवायासंभवात्॥तस्यआत्मनःतथाचासत्प्रसक्तेःसंयोगहेतुतायाआ
वश्यकत्वेनतत्रैवद्रव्यप्रत्यक्षत्वमेव[illegible]कार्यतावच्छेदकमुपेयतइतिभावः॥ननुद्रव्यसमवेतचाक्षुषत्वा
वच्छिन्नेऽपिचक्षुःसंयुक्तसमवायहेतुत्वेनततएवोपपत्तेरलंचक्षुःसंयोगहेतुत्वेन।यदिचाप्रसक्तंघटत्वसा
वा

आत्म १

मान्यतोऽन्यजन्यद्रव्यत्वमेव जन्यतावच्छेदकमुररीक्रियतां तज्जातीयद्रव्यत्वमेवास्तु॥ न च सत्त्वेऽपि द्रव्यत्वस्य तथात्वे रूपा
दिचाक्षुषानुपपत्तिरित्यन्यथानुपपत्तिरेव तत्र बाधकमिति वाच्यं॥ तथा सति चक्षुःसंयुक्तसमवायेनैव घटादिचा
क्षुषोपपत्तेर्न द्रव्यजन्यत्वे द्रव्यत्वं जन्यतावच्छेदकं साधकाभावस्यैव गुरुतो बाधकत्वात्॥ इत्यत आह॥ संक्षेपर
ति॥ चक्षुःसंयुक्तसमवायस्य त्र्यणुकादिरूपेऽपि सत्त्वात्॥ तच्चाक्षुषत्वापत्तेश्च संयुक्तचाक्षुषप्रतीतिनिरूपित
समवायत्वेन तद्धेतुत्वं वाच्यं॥ तत्र त्र्यणुकादिचाक्षुषे व्यभिचारवारणाय द्रव्यान्यसत्त्वाक्षुषस्य त्वं विजातीयसच्चाक्षुष
स्यैव जन्यतावच्छेदकमुपेयं॥ एवं च तद्विचाक्षुषस्यासंग्रहात्तन्नया चक्षुःसंयोगहेतुतावश्यकी॥ तद्धटय
ग७ संयोगस्य सत्त्वादिति॥ परमाणौ महत्त्वं नास्तीति प्रत्ययात्परमाणौ च घटे आलोको नास्तीति प्रत्ययाच्च
टेऽपि चक्षुःसंयोगस्यावश्यकत्वात्॥ चक्षुःसंबद्धविशेषणतयाऽभावग्राहकत्वादिति भावः॥ महद्
द्भूतेति॥ महत्त्वविशिष्टोद्भूतरूपविशिष्टालोकनिरूपितसंयोगो द्रव्यचाक्षुषत्वे हेतुकारणमित्यर्थः॥ उ६
स्पर्शादि॥ महदुद्भूतरूपालोकनिरूपितसंयोगस्यार्थः॥ न चैवमिति॥ एवमालोकसंयोगस्य हेतुत्वे॥ तेजःसंयो
गाभावात्॥ तेजोऽन्तरप्रतियोगिकसंयोगाभावात्॥ स्वस्मिन्नुच्चतिकं यौगिकसंयोगानभ्युपगमादिति
भावः॥ तत्र प्रभायां दीपप्रभायां दीपसंसंयोगस्य सत्त्वात्॥ अतो न मणिप्रभादाविति॥ मणेः पार्थिवत्वेन तत्संयो संयोग
गस्याहेतुत्वात् किमिति भावः॥ ननु मणिप्रभादौ आलोकस्यैव सत्त्वादत आह॥ दृश्यते चेति॥ महान्धकारे द्रव्यने
नसौरालोकव्यवच्छेदः॥ अपकारे घटादिगत्यद्भापत्तिवारणाय तत्रालोकसंयोगस्य हेतुत्वमास्तां॥ श्री
आलोकत्वस्य चेतुतद्धेतुत्वे मानाभावः॥ अपकारे पितत्वस्य स्वीकारे पाद्॥ अत आलोकाभिन्नद्रव्यचाक्षुष

सत्वसुवर्णेति। तत्रापि आलोकाकारसंयोगस्य सत्वादिति भावः॥५४

तावद्भिन्नं प्रदीपस्य हेतुत्वं तत्तोन्यासिचारुत्साशंकते॥ अथेति। सुवर्णेति। सुवर्णस्य आलोकभिन्नत्वा-
भावेन तच्चाक्षुषस्यालोकसंयोगकार्यतावच्छेदकानाक्रांतत्वादिति भावः। आलोकसंयोग इति॥ आलो-
कानिकसंयोगो हेतुरित्यर्थः। यद्यालोकवृत्तिभूतत्वे घट आनीतस्तत्रालोकप्रतियोगिकसंयोगाभावादालोक-
वृत्तिसंयोगत्वेनैव हेतुतास्मिदिति स्मर्तं। अनभिभूतेति। अनभिभूतरूपं यस्येत्युक्तस्य अनभिभूतरूपावच्छि-
न्नालोकसंयोगस्य हेतुतया सुवर्णकुतदसंभवः। सुवर्णरूपस्याभिभूतत्वात्। तथा च द्रव्यचाक्षुषत्वावच्छि-
न्नं प्रति अनभिभूतोद्भूतरूपविशिष्टालोकसंयोगस्य हेतुत्वमिति भावः। अन्यथा सुवर्णरूपस्यानभिभूतत्वे॥
द्रव्यांतरे इति। अंधकारे घटादौ सुवर्णसंयोगात् घटग्रहापत्तेरिति॥ अभिभूतत्वं तस्येति भावः॥ बलवत्स-
जातीयग्रहणकृतमग्रहणं वाभिभव इति॥ संप्रदायविदस्त्वाहुरिति। आकृतेर्द्रव्यचाक्षुषे आलोकसंयो-
गस्य हेतुत्वं अंधकारे सुवर्णसाक्षात्कारापत्तिरतः सुवर्णभिन्नत्वमालोकविशेषणं। तच्च सुवर्णभिन्नं
यत्तेजः तद्भिन्नं द्रव्यं सुवर्णघटादिस्तत्तत्संसर्गआलोकप्रतियोगिकसंयोगे हेतुः। अतो नांधकारे सुवर्णसा-
क्षात्कार इत्यर्थः। कार्यतावच्छेदकगौरवमत्रास्वरसः॥ केचित्तु द्रव्यचाक्षुषे आलोकसंयोगस्य प्रभा-
संयोगत्वेनैव हेतुता। अत्रालंकं च सुवर्णादिव्यावृत्तमित्याहुः॥ सुवर्णादिसंयोगव्यावृत्तवैजात्यरूपस्य वि-
जातीयालोकसंयोगत्वेन हेतुत्वमित्यपि केचित्॥ आलोकसंयोगानवच्छेदकावच्छेदेन चक्षुःसंयोग

लेप्
याप्

दशायांघटप्रत्यक्षापत्तिः॥ तत्रआलोकसंयोगस्यचक्षुःसंयोगस्यपरस्परानवच्छेदकावच्छेन सत्वादित्याशंकते॥ त
थापीति॥ तथापिआलोकसंयोगादेर्हेतुत्वेपिपरदिगवच्छेदेनतत्संयुक्ते आलोकसंयुक्तेत्यर्थः॥ पुरुषेणेति॥
परदिगवच्छेदेनचक्षुःसंयोगेसत्वेविशेषः पर्यवच्छेदेनेति॥ आलोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेनहे ५१
तुत्वादिति भावः॥ अथ मूर्त्तयोःसमानदेशत्वविरोधात् घटादौएकदेशावच्छेदेनसंयोगसंबंधेनालोकचक्षुषोः सं
नवा ते॥ आलोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगः कथमुपपद्यतेइतिचेन्न॥ निबिडयोरेवमूर्त्तयोःसमानदेशत्वानं
गीकारात्॥ आलोकचक्षुषोस्तैजसत्वेननिबिडत्वाभावात्॥ नचतथाप्यालोकसंयोगस्यकारणतावच्छेदकको
टिप्रविष्टत्वान्नकारणत्वमितिवाच्यं॥ तादृशचक्षुःसंयोगत्वेनचक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोग
त्वेनवाहेतुत्वमितिविनिगमनाविरहेणतस्यापिकारणत्वात्॥ नचालोकसंयोगंविनापिविडालादेःसांजनचौ
रादेश्चांधकारप्रत्यक्षोदयात्कथंकारणत्वमितिवाच्यं॥ विजातीयचाक्षुषं प्रत्येवालोकसंयोगस्यहेतुत्वात्॥
विडालादिसांजनीयपुरुषीयचाक्षुषत्वं चैतद्वैजात्यमितिकेचित्तु॥ अंजनाभावविशिष्टालोकसंयोगाभावत्वेन
द्रव्यचाक्षुषत्वावच्छिन्नंप्रतिप्रतिबंधकत्वं॥ तदभावत्वेनकारणता॥ अंजनाभावश्चस्वसंयुक्तचक्षुःसंयोगि
त्वसंबंधावच्छिन्नप्रतियोगिताकः॥ आलोकसंयोगाभावे [redacted] स्वस्वसामानाधिकरण्येनालोकसंयो
गाभावश्चस्वसमानाधिकरणैकत्वसंबंधावच्छिन्नप्रतियोगिताको बोध्यः॥ तेनसंयोगस्याव्याप्यवृत्तित्वेपिन
क्षतिः स्वचीविशिष्टाभावः कुत्रचिद्विशेषणाभावप्रयुक्तः॥ कुत्रचिद्विशेष्याभावप्रयुक्तः॥ सांजनपुंसःअं

अंजनाभाववैशि२

५७

स ५

जनासत्तावविरहप्रयुक्तो विशिष्टाभावः॥ आलोकसंयोगस्यत्वेपालोकैस्थ्यते भावविरहप्रयुक्तत्वस्य यत्रापि प्रतिबंध
काभावसत्वमप्या[illegible]तं॥ विडालकादिष्वाक्षुषेत्यभिचारवारणाय रमतत्संयोगे तु निवेशनीयमित्याकूतः॥ समवायकाभावप्र
ग्राह्यार्थमेव विशेषणताग्रेस्यादत्त इति रिक्तमुक्तं॥ तेन समवायाभावयोः प्रमाणसत्व एव संभवति॥ तदेव निस्याशंकते॥ स्यादेव
पा३ दिति॥ समवायाभावयोरहक्षे नैव प्रत्यासत्तिस्यादत आह॥ समवायो [illegible]॥ प्रमाणसत्वे कथं तयोरसत्वमत आह॥
था५ नहीति॥ तत्र प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात्तयोरसत्वमिति भावः॥ ननु चायं घट इत्यादि प्रत्यक्षे घटपटत्वयोः
संबंधविषयकं तत्र च समवायातिरिक्तसंयोगादीनां बाधो हि समवायसिद्धिः॥ तथा च तत्र बाधसहकृततत्कल्पक्षप्रमाण मा८
स्यैव संसचाल कथं प्रमाणाभावस्यास्ति कुतो॥ अयं घट इत्यादि॥ न तु समवायातिरिक्तस्यैव कस्यचित्संबंधस्य स
त्वान्नेतरबाध इत्यत आह॥ नहीति॥ तथा घटत्वस्वरूपं च लक्षणादीनां अन्य संबंधः स[redacted]दिः॥ सत्यादिति॥ त योगा ८
था७ थाच समवायातिरिक्तस्याधाराधेयभावाख्यस्वरूपसंबंधस्य सत्वात्॥ तद्विषयकत्वेनैव प्रतीतेरुपपत्तेर्न तदन्य
थानुपपत्त्या समवायसिद्धिरिति भावः॥ ननु चाधारतासमवाय एव गृहीतपर्यायशब्देति स्वरूपसंबंधसिद्ध समवाय एवेत्यत
दा आह॥ नहीति॥ पटादौ पीति॥ स्त्र सत्वात्॥ समवायस्य सत्वात्॥ न त्वाधारसमवायस्यैवाधारत्वे घटादावपि समवा
यरूपघटत्वाधारतासत्वेन तत्रापि घटत्वविशिष्टबुद्ध्यापत्तेः॥ समवायातिरिक्तैवाधारतास्वीकार्या॥ तथा च किं
समवायेनेति भावः॥ ननु पटे घटत्वसमवायाभावादेव न तथा प्रत्यापत्तिरत आह॥ एक एव हीति॥ तत्सिद्धेरिति॥
तथा च सर्वेव प्रतीतेः स्वरूपसंबंधविषयकत्वेनोपपादयितुमशक्यत्वात्समवायस्वीकार इति भावः॥ वस्तुतस्तु॥
अयं घट इत्यादि प्रतीतीनां अनंतस्वरूपसंबंधविषयकत्वे गौरवाल्लाघवे नातिरिक्तसमवायविषयत्वमि

म२

(58)

स्थे

नित्येयं॥ समवाये प्रमाणमुक्त्वा अभावेतदाह॥ नन्वेति। असन्निहिति। अप्रामाणिक इत्यर्थः॥ तत्सिद्धेः। अभावसिद्धेः॥ ननु
नवयमभावो नास्त्येवेति। अभावः किंतु तस्याधिकरणात्स्वरूपत्वे नैवोपपत्तेरतिरिक्तत्वे मानाभावइति। इत्याकरमनुपद
र्शयति॥ अधिकरणाकरणेति। अतिरिक्तकल्पनाकरणादतिरिक्तः तद्ग्रहाय अभावग्रहाय। गन्धासत्ती विवेकरूपज्ञ पण३
लाघवं तरकल्पनेनेत्यर्थः। यद्यपिसमवायपदार्थमवश्यं तद्ध्रोसत्तोरंगीकारः। तथाप्यभावआहत्यकल्पनेनव
प्रत्यासत्तित्वं नैय[illegible]यिकैरुपेयते तदेव खंडयत इति भावः॥ इदं अभावप्रतीतिविषयीकृतं॥ तत्सापत्तिः। अभावस्य
रूपत्वापत्तिः॥ तथा च तत्र घटाभाववत्ताबुद्धिप्रसंग इति भावः॥ अभाववदिति॥ अभावाधिकरणमित्यर्थः। यत्का
लावच्छेदेन घटाभावाधिकरणता भूतलेऽपेयते तस्यैव तत्स्वरूपत्वमंगीक्रियत इति भावः॥ नचभेदइति॥ अ
भेदे भावाधिकरणयोर्भेदे तथा भावः आधाराधेयभावः॥ अनवस्थापत्तेरिति॥ घटाभावेऽतिरिक्ताभाव
तद्घटाभावस्य भावेऽप्यतिरिक्तः कल्प्यते तत्र चानवस्थेत्यर्थः॥ ननु यद्धर्मविशिष्टे यद्धर्मावच्छिन्नवत्तानप्रत्यय
ते तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्ननिरूपिताधिकरणतानोपेयते॥ एवंच भूतलेऽभावत्वावच्छिन्ननिरूपिताधि त्यो ५
करणतायाभावान्नभूतलेभूतलमितिप्रतीत्यापत्तिः। भूतलेघटत्वावच्छिन्ननिरूपिताधिकरणतायाः स्वी भावव४
कारात्तु भूतले घटाभाव इति प्रतीतिरुपपन्नैवेत्यस्वरसादाह॥ किंचेति॥ आधेयतदधिकरस्य घटाभा
वस्वरूपत्वे। इदानीमित्यनंतरमिहेतिशेषः॥ अंत्ये तदधिकरणस्य घटाभावास्वरूपत्वे। अन्यदापीति।
घटेनानीतेपीत्यर्थः॥ नन्वतिरिक्ताभाववादिमते घटेऽानीते घटाभावो न नश्यति न वागच्छति तस्य नित्य

प्रा

तस्यानित्यत्वात्तत्त्वाच्चेति कुतो न घटाभाववत्ताबुद्धिः कथं भावाभावयोरेकाधिकरणवृत्तित्वरूपो विरोधः
तयोस्तयोः सत्वात् ॥ अथ घटानधिकरणकालावच्छिन्नं तत्र भूतलादिकमेव घटाभावस्य संबंधः तथात्व
घटवति भूतलेऽपि तेन संबंधेन घटाभावस्याविद्यमानत्वान्न घटाभाववत्ताबुद्धिः घटाभावस्य तेन संबंधेना
विद्यमानत्वाच्च न विरोधिता घटकसंबंधेन तदधिकरणवृत्तित्वरूपविरोधव्याघातोऽपीति चेन्न हि विशिष्टस
त्ताया अनतिरेकेऽपि यथा विशिष्टनिरूपिताधिकरणताया गुणेऽसत्वात् गुणकर्मान्यत्वविशिष्टसत्तावानि
ति न गत्ययस्तथा च घटसत्त्वेऽपि तत्कालावच्छेदेन घटाभावाधिकरणताया अनंगीकारान्न घटाभावव वी
त्ताबुद्धिप्रसंग इत्यस्वरसादाह किं च कपालस्येति केचित्तु घटोत्पादविनाशशालिनी एका[illegible]तिनिकाधिकर
णतोपेयते तस्या घटे आनीते नाशोपगमे न तद्वत्ताबुद्धिप्रसंग इत्यस्वरसमाहुः तदसत् जातिक्षणे प्रा
माणिकानंताधिकरणत्वतन्नाशाभ्युपगमे गौरवेणातिरिक्ताभावस्यैव कल्पयितुमुचितत्वात् न च
त्वदुक्तेऽप्येष दोष इति वाच्यं मन्मते घटाधिकरणतायां घटाधिकरणकालस्यावच्छेदकत्वानुपगमेनानुपप
त्यभावात् ॥ सदिति घटप्रागभावघटध्वंसश्चेत्यर्थः सर्वदेति प्रागभावनाशकाले ध्वंसानुत्पत्तिक्षणे च
त्यर्थः कपालकालमात्र इत्यर्थ इति केचित् ॥ अन्यथा प्रागभावध्वंसयोः घटकालेऽसत्वेऽपि प्रतीत्यस्वीकारे।
कपालप्रतीतिरपीति ॥ कपालस्वरूपप्रागभावध्वंसयोरप्रतीतौ कपालमपि कथं प्रतीयेत तत्र त्रयाणा
मैक्येन एकस्याप्रतीतौ न कस्यापि प्रतीतिः स्यात् कस्यचित् प्रतीतौ सर्वमेव प्रतीयेतेति भावः ॥ अन्यथा
कपालसत्व इत्यर्थ इति केचित् ॥ नन्वत्रापि घटकालावच्छेदेन घटप्रागभावध्वंसाधिकरणताया अनभ्यु

पगमान्तकालेतद्धत्ताबुद्धिरित्यस्यस्वरसादाह ॥ किंत्वभो क्षइति ॥ ननु सादिविनाशशालिशालिनीमधिकरणतामंगीकृत्य
घटकाले घटप्रागभावाधिकरणतानाशात् ध्वंसाधिकरणतायाः अनभ्युपगमान्नतत्केस्पतेश्च ननद्धत्ताबुद्धिरि
त्यस्यस्वरसात्किंत्वेतादृिकश्चित्तनुपूर्वमेव दूषितत्वादनुपादेयं ॥ असाध्यतेति ॥ इष्टापत्तौ च श्रवणमनननिदिध्या
वि४ सनध्यानधारणासमाधिकृतामनेकध्वंसे दुःखं कोपि नानुभूयादिति बोध्यं ॥ नित्यसुखाभिव्यक्तेरेव मुक्तित्वेन
नासाध्यतापत्तिरित्यत आह ॥ संक्षेपइति ॥ तैरीश्वरानंगीकारादीश्वरायनित्यसुखमप्रसिद्धं जीवस्यनित्यसु
खेप्रमाणाभावेनानित्यसुखाभिव्यक्तेर्मुक्तिरिति मुक्तित्वलक्षणमसंभवि तस्माद्दुःखध्वंसरूपमुक्तेरसाध्यत्वाप
त्तिरस्त्येवेतिभावः ॥ इदं तु चिंत्यं तन्मते दुःखध्वंसानिरूपिताधिकरणतायाः साध्यत्वसंभवस्यैव मोक्षाधिकरण
तायाः साध्यत्वोपगमादिति ॥ ग्रा भाकरमते न किंचिद्दोषः ॥ वस्तुतस्तु भूतले घटो नास्ति पर्वते घटो नास्तीत्या
दिप्रतीतीनां मनंताधिकरणताभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्वे कल्पनगौरवादतिरिक्तघट
त्वावच्छिन्नप्रतियोगिकाभावविषयत्वमेव समुचितं ॥ एवं घटवत्ताबुद्धिं प्रति घटाभाववत्ताज्ञानत्वेन प्रतिबंध
कत्वेपि सघटभूतलेपि यत्किंचिद्घटाभावसत्वात्तु घटाभावकूटवत्ताज्ञानत्वेनैव प्रतिबंधकत्वं वाच्यं ॥
तदपेक्षया घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेन प्रतिबंधकत्वे लाघवमित्यादिरीत्यातिरिक्ता
भावसिद्धिरिति निपुणतरमूहनीयं ॥ तदभावइति ॥ घटाभावाभावस्यापि भावत्वमर्थः ॥ केवलाधिक
रणमित्यादि ॥ केवलाधिकरणं घटाभावानधिकरणं भूतलं तदभावः घटाभावाभावः ॥ सर्वत्रापि घटा ६२
भावस्थलेपि ॥ स एव अधिकरणस्वरूप एव ॥ ननु सर्वत्राधिकरणस्वरूपत्वे पूर्वदूषणं स्तम्भत्यत आह ॥

२ त्वया ज्ञानि तानित्वमतेप्य विशिष्टानीति भावः। तत्सत्वे।२

नि॰

मवदुक्तेति॥ एवं घटाभावाभावस्याधिकरणस्वरूपत्वे॥ तथा चयोर्दूषणा॥ नि अधिकरणस्वरू
पत्वे। घटसत्वे। उक्तयुक्तेरिति॥ आधाराधेयभावानुपपत्तिरूपदूषणादित्यर्थः॥ संप्रदा
यमतेऽस्वरससद्‌देवनव्यमतमाह॥ नव्यास्त्विति॥ अयं अभावत्वेन प्रत्ययः बाधकाभा
वात्॥ प्रमात्वबाधकाभावात्॥ अन्योन्याभावस्थले शंकते॥ स्यादेतदिति॥ अंत्ये भूत
ले घटभेद भिन्नत्वाभावे आद्ये घटभेदाभिन्नत्वे॥ तद्वदिति॥ घटभेदस्य भेदोपि त्य भेद ५
र्थः॥ मवदुक्तेति॥ आधाराधेयभावानुपपत्ति दूषणप्रसंगादित्यर्थः॥ प्रामाणिकत्वा रूप
दिति। दि॥ बीजांकुरानवस्थायाइव प्रमाण सिद्धत्वादित्यर्थः॥ संक्षेपयतीति॥ घटभ
दाभावो घटस्वरूप इत्यादि बोध्यं॥ सचायमिति॥ आनुस्कुकृत्य अतिरिक्तत्वेन
सिद्धोऽभावश्चेदित्यर्थः॥ तत्र प्रथमोदित्यमन्योन्याभावं दर्शयति॥ तत्रेति॥ प्रती
तिसाक्षीकरोति॥ इदंरूपेतीति सिद्धमखंडोपाधिरूपमन्योन्याभावत्वमेवा
न्योन्याभावलक्षणमित्यर्थः॥ प्राचीनोक्तेन न्योन्याभावलक्षणं दर्शयति॥ यदिदमा

प्रि॰ ५२

प्रुमस ५१

डु॰ इत्यादिना ॥ तादात्म्येति ॥ घटतादात्म्यं हि घटत्वं तथा च यान्योन्याभावबोधे च तत्त्वस्य संबंधविधया प्रकारत्वात्च
प्रतियोगितावच्छेदकत्व मिति दिक् यत्तया घटत्वस्य ज्ञानं तद्वच्छिन्नप्रतियोगिताकस्यान्योन्याभावस्य उक्तलक्षण
यो॰३ समन्वयः ॥ न च संयोगितादात्म्यं संयोग एवेति संयोगसंबंधावच्छिन्नप्रतियोगिताकसंयोग्यत्यंताभावेतिव्याप्तिरिति
वाच्यं ॥ तादात्म्यस्य सामान्यसंबंधावच्छिन्नोति न दद्यात् ॥ तादात्म्यस्य लक्षणविशिष्टत्वमेवहितादात्म्यसामान्यचैताहस्य संबं
संबंधताविशेषः प्रतीतिसाक्षिकः घटत्वादिरूपतादात्म्यं घटतादात्म्येनैव घटान्योन्याभावप्रतियोगिकतावच्छेदकं त्ये ५
[illegible]मित्युक्तलक्षणसमन्वयः ॥ संयोग्यत्यंताभावोपि च संयोगात्वे नैव संबंधेन न तु तादात्म्यत्वेनेति नानुपपत्तिः ॥ अत्र घट
प्रतियोगितावच्छि ज्ञानस्य योरित्यान्योन्याभावस्य प्रतियोगितावच्छेदकसंबंधमानाभावः ॥ न चात्यंताभावस्यापि तथास्त्विति वाच्यं ॥ ~~मट~~
संयोगसंबंधावच्छिन्नघटात्यंताभावे [illegible] ज्ञानेस्यापि समवायादिसंबंधेन घटवत्त्वज्ञानोदयात् ॥ संयोगसंबंधाव
छिन्नघटनिष्ठप्रकारताशालिज्ञाने प्रतिसंयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावप्रकारकज्ञानत्वेन प्रति
बंधकत्वादन्योन्याभावस्य च नानासंबंधावच्छिन्नप्रतियोगिताकत्वाभावेन समवायेन घटवत्ताज्ञानं प्रति च घट
न्योन्याभावज्ञानत्वेनैव प्रतिबंधकतयान्योन्याभावस्य तथा ज्ञानस्यकुंठितत्वात् एवमेव तत्स्य स
[illegible]स्वरूपस्य आकृत्स्न्येन सूचितं ॥ तदन्योन्यभावत्वे ॥ अन्योन्याभावत्वस्यार्थः ॥ तथाचान्योन्याभावभिन्नाभा
वत्वं संसर्गाभावत्वमिति तल्लक्षणमिति भावः ॥ अत्र यद्यपि नास्तीति प्रतीतिसाक्षिकोऽभावः संसर्गाभावः
तदन्योन्या[illegible]भावश्चान्योन्याभावस्यापि च कुंठितं ॥ तथापि नास्तीति [illegible] प्रतीतेरत्यंताभावविषयत्वेन कर
वोपपत्तेरिति दिक् ॥ संसर्गाभावे मानं ॥ भावान्तराभोक्तं ॥ सोपि संसर्गाभावोपि ॥ अत्र [illegible] अनुक्तवत्त्वादिम
+ दत्यंताभावस्य प्रतियोगितावच्छेदकसंबंधस्यावश्यकत्वात् ६ न्य ४ नास्तीस १

अयमेव विनष्ट इत्यादि जातीदर्शनि अस्यंतं त्याव ध्वंसयोः प्रमाणं दर्शयति ॥ ननु लक्षणेपि तन्निवेशः इति बोध्यं ॥
निरस्तत्वमाशंक्यैकौ गगनादौ लक्षणगमनाद्वृत्यमशंक्यै नैव ध्वंसप्रागभाव [illegible] योरतिव्याप्तिः स्फुटमेतयोपादानं ॥
नित्यत्वं चात्र प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं ॥ ध्वंसस्य प्रागभावप्रतियोगित्वात्प्रागभावस्य ८२
वैयर्थ्यं च ध्वंसप्रतियोगित्वान्न तयोरतिप्रसंगः ॥ एककालमात्रे कोचान्येष्वतिव्याप्तिरिति ध्येयं ॥ उत्पत्तिमन्निति ॥
उत्पत्तिमत्त्वमात्रोक्तौ घटादौ अभावमात्रोक्तौ चात्यंताभावादावतिव्याप्तेर्वारणायोपादानं ॥ आद्यक्षणसं
व बंधः उत्पत्तिः स्वाधिकरणक्षणावच्छिन्नप्रागभावप्रतियोगिक्षणसंबंध उत्पत्तिरिति यावत् ॥ अथ ध्वंसस्य क्ष
णयोगस्य क्षणयोगजन्मनिर्मिता ॥ तदर्थमाह स्वाधिकरणक्षणध्वंसानधिकरणक्षणसंबंध एवोत्पत्तिः ।
प्राची महाप्रलयांगीकर्तृमते कश्चिदपि यत्समवायसंबंधेय समवायध्वंसवन्नि ध्वंसप्रतियोगित्वेनास्ति । तस्य त
त्समवायसंबंधेनोत्पत्तिरित्यर्थः । स्ववृत्तिपदार्थप्रागभावानधिकरणत्वं स्वपदं निष्पाद्य ध्वंसप्रतियोग्यनधि
करणत्वं वा लक्षणत्वं इति बोध्यं ॥ सत्य ध्वंसस्य ॥ ननु अतीतेनि रेव मानमतं आह ॥ न हीति ॥ ध्वंसस्य ध्वंसाप्रतियो
गित्ववत् प्रागभावाप्रतियोगित्वमपि स्यादिति त्वमीमांसकत्वमाह ॥ तत्प्रागभावस्येत्यादि ॥ ध्वंसप्रागभावत्वे
सत्यर्थः । अग्रेच प्रतियोगिप्रागभावएवतत्प्रागभावपदेन ग्राह्यः । अत्र प्रतीतिं प्रमाणयति उत्पत्स्यत इति । प्रतियोगि
दशायां प्रतियोगिप्रागभावसत्तायां दर्शितेत्यर्थः । उत्पन्नक्षणे । ध्वंसप्रागभावानधिकरणकालस्य प्रतियो
गिप्राधिकरणत्वनियमेन ध्वंसस्य ध्वंसस्वीकारे घटोन्मज्जनप्रसंगात् ॥ ध्वंसस्य न ध्वंसः । एवं घटप्रागभावका
ले ध्वंसाधिकरणत्व प्रसंगात् । घटप्रागभावस्य घटध्वंसप्रागभावरूपत्वेपि द्रष्टव्यं । प्रागभावं लक्षयति ।
ध्वंसोन्मज्जनप्रसंगात् ॥ ९

65

विनाशेति ।। घटादावत्यंताभावादौ व्यभिचारवारणाय यथाक्रमं विशेषणद्वयोपादानं ।। ननु प्रागभावांगीकारे माना
भाव इत्यत आह ।। सचेति ।। तथा च भविष्यतीति प्रतीतिविषयतया प्रागभाव आवश्यक इति भावः ।। ननु भविष्यत्व
स्य वर्त्तमानप्रागभावप्रतियोगित्वरूपत्वे प्रागभावसिद्धिः ।। तदेव न किंतु वर्त्तमानकालोत्तरकालोत्पत्तिकत्वमे
म ४ वतत्वं ।। न च यस्मादव्यवहितोत्तरो यः क्षणः स तदुत्पत्तिमानिति मानियतसामग्र्या व्याप्ते घटादिद्वितीयक्षणेऽपि घ
टादेरुत्पत्तिवारणाय प्रागभावहेतुत्वमावश्यकमिति वाच्यं ।। उत्पत्स्यंत चारिन सामग्र्या व्याप्ते घटादिद्वितीयक्षणे
रनभ्युपगमात् ।। अपितु तदधिकरणात्तत्त्वविन ।। अस्तु वा तथा ।। तथापि जन्यद्रव्यत्वावच्छिन्नं प्रति समवाये
न द्रव्यत्वेन प्रतिबंधकत्वोपगमेनानुपपत्तेरभावात् ।। अत्र न प्रागभावकल्पनापेक्षया प्रतिबंधकाभावक
ल्पनाया एव न्याय्यत्वात् ।। इति चेद् व्यादेरोक्तः ।। सहस्रात् तंतुकपालस्य घटस्यानधिकरणत्वाद्वा दोषपटोत्पत्तिवा
तत् रणाय वा वृक्षसंयोगानां तंतूनां वा तत्त्वावच्छिन्नत्वेन कारणत्वमपेक्ष्य एकजातीयकारणत्वमेव समुचितं ।। प्रागभा पा १०
वस्य च प्रतियोगिसमानदेशत्वनियमेन घटादीनां देशनियमोपपत्तिः ।। न च ध्वस्ततंतुके उत्पन्ने पुनः संयुक्ते पुनं
पुनस्तत्पटोत्पत्तिवारणाय तत्तत्तंतूनां संयोगानां वा हेतुत्वमावश्यकमिति वाच्यं ।। चरमतंतुसंयोगव्य
क्तेरेव तद्व्यक्तित्वेन हेतुत्वोपगमात् ।। चरमसंयोगानधिकरणत्वाद्वा पुनस्तत्पटोत्पत्तिः तद्विरहेणात्तत्तरत्त
त्पटोत्पत्तिवारणस्य संभवात् ।। प्रागभावस्वीकारस्यावश्यकत्वात् ।। चरमसंयोगस्यैव तत्पटं प्रति समवा
येन न हेतुता चरमसंयोगानधिकरणत्वाद्वापि पुनस्तत्पटोत्पत्तेः ।। किंतु समवायसंबंधेन चरमसंयोगो हेतुरिति ।। अ
त्वमग्रकृतिविचारणो ।। प्रागभावस्य चेत्यर्थः ।। तदुक्तं सभ्य ।। प्रतियोगिध्वंसश्च ।। प्रतीतिप्रमाणयति ।। उप

तस्य चेति ४१

+ तस्य च प्रतिकालिकसंबंधेन पा २

65

यत्वेति॥ प्रतियोगिदशायामप्रतियोगिध्वंसदशायांचेत्यर्थः॥ इदमुपलक्षणं॥ प्रागभावो न्यज्ञानप्रसंगोपि द्रष्टव्यः॥ नित्य
चर त्विति॥ नित्यत्वे प्रागभावप्रतियोगिनि तेषां ध्वंसाप्रतियोगित्वापत्तं॥ अत एव ध्वंसप्रागभावयोर्नाविभागवृत्तित्वा गैवम॥
निरस्यते॥ प्रसंगाद्या॥ सत्यत्वेति॥ धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वमिति द्वित्वसाधारण्येनाहीमारभते॥ नित्य पा ३
स्य सादिना॥ एकमात्रेति॥ एकमात्रपर्याप्तिवृत्तिके इत्यर्थः॥ अन्यथेति॥ एकमात्रपर्याप्तवृत्तिकधर्मावच्छिन्नप्रति
योगिताकस्येत्यर्थः॥ न चान्येति॥ एकमात्रापर्याप्तिवृत्तिकधर्मावच्छिन्नप्रतियोगिताकेऽभावे घटवृत्तिस्वादिप्र
तीतिवद्यद्दर्शनेन तत्रान्योन्याभावभेदेन॥ पृथक्त्वाभावेति॥ व्याकुलमिति॥ धर्मावच्छिन्नाभावानभ्युपगमे तादृशप्रती स६ हार
त्यनुपपत्तिरिति भावः॥ स्वतादृशप्रतीतेः पदार्थावर्णकत्वेनैवोपपत्तेर्नातिरिक्ताभावसाधकत्वमिति भा
व॥ तथा सति क्वचित् घटाभावः क्वचित्पटाभाव इति विषयभेदात्तादृगननुगमप्रतीत्यनुपपत्तेः॥ अनुगतधर्मं विना
नुगतप्रतीत्यसंभवात्॥ न च घटत्वपटत्वोभयावच्छिन्नप्रतियोगिताकाभावस्तथापि कुतो नामैकवृत्तित्वसमाधिकरण
धा ६ घटत्वपटत्वावच्छिन्नप्रतियोगिताकाभावानां प्रतियोगितावच्छेदकत्वमुपेयते॥ तथा च तस्यातिरिक्तत्वमा
नाभाव एवेत्यत आह॥ एकघटवतीति॥ घटोनास्तीति प्रतीतेर्घटद्वयं किंचित् घटप्रतियोगिकाभावोऽन
पयत्वाद्धि घटद्वयवत्यपि यत्किंचित्घटप्रतियोगिताकाभावसत्त्वाद्विशिष्टप्रतीत्यापत्तेः॥ यदि च घटत्वा
वच्छिन्नाभावो विषयः तदा एकघटवत्यपि घटोनास्तीति प्रतीत्यनुपपत्तिर्दुर्वारैव स्यात् अतिरिक्तो भावो
भ्युपेय इति भावः॥ ननु तद्घटवति तद्घटान्यघटत्वावच्छिन्नाभावः॥ घटांतरवृत्तित्वतदन्यघटत्वावच्छि
न्नाभावो विषयोऽवकुंठ्यत एवेति चेन्न॥ तथापि अनुगतधर्मं विनाऽनुगतप्रतीत्यनुपपादयितुमश

क्यत्वस्यप्रागेवोक्तत्वात्॥ननुयत्किंचित्त्वे[illegible]वतिघटपटौनस्तइतिप्रतीतेर्द्वित्वसामान्यंनप्रतियोगितावच्छेदकं
तथाविधयत्किंचिद्द्वयसत्त्वेतदवच्छिन्नाभावोऽसत्त्वान्नापिद्वित्वविशेषः॥ततद्वित्वेनानुपस्थितेःकेवलघटोभयस्यपि दि
तथाप्रत्ययेनप्रत्येकेघटत्वपटत्वादिकमिपितयेतित्यन्मेतेप्यनुगतप्रत्ययोऽनुपपन्नएवेतिचेन्न॥द्वित्वेद्वित्व
धर्मितावच्छेदकीभूतंघटत्वंपटत्वंतथाप्रतीयोगितावच्छेदकताचात्रव्यासज्यवृत्तिर्ग्राह्या॥प्रतियोगितावच्छे
दकतावच्छेदकावच्छिन्नंचघटपटोभयमितिनानुपपत्तिलेशोऽपीतिध्येयं॥तयोरितिप्रतियोग्यभावयोरे
काधिकरणावृत्तित्वरूपविरोधादित्यर्थः॥नन्वेकस्मिन्नपिसमवायेनद्वित्वमस्त्येवयतआह॥एकाव
वृत्तीति॥एकस्मिन्नपिसमवायेनद्वित्वस्यसत्त्वेनएकोद्वावितिप्रतीत्यापत्तिरतःसमवायेनतत्सत्त्वेऽपिप
र्याप्तिसंबंधेनतदसत्त्वान्नतथाप्रतीतिरितिरूपपं॥एवंचप्रतियोगिता[illegible]वच्छेदकपर्याप्त्यधिकरणेऽव
भावस्यविरोधेन्नतदनुपपत्तिरितिभावः॥प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्यविरोधात्प्रति
योगिमत्यपिनातिरिक्तविशिष्टाभावोविरुद्धइत्याह॥अतएवेति॥प्रतियोगितावच्छिन्नेनैवअभावस्य वच्छेदक
विरोधादेवेत्यर्थः॥स्यंदंडीतिपुरुषोनास्तीतिधीः॥तस्यपुरुषस्य॥नचक्वचिद्दंडाभावःक्वचित्पुरुषा
भावोविषयइतिवाच्यं॥विषयानुगमंविनाऽनुगतप्रतीत्यनुपपत्तिरित्यस्यासकृदावेदित[illegible]त्वात्॥त
नन्वायात्तपदार्थितरित्यातिरिक्तोभावस्तथापितज्ज्ञानविशेषणताप्रत्यासत्तिःकिंतुचक्षुरादिनावह्य
दिशानासंभवाधतेयानुमानादिप्रमाणांतरत्वंतथाअभावप्रत्यक्षमानंसंयोगादिसन्निकर्षाणांअभावेन
द्रियसंनिकर्षदृशाहरकत्वासंभवात्प्रामाण्यस्येवेद्रियस्याग्रेग्राहकत्वाचार॥अन्यथानिमीलितनयनस्यापि

67

अभावप्रतियो
गिज्ञानाभ्यां ४

घटादिप्रत्याप्तेरित्यनुपलब्ध्याख्यं प्रमाणांतरं मसावयाहुरभिप्रायः ।। न च विशेषणतैव संनिकर्षः तस्यासत्वेना
कॢप्तत्वात् । समवायानंगीकारेण समवायग्राहकत्वेनापि कॢप्तत्वाच्च ।। तथा घटाभावस्यानुपलब्धिरूपप्रमा
णजन्यमनुपलब्ध्यमेव ज्ञानं न तु साक्षात्कारः साक्षात्कारत्वस्यैंद्रियजन्यव्याप्यत्वात् ।। न चैवं निमीलितनय
नस्यापि घटाभावग्रहापत्तिः सन्निकर्षमेवानिरूपतरू नियमात् ।। अभावग्रहेऽधिकरणज्ञानस्य जन
कतया तज्ज्ञानार्थमिंद्रियापेक्षणात् ।। अत एव तज्जनकतयाऽन्यथासिद्धमिंद्रियं नाभावग्रहे हेतुः न त्वाधि
करणाध्यक्षस्य व्यापारतया न तेन तदन्यथासिद्धिः व्यापारेण व्यापारिणोऽन्यथासिद्धत्वासंभवात् ।। अ
न्यथा चक्षुःसन्निकर्षेण चक्षुषोऽप्यन्यथासिद्धिः प्रसज्येतेति वाच्यं ।। इंद्रियस्य जनकत्वसंभवेऽधिकरणाध्य
क्षस्य तद्व्यापारत्वं तद्देपनकॢप्तसन्निकर्षाभावात् ।। अत एवानुपलब्धिप्रमाणस्यापि सत्वाच्च व्यर्थ्यप्र
माणानीति असंगतमिति निष्कृष्टं तद्दूषयितुमुपन्यस्यति ।। तदाहित्यसादिना नैंद्रियग्राह्याः नैंद्रि
यजन्यलौकिकसाक्षात्कारविषयः ।। कॢप्तसन्निकर्षाणां संयोगादिपंचानां सन्निकर्षाणामभावेऽसंभवात् ।।
ननु तर्हि अभावग्रहानुपपत्तिरित्यत आह ।। किंत्विति ।। ईदृशा प्रमाणांतरजन्यज्ञाने च सन्निकर्षोऽपेक्षते नेन्नैंद्रि
यजन्यामिति भावः ।। प्रमाणांतरेति ।। धर्मिकल्पनातो धर्मकल्पना यां लघीयस्त्वादितियावत् ।। अनुपलब्धेः
अकॢप्तविजातीयप्रमांप्रतिकरणकल्पनमपेक्ष्य कॢप्तप्रत्यक्षप्रमाहेतुतया विशेषणतारूपसन्निकर्षक
ल्पनमेव लघीय इत्यर्थः ।। तथा चेंद्रियेणेवत कृ इति भावः ।। अन्यथेति ।। सन्निकर्षकल्पनयोपपन्नाव

न॰

68

ऽपि प्रमाणांतरकल्पनेत्यर्थः ॥ अन्यं सन्निकर्षांतराकल्पनमित्यर्थ इति दीपिकोक्तिः ॥ कृतानां संयोगादीनां त्रयाणां सन्निकर्षाणां ॥ शंकते ॥ कश्चेति ॥ असक्त एव ॥ अत एव विषय एव ॥ अयं शब्दः तथा च जन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुतया शब्देऽपि सन्निकर्षमावश्यकं ॥ सन्निकर्षत्वं च संयोगाद्यन्यतमत्वमिति भावः ॥ अध्यक्ष एवेत्यनंतरमस्तीबद्धीतिशेषः ॥ तथा चा[illegible]चापि अभावग्रहार्थं सन्निकर्षापेक्षणमावश्यकमिति भावः ॥ ननु शाब्देऽपि प्रमाणांतरोपपत्तेरित्युक्तं ॥ प्रतिबंदेरनुत्तरत्वात् फलोद्दिस्यपरसादात् ॥ किंचेति ॥ ननु व्यापाराव्यवधिफलायोगव्यवच्छिन्नकरणत्वमुपपद्यत एव अत एव साधकतमं करणमिति सूत्रमपीत्यत आह ॥ व्यापारवदिति ॥ निमीलननयनदशायामंधकारे च चक्षुषोऽपि फलायोगात् ॥ स्वेतरयावत्कारणसमवधाने यं यदव्यवहितोत्तरक्षणे कार्योत्पत्तिस्तत्त्वमेव फलायोगव्यवच्छिन्नत्वं वाच्यं ॥ एतस्य च यावत्कारणघटिततया गुरुरूपत्वेन व्यापारवत्कारणत्वस्यैव करणत्वात्स्वरूपतो निर्गतत्वेनानुपलब्धेः प्रमाणत्वव्याघात इत्य[illegible]ति भावः ॥ उक्तमिति ॥ तु उक्तप्रमाणमित्यर्थः ॥ वस्तुतस्तु धर्मिकल्पनायामन्यायेन परसन्निकर्षकल्पनं तेन तु प्रमाणांतरकल्पनमिति पूर्वोक्तियुक्तिरेव रमणीयेति हृदयं ॥ अनुपलब्ध्याख्यप्रमाणांगीकारे घटासवदिति घटभ्रमदशायां घटाभावसत्त्वादिंद्रियसंबंधविशेषणतया घटाभावप्रत्यक्षापत्तिः ॥ मन्मते च घटोपलंभसत्त्वेनानुपलब्धेरभावात् न तत्र तथापत्तिरित्यनायत्या प्रमाणांतरमावश्यकमित्याशयेन मीमांसक[illegible]शंकते ॥ नन्वेवमिति ॥ एवमनुपलब्ध्याख्यप्रमाणमनंगीकृत्य इंद्रियसंबद्धविशेषणतायाः अतिरिक्तायाः प्रत्यासत्तित्वे ॥ योग्यानुपलब्धेरपीति ॥ चक्षुषा घटो नेति प्रत्यक्षे जनन

पेत्तवतीति रिक्तत्वेनाभ्युपगतानामयोग्यानुपलब्धेः सहकारित्वं कल्प्यते। घटाभाववति चक्षुषोपलंभे तेन योग्यानुपलब्ध्य
ता॥ मेदावादेवनचयासा पप्रत्यक्षापत्तिरिति भावः। नन्वेवं किमवश्यमनुपलब्धेः प्रमाणत्वेनाभ्युपगतमिंद्रियस्य का
रणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनमाधिक्यमिति चेन्न। विजातीयप्रमाकल्पनापेक्षया प्रत्यासत्त्यंतरकल्पनाया
न्याय्यत्वाद्धा। पारवलस्त्वानप्रमाणत्वासंभवस्य पूर्वमेवदूषितत्वाच्चेति॥ अत्र तावद्यहो अभावलौकिकप्र
त्यक्षे॥ अयके यमस्ताव ग्रहे हेतुः॥ योग्यस्यानुपलब्धिरिति वायोग्यस्यानुपलब्धिरिति वा योग्यानुपल
ब्धिपदव्युत्पत्त्यर्थः। तत्राद्यमाशंकते॥ योग्यस्येति॥ जलपरमाणाविति॥ महत्त्वाभावे प्रत्यक्षानुरोधेन
विजातीयत्वकृतसंयुक्तविशेषणतया आवश्यमंग॥ कार्यतया पृथिवीत्वाभावस्यापि ग्रहापत्तिरिति तत्त्वा
वः॥ दूषणांतरमाह॥ स्तंभ इति॥ द्वितीयमाशंकां निराचष्टे॥ योग्येति॥ स्वैकदेशिमतं दूषयित्वा तंत्रमत
मुपन्यस्यति॥ यत्विति॥ वायाविति॥ वायोरयोग्यत्वादिति भावः॥ परमाणोर्महत्त्ववद्रूपहानापत्तेश्चेति द्र
ष्टव्यं॥ अनुभवेति॥ वायुर्नीरूपवान् परमाणुर्न महानित्यादिप्रत्यक्षजातानां विलोपप्रसंगादित्यर्थः॥
योग्याभावानुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह॥ अयोग्येत्यादीति॥ योग्येत्यस्य विवरणं सह
कारीति॥ तथा चाभावप्रत्यक्षसामग्रीविशिष्टप्रतियोग्यनुपलब्धेरेव योग्यानुपलब्धिरित्यर्थः॥ अत
एव सहकारिसंपन्नतद्रूपयोग्यत्वविशेषणादेव॥ योग्येति॥ योग्यसन्निकर्षस्यैवाभावप्रत्यक्षसा
जल२ मग्रीघटकत्वेनैव परमाणौ न पृथिवीत्वाभावग्राहकत्वं। उद्भूतरूपाभाववति वायौ तस्यासंभवादिति
+ महत्त्व इति भावः। ननु महत्त्वोद्भूतरूपवद्विशेषणतायाः पृथिवीत्वाभावग्राहकत्वे नापि

अ२

[illegible]ग्याभाव + २

तर्कसं २५ + एवंगुणादौपृथिवीत्वाभावप्रत्यक्षानुपपत्तिः तत्रइंद्रियसंनिकृष्टमहत्वादिमद्विशेषणताविहोरेत ४

प्रत्यक्ष २५

भावद

नत्वेंद्रियसंबंधविशेषणताया एवयोग्यसन्निकर्षत्वमुचितं॥एवंमनस्यणूद्भूतरूपाऽभावस्यसंस्यादतआह॥उद्भूतरू
पाभावेचेति॥उद्भूतरूपाभावग्रहेत्यस्यार्थः॥तथाचप्रकृतेरूपमपिनिवेश्यमहत्वंनिवेशनीयमितिभावः॥अतः
महत्वविशेषणात्॥तद्ग्रहः॥उद्भूतरूपाभावग्रहः॥वायादिवृत्तेर्नतद्ग्रह इत्यनुषज्यते॥ननुमहत्वाभावग्राह
कः कः सन्निकर्षः॥एवमन्योन्याभावग्राहकः योग्यः सन्निकर्षः क इत्यतआह॥एवमन्यत्रापीति॥महत्वा
हृ५ भावादावपीत्यर्थः॥मूले भावे इंद्रियसन्निकृष्टोद्भूतरूपवद्विशेषणतायोग्यः सन्निकर्षः॥ननुकुत्रचि
दिंद्रियसन्निकृष्टमहत्वादिमद्विशेषणता॥कुत्रचिदिंद्रियसन्निकृष्टमहत्वोद्भूतरूपवद्विशेषणतास
न्निकर्ष इत्यत्रकिंनियामकमतआह॥कार्यवशादिति॥तत्तत्तदभावग्रहानुरोधादित्यर्थः॥ननुपिशा
चत्वाभावादीनामपिप्रत्यक्षापत्तिस्तत्रयोग्यसन्निकर्षसत्वेनयोग्यानुपलब्धिसत्वादतआह॥पिशा
चत्वाभावस्येति॥अयोग्यत्वादिति॥प्रत्यक्षे विषयस्य हेतुतया अभावप्रत्यक्षेयोग्याभावस्यहे
तुत्वोपगमादितिभावः॥अयोग्यप्रतियोगिकस्यापिस्तंभे पिशाचभेदस्य ग्रहस्तु कस्मादतआह॥संताभा
वएवप्रवृत्तेति॥कोपुनर्योग्य इति॥उत्तरयति॥योग्यमात्रेति॥पिशाचस्यायोग्यत्वेनयोग्यप्रतियोगिकत्वा
भावादेवनतदभावप्रत्यक्षमितिभावः॥घटादिष्विति॥चान्यस्याभाववारणायमात्रेति॥अतींद्रियान्तिप्रति
योगिताकत्वाभावात्॥एवमेवदुःखत्ववत्संताभावप्रत्यक्षापत्तिरिमपितदर्थः॥ननुवायौरूपसामा
न्याभावप्रत्यक्षानुपपत्तिः तस्यातींद्रियप्रतियोगिकत्वेनयोग्यमात्रवृत्तिप्रतियोगिताकत्वाभावात

+ गुणादौपृथिवीत्वाभावग्रहेतु इंद्रियसंनिकृष्टविशेषणतैव॥अन्योन्याभावग्रहेपृथिवीभेदादौइंद्रियसंनिकृष्टमहत्वादिमद्वि शेषणत्वेवा योग्यः संनिकर्षः १०

(71)

एवमेतद्रूपत्ववदत्यंताभावग्रहस्थलापि द्विग्ध्येयस्यरसादाह। योग्यधर्मेति। पिशाचवद्घटपिशाचान्यतरत्वा
त्मादौ नायोग्यधर्मता भावेन न तदवच्छिन्नाभावप्रत्यक्षमिति भावः। यस्तु तत्तु योग्यमात्रप्रतियोगिके
योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं विशेषणमित्येव पाठः। योग्यमात्रप्रतियोगिकेऽभावे योग्यधर्मा
वच्छिन्नप्रतियोगिताकत्वं योग्यतेति यावत्। तत्र च भूतले द्रव्यसामान्याभाववारणाय योग्यमात्रप्र
तियोगिकत्वं एतद्रूपत्ववदत्यंताभाववारणाय योग्यधर्मेति। रूपसमान्याभावप्रत्यक्षं नेष्यत एवेति। वायौ
तदसंग्रहे ~~न्वे~~ न दोषाय। एतद्रूप एतद्रूपत्वान्यतरत्वावच्छिन्ना ~~सै~~ भाववारणाय योग्यधर्मेत्य
स्य योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थ इत्यवधेयं। ननु पिशाचवद्घटान्योन्याभावोप्य
योग्यत्वादेव न गृह्यते इति वाच्यं। तत्रान्योन्याभावे कायोग्यतानंगात् योग्यप्रतियोगिकत्वात्। तत्त्वे पिशाच भेद
ग्रहानापत्तेः। पिशाचवद्भेदग्रहापत्तेरित्यत आह। एवमन्यत्रापीति। अन्योन्याभावेपीत्यर्थः। अनुस
वानुसारेणेति। तत्तद्धर्मावच्छिन्नप्रतियोगिताकत्वमेव तदन्योन्याभावयोग्यत्वमित्यर्थः। अत एव।
क्वापुनरत्यंताभावे योग्यतेति सामान्यएवात्यंताभावयोग्यता निरुक्ता। अन्योन्याभावे तु अननुग
तैवेति ध्येयं। सर्वथेति। अत्यंतान्योन्याभावे इत्यर्थः। तादृशमिति। अत्यंताभावे योग्यमात्रे सादिरूपा ता
अन्योन्याभावे तादात्म्यान्योन्याभावत्वमित्येवंरूपा नानैवयोग्यतेत्यर्थः। ठमिति। अंगीकारार्थम
वयं। गुणयोग्यतावदिति। यथा रूपरसादौ न चादिंद्रिययोग्यत्वं नैकं तथा प्रकृतेपीत्यर्थः। केचित्तु॥

विजातीयचक्षुसंयोगाश्रयविशेषणताया अभावग्राहकत्वेनन परमाणौ पृथिवीत्वाभावग्रहः।पिशाचात्यंता
भावादिप्रत्यक्षवारणाय तु गुरुत्वादिवत्तादात्म्येन तत्तदभावत्वेन न साक्षात्कारं प्रति प्रतिबंधकत्वं।कार
त्वा० इत्याहुः॥तदसत्।परमाणौ महत्त्वाभावप्रत्यक्षानुपपत्तेः।धर्मिविजातीयचक्षुःसंयोगस्यावश्यकत्वात्तेन तत्र पृथिवी क्षु३
त्वाभावप्रत्यक्षवारणासंभवात्।पूर्वोक्तं च चक्षुरादिकं दर्शयितुमुपक्रमते॥अथ किमिदमिति।तेजसमिति॥
आलोकघ्राणादौ अतिव्याप्तिवारणाय यथायथमुभयोपादानं।चक्षुस्तैजसत्वे विवादात्।रूपग्राहक
मिति॥रूपग्राहकमात्रोक्तौ मनस्यतिव्याप्तिवारणाय रतो महदिति॥महत्त्वमात्रोक्तौ घ्राणादावतिव्या
७३ प्तिरतो रूपग्राहकमिति।रूपग्राहकमात्रोक्तौ आत्मनि अतिव्याप्तिरतः इंद्रियमिति॥अत्र केचित्।चक्षुः
प्राप्यप्रकाशकारित्वे चंद्रमसोग्रहणानुपपत्तेः।शाखाचंद्रमसोस्तुल्यकालग्रहणानुपपत्तेश्च।अप्रा
प्यकार्येव तद्वाच्यं॥एवं चाप्राप्यप्रकाशकारित्वाविशेषाद्दूरत्वकमेरुतादिनिपार्श्ववर्त्तिवदेव तस्येत्याहुः॥
तदसत्।चक्षुः अप्राप्यप्रकाशकारित्वेन निमीलितनयनस्यापि चाक्षुषापत्तेः।प्राप्यकार्येव तद्वाच्यं॥
चक्षुषः तैजसत्वेनातिशीघ्रगामितया चंद्रमसा संयोग उपपद्यत एव।शाखाचंद्रमसोस्तुल्यकाल
ग्रहणं च सिद्धं॥मया युगपच्छतपत्राणि भिन्नानीतिवत्।तथा च गोलकस्य घटादौ संयोगाभावेनाति
रिक्तं तैजसं चक्षुः स्वीकार्यं।एवमन्यत्रापि बोध्यं।वायवीयमिति।वायवीयत्वमात्रं वायावींद्रियत्व
मात्रं च चक्षुरादावतिव्याप्तमिति मिलितोपादानं।त्वचो वायवीयत्वे विवादादाह।रसग्राहकमिति।
स्पर्शग्राहकमिति।चक्षुर्मनआत्मनां वारणाय विशेषणत्रयोपादानं॥आप्यमिति।जलं च चक्षुरादावतिव्या

त्तिवारणाय विशेषणद्वयोपादानं॥ रसनस्याप्रत्यक्षत्वे विवादादाह॥ रसग्राहकमिति॥ चक्षुर्मनआत्मनां वारणोरेणावुयथाय
थं विशेषणत्रयोपादानं॥ पार्थिवमिति॥ व्यावृत्तिः स्पष्टैव॥ इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानका
रणमनःसंयोगाश्रयत्वं॥ आत्मनि अतिव्याप्तिवारणाय सत्यंतं॥ निर्विशेषः शब्दरूपविशेषगुणसत्त्वाच्छ्रोत्रेऽव्या
प्तेः॥ शब्देतरेति गुणविशेषणं॥ चक्षुषि तादृशरूपस्य सत्त्वादुद्भूतेति॥ उद्भूतत्वं नीलत्वादिव्याप्यानुद्भूतत्वाभा
वभिन्नाभावकूटवत्त्वमेव तस्य च संयोगादिसाधारण्यात्तस्यान्नकुरादावव्याप्ते विशेषेति॥ चक्षुरादेः सत्त्वा
दुणोदि॥ कालादावतिव्याप्तेर्ज्ञानकारणेति॥ इन्द्रियावयवसंयोगस्यापि प्रत्यक्षकारणत्वात् इन्द्रियावयवे
तिव्याप्तिवारणाय मनःसंयोगेति॥ श्रोत्रं लक्षयति कर्णेति॥ घटावच्छिन्ननभसोऽपि श्रोत्रत्वापत्तेः
कर्णशष्कुलीति॥ नभसः श्रोत्रत्वे विवादादाह॥ शब्दग्राहकमिति॥ मनो लक्षयति॥ निस्पर्शमिति॥ मनोवि णु ६
त्ववादिनां मीमांसकानां मतं दर्शयति॥ अत्र मीमांसकाद्युक्तादि॥ अणुत्वासत्त्वासिद्धावपि न विभुत्व
सिद्धिरत आह॥ किं चेति॥ निस्पर्शत्वं गुणादौ व्यभिचारीति द्रव्यत्वादीति॥ द्रव्यत्वं घटादौ व्यभिचारीति
विशिष्टहेतूपादानं॥ ननु चैतन्मते मनस एव निस्पर्शाणुत्वरूपासत्त्वेन पक्षतावच्छेदकासिद्धिरत
आह॥ मनस्त्वं चेति॥ आत्मन्यतिव्याप्तिवारणायात्मान्यत्वे सतीति॥ संयोगाश्रयत्वं कालादावपि इ
ति ज्ञानासमवायिकारणेति॥ चक्षुर्मनोयोगस्य ज्ञानकरणत्वात्॥ ज्ञानकरणसंयोगाश्रयत्वं चक्षु
रादावतिव्याप्तिरित्यतः समवायीति॥ ज्ञानासमवायिकारणत्वं च आत्ममनःसंयोग एवेनातिव्याप्तिः॥ इति

75

केचित्तु॥नवीनमतेऽदृष्टाद्यविशेषाकृष्टत्वे मनस्त्वेनपक्षतावच्छेदकस्यैक्याज्ञानात्॥कथंपक्षतावछेदका
वछेजानुमितिः॥तत्रैवविभुत्वेबाधेनकथंवातत्रैवविभुत्वानुमितिरतआह॥मनस्त्वंचेति॥नानासमवायि
कारणमिति॥पुरुषान्तरीयात्मप्रत्यक्षवारणायतत्तदात्मनोमानसत्वावच्छिन्नंप्रतितत्तदात्मनःतेनैतदात्मनःसं
योगत्वेनहेतुतायामनंतत्कोटौनामवच्छेदककोटौनिवेशोगौरवेणलाघवेनैवमनःसिद्धिः॥नचविजातीय
संयोगत्वेनतस्यहेतुतयानतत्रमनसोनिवेशइतिवाच्यं॥तथासमवायेनविजातीयसंयोगस्यविजाती
यसंयोगसंबंधेनमनसोवाहेतुत्वमितिविनिगमनाविरहइतिज्ञानवरसादः॥विभुत्वे॥मनसोविभुत्वे॥
संयोगानुपपत्तेरिति॥नचोपदर्शितानुमानेपक्षतावच्छेदकासिद्धिर्बाधश्चेतिभावः॥कर्मजः॥यथा
श्येनक्रिययाश्येनवृक्षसंयोगः॥अवयवसंयोगजः॥कारणाकारणसंयोगात्कार्याकार्यसंयोगः॥हस्त
तरुसंयोगात्कायतरुसंयोगइत्यर्थः॥नचविभोरिति॥मूर्त्तेतरद्रव्यत्वंविभुत्वंस्पंदत्वावच्छिन्नंप्रति म५
मूर्त्तत्वेनकारणतयामूर्त्तत्वाभावेनआत्मनिनकर्मोत्पत्तिरितिभावः॥अनयोः॥आत्ममनसोः॥तत्संयोगजः
अवयवसंयोगजः॥मानाभावादिति॥नित्यसंयोगग्राहकप्रत्यक्षादेरसत्त्वात्॥अनुमानस्यचाप्रयोजकत्वादित्यर्थः॥
साधकाभावमुक्त्वाबाधक[illegible]मप्याह॥संयोगत्वावच्छेदेन॥संयोगत्वावच्छिन्नंप्रतिद्रव्यत्वेनहेतुतयानकार्य
तावच्छेदकजन्यसंयोगत्वमेवनित्यसंयोगांगीकर्त्रावाच्यं॥कार्यमात्रवृत्तिधर्मस्यैवकार्यतावच्छेदकत्वात्॥तथाचजन्य
त्वनिवेशेगौरवमेवनस्वीकारेप्रतिकूलतर्कइतिभावः॥ननुसमवायेनरूपंप्रतिसामानाधिकरण्यसंबंधेनावयवरू

75

पादनां हेतुतया कपाल गंधादावपि रूपोत्पत्त्यापत्तेर्जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतावश्यकतया संयोगत्वावच्छिन्नं प्रति लाघवात् तु द्रव्यत्वे मानाभाव इति न दूषितं गौरवमत आह ॥ अप्रयोजकं चेदमिति ॥ इदं विभुत्वसाधकमनुमानमित्यर्थः ॥ अनुकूलतर्कसत्त्वादित्यर्थ इति भावः ॥ संयोगत्वावच्छेदेनेति ॥ संयोगस्य द्रव्यजन्यत्वव्याप्यत्वेनानित्यत्वप्रसंगस्वीकारेणादेशनियमभंगप्रसंगादिति भावः ॥ ननु तादृशनियमे मानाभाव इत्यत आह ॥ अप्रयोजकं चेन्नेत्यपरे ॥ नानातर्कविचारणैकमतिना यत्किंचिदुक्तं मया तद्यत्नेन हृदा विभाव्य सुधियः सारार्थसंग्राहकाः ॥ हृद्येन धिदिधारयेद्दीपजनः संजायते सोऽचिराद्धाद्योद्गः परवादिदूषणशताघानैकदक्षः कृती ॥ १ ॥ ॥ इति श्रीमद्दमा मुकुन्द णिक्यमुकुटेराजनीराजनीराजननीराजितपदद्वन्द्वन्यायवागीशश्रीदीक्षितश्रीकण्ठविरचितायां न्यायसिद्धान्तमञ्जरीदीपिकायां प्रत्यक्षखण्डः समाप्तिमगमत् ॥ ॥ वैकुण्ठाधिपतेरंशः श्रीव्यंकटाचलवासकः ॥ प्रत्यक्षखण्डं लिखने तव प्रीतोऽस्तु वल्लभः ॥ १ ॥ ॥ प्रत्यक्षनिरूपणानंतरं उपजीव्योपजीवकभावसंगत्यानुमाननिरूपणम्प्रतिजानीते ॥ अथेति ॥ अथशब्द आनंतर्यवचनः ॥ तत्र प्रत्यक्षनिरूपणस्यार्थादवधित्वमवगम्यते ॥ अत एव सिद्धत्वमपि ॥ निरूप्यत इति वर्तमानार्थकलट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वं लाभः ॥ एवं च सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायेन मलिनितवपुः स्नायादित्यत्रैवात्रापि प्रत्यक्षानुमाननिरूपणयोरुपजीव्योपजीवकभावलाभः ॥ तथा चोपजीवकत्वसंगत्याऽनुमाननिरूपणमावश्यकमिति ~~भावः~~ लाभः ॥ अत्र यद्यपि अनुमितिकरणत्वेनानुमानज्ञानेन प्रत्यक्षज्ञाना

+ सविशेषणे विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामत इति न्यायेन १

पेक्षेति तन्निरूपणयोरुपजीव्योपजीवकभावासंभवस्तथापि सविशेषणे हीति न्यायेनानिरूपणप्रत्यक्षानुमानयोरुप
जीव्योपजीवकभावलाभः ॥ अत्रे चोपजीवकं निरूप्याथोपजीव्यनिरूपणादुपजीवकत्वादिसंगतेरानंतर्यनियामकत्व
पि स्वतंत्रेच्छस्येति न्यायेनेच्छाया नियामकत्वान्न पौर्वापर्यनियम इति ध्येयं ॥ ननु निरूपणस्य जिज्ञासायाः विषयांतरसंचा
राहित्यस्वरूपशिष्यावधानप्रयोजनकत्वे उन्मत्तगलितपतितत्वादिनिरासाय संगत्याभिधानस्यैवोचितत्वं ॥ ननु संगतिप्रद
र्शनस्यापि प्रयोजनसत्त्वादिति चेन्न ॥ द्विविधं शिष्यावधानं अनुपेक्षणीयत्वरूपं विषयांतरसंचाराराहित्यरूपं च ॥ तत्रा
संगतस्य ज्ञाने नोपेक्षासंभवात् ॥ संगतिप्रदर्शनमावश्यकं ॥ तथा च संगतिज्ञाने सति असंगतत्वज्ञानासंभवात् नासं
गतत्वज्ञानप्रयुक्तोपेक्षणीयत्वं ॥ द्वितीयं च निरूपणत्वनिश्चयेति परमरहस्यमत्रानुसंधेयं ॥ ग्रंथमध्येपि मंगल
करणादथशब्दो मंगलार्थ इत्यपि वक्षितं ॥ आनंतर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं तथा च प्रत्यक्षनिरू
क्षण॰ पणध्वंसाधिकरणक्षणवृत्तिवर्तमाननिरूपणविषयमनुमानमिति शाब्दबोधः ॥ तत्र लक्षणस्वरूपप्रामाण्यादि
ण॰ प्रकारकनिरूपणविषयेऽनुमाने ॥ करणत्वमात्रस्य कुठारादौ मितिकरणत्वस्य प्रत्यक्षादावतिव्याप्तिवारणायानु
मितिकरणत्वमिति विशिष्टोपादानं ॥ ननु अनुपश्चान्मितिज्ञानं मितिव्युत्पत्त्या किंचिज्जन्यज्ञानकरणत्वं लक्ष
णं तच्च प्रत्यक्षादावतिप्रसक्तमेवेत्यत आह ॥ अनुमितित्वं चेति ॥ तथा च न किंचिज्जन्यज्ञानत्वमनुमितित्वं अपितु जाति
विशेष एव ॥ तदवच्छिन्नत्वं च न प्रत्यक्षादाविति नातिव्याप्तिरिति भावः ॥ यद्यप्यनुव्यावर्तनव्यवहारो वा लक्षणस्य
प्रयोजनमिति नियमेनेतरभेदानुमापकमेव तल्लक्षणं ॥ इतरभेदानुमानं च अनुमानं प्रत्यक्षादिभ्यो भिद्यतेऽनु
मितिकरणत्वात् । यन्नैवं तन्नैवं ॥ यथा प्रत्यक्षादात्माकारकं ॥ तच्चानुमितेः प्रत्यक्षादिभिन्नत्वे लक्षणाज्ञाने

त५ त्वी

प्रत्यक्षप्रमाणेपि अनुमितिकरणत्वग्रहसंभवेन प्रत्यक्षभेदासत्वे नच व्यभिचार[illegible]नापत्तेरिति लक्षणत्रयोक्तानमनुपपन्नमि-
त्यत आह ॥ अनुमितित्वं चेति ॥ प्रत्यक्षप्रमित्यनंतरमनुमिनोमीत्यनुव्यवसायानुदयात् ॥ प्रत्यक्षव्यावृत्तमनुमितित्व-
५२ मेवतादृश्यः ॥ तच्च न प्रत्यक्षप्रतीतिप्रत्यक्षप्रमितिविलक्षणप्रमितिकरणत्वहेतुकमितरभेदानुमानं दुष्करमेवेति न कोपि दो-
षदीत्यसारं ॥ केचित्तु ॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वमेवानुमितिकरणत्वं वाच्यं ॥ तत्र च व्याप्तिज्ञा-
नत्वादेरेवागमकत्वसंभवेनाधिक्यस्य वैयर्थ्यमितीतरभेदानुमानमनुपपन्नमित्यत आह ॥ अनुमितित्वं चेति ॥
तथा च जातिरूपानुमितित्वावच्छिन्नकरणत्वमेव लक्षणं तत्केरूपप्रमिति नव्यर्थत्वशंकापीत्याहुः ॥ नन्वेवमनुमान-
त्वमनुमितिकरणत्वं तथा चेतरभेदानुमाने पक्षतावच्छेदकहेत्वोरस्तोऽन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया हेतोः सा-
ध्याधिकरणवृत्तित्वैरूप्यव्याप्तिज्ञाने जायमाने एव तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृत्तित्वग्रहसंभ-
वेन पक्षतावच्छेदकाश्रये साध्यसिद्धेः सिद्धसाधनतापत्तिरिति तयोर्भेद आवश्यकः ॥ यदि च हेतौ साध्याधिकरण-
वृत्तित्वज्ञानेपि पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुदयान्न सिद्धसाधनतावकाशः ॥ अन्यथा पृथिवीतरेभ्यो भि-
द्यते गंधवत्वादित्यत्रापि पृथिवीत्वाधिकरणे घटादावितरभेदस्य निश्चितत्वादनुमित्युच्छेद एव स्यात् ॥ किंच
व्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिकरणतया साध्यसामानाधिकरण्यस्य तेनाघटकत्वेन न सिद्धसाधनमिति वि-
भाव्येत तथापुद्देश्यतावच्छेदकविधेययोरैक्ये शाब्दबोधानुपपत्तिरेव ॥ अन्यथा दंडवान् दंडवानित्यादेर्निराकांक्ष-
त्वानुपपत्तेरिति ॥ मैवं ॥ अनुमानपदव्योवाच्यत्वस्य ल[illegible]तावच्छेदकत्वेन क्वाप्यनुपपत्तेरभावादिति ॥ के-
चित्तु ॥ नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधानभ्युपगमादनुमितिकरणमित्यस्यानुमितिसंबंध्य-

५५ २

(78)

नु१ किंच २

भिन्नं करणमित्यर्थः ॥ ज्ञानपूर्वकमाप्यनुमितिः करणं व्युत्पत्त्यकरणं बोध्यते । तथा चानुमितिकरणमनुमितिसं
बंध्यभिन्नं करणमिति शाब्दबोधोनानुपपन्नः ॥ करणतायाः कार्यधीरत्वेनानुमितिकरणत्वस्य करणपदा
र्थत्वेपि अनुमितिकरणमनुमितिसंबंध्यभिन्नानुमितिकरणमिति शाब्दबोधोपि नानुपपन्नः ॥ विधेयतापर्या
प्त्यधिकरणोद्देश्यतावच्छेदकयोरैक्य एव शाब्दबोधानुपगमात् ॥ अन्यथा दण्डवान् रक्तदण्डवानित्यादिबोधानुपपत्ते
रित्याकूतः ॥ नन्वनुमितित्वस्यैवानुमितिलक्षणत्वे लक्षणलक्ष्यतावच्छेदकयोरैक्यमित्यत आह । जन्यज्ञा
नेति ॥ जन्यज्ञानजन्यत्वाव्यभिचारिणी जन्यशब्दधीजन्यत्वव्यभिचारिणी च या जातिस्तद्वत्त्वमेवानुमितिलक्षणा
र्थः ॥ जन्यज्ञानं व्याप्तिज्ञानं तज्जन्यत्वाव्यभिचारिणी तज्जन्यत्वव्याप्य जन्यशब्दधीजन्यत्वस्य व्यभिचारिणी च या जा
तिरनुमितित्वं तद्वत्त्वमादाय लक्षणसमन्वयः । तथा च तस्य स्वरूपतः लक्ष्यतावच्छेदकत्वेन तादृशजातित्वेन च ल
क्षणत्वेन न तयोरैक्यमिति भावः ॥ नन्वनुमितिमदनुभवत्वमेव लक्षणमस्तु किमेतावद्विशेषणेनेत्यत आह । प्रत्यक्ष
त्वेनेति ॥ अतिव्याप्तिं वारयति ॥ ज्ञानजन्येति जन्यज्ञानाजन्यस्येत्यर्थः ॥ निहले ईश्वरसाक्षात्कारे नदीति ॥ तत्प्रत्य
क्षत्वं जन्यधीजन्यत्वं जन्यज्ञानजन्यत्वं तथा च प्रत्यक्षलक्ष्यजन्यज्ञानजन्यत्वाव्यापित्वान्नातिव्याप्तिरिति भावः । तत्रा
पि जन्यज्ञानजन्यत्वाव्यभिचारित्वदुर्लभेपि ॥ अतिव्याप्तिमुपपादयति ॥ तद्धीति चाक्षुषत्वं हीत्यर्थः । तदाश्रयाणामि
ति ॥ चाक्षुषत्वाश्रयाणामित्यर्थः ॥ जन्यपदोपादाने च चाक्षुषत्वस्य जन्यज्ञानाजन्ये निर्विकल्पके सत्त्वेऽजन्य
ज्ञानजन्यत्वाव्यभिचारित्वान्न तदादाय प्रत्यक्षेऽतिव्याप्तिरिति भावः ॥ जन्यजन्यत्वाव्यभिचारी स्फुटत्वेपि चा
क्षुषत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वात्तथैवातिव्याप्तिरित्यतः ज्ञानेति ॥ ज्ञानत्वाव्यभिचारी स्फुटोत्र

१ =यदि च ज्ञानपदोपादानेपि कालोपाधिविधया जन्यज्ञानजन्यत्वं निर्विकल्पकेपीति चाक्षुषत्वमादायोक्तदोषतादवस्थ्या=
=जन्यज्ञाननिरूपितासाधारणजन्यता वक्तव्येति विवेचनीया । तथा च ज्ञानपदानुपादानेपि जन्यज्ञानत्वावच्छिन्नप्रत्यासत्त्व शरीरत्वेन=
=निरूपितया शरीरादिनिरूपिताऽसाधारणजन्यत्वं निर्विकल्पक इति तद्वैयर्थ्यमिति विभाव्यते तथापि चाक्षुषत्वावच्छिन्नं प्रति चक्षुषु

=हेतुतया जन्यचक्षुरादिजन्यत्वस्याप्यच्चाक्षुषत्वेतितद्दो=
=षवारणाय ज्ञानपदमिति वेदाः । तथा च जन्यज्ञाननिरूपितासाधार
णजन्यत्वमित्यर्थ इति न कोप्यनुपपत्तिः ॥ जन्यज्ञानाव्यभिचारित्वे
ज्ञानाव्यभिचारिजन्य = १

79

त्यक्षादेरवारणात्। जन्यज्ञानजन्यत्वाव्यभिचारीत्यंतं। जन्यज्ञानजन्यत्वसामानाधिकरण्येनुक्तौ स्वज्ञानत्वस्य
स्मृत्वादेरेवावरणादव्यभिचारीति। ननु तथापि जन्यज्ञानजन्यत्वाव्यभिचारिजातिमदनुभवत्वं स्यात्तादृ
शत्वं व्यभिचारीत्यंतेन्यपि तत आह। उपमितित्वेति। उपमितित्वशाब्दत्वयोरितिदशवाक्यार्थज्ञानपदज्ञानादिरूपज
न्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरिति भावः। अतिव्याप्तिं निराकरोति। तद्भिन्नेति। उपमितित्वशाब्दत्वं हेस
हीत्यर्थः। यथोक्तज्ञानेति। जन्यपदज्ञानस्येत्यर्थः। तदेवोपपादयति। उपमितीनामिति। अतिदेशेति। गोसदृ
शो गवय इति गवयपदवाच्य इत्याकारकशब्दविषयज्ञानजन्यत्वादित्यर्थः। सर्वासामित्यनेनोपमितित्वस्यता
दृशज्ञानजत्वव्याप्यत्वं लब्धं। एवं चाव्यभिचारित्वस्य तत्राप्यत्वान्नातिव्याप्तिरिति भावः। शाब्दानुभवानां शब्द
बोधात्मकानुभवानां। क्वचिच्छब्दानुभवानामिति पाठः। तत्र शब्दप्रयोज्यानुभवानामित्यर्थः। ननु तत्र प्रथमजन्य
त्वोपादानवैयर्थ्यमित्याशयेनाशंकते। न चेति। व्यभिचारीत्येवकारेण प्रथमजन्यत्वव्यवच्छेदः। उत्तरयति। अ
नुमितित्वस्येति। असंभवादिति। तथा च तादृशजात्यप्रसिद्ध्या तद्दलमादाय न लक्षणगमनसंभव इति भावः।
न चेति। निषेधति। तस्येति। न च ज्ञानवृत्तिवैजात्यस्येत्यर्थः। शब्देति। आसारादिभ्यो भिन्नः। तत्वमसी
त्यादिवाक्यविशेषविषयकेत्यर्थः। इदं च मननेन शाब्दस्याप्युपनीतज्ञानमभ्युपेतम्। अव्यभिचारित्वादिति। तथा च
तस्य शब्दज्ञानजन्यत्वव्यभिचारित्वाभावादेवावारणमिति भावः। ननु निदिध्यासनोपेक्षणं मननं तत्त्वज्ञान
जनकमतस्तस्यापि शब्दज्ञानजन्यत्वव्यभिचारित्वमेवेत्यत आह। जातिपदेनेति। चाकारश्चात्रज्ञानस्य म
ननजन्यत्वानंगीकारेपि न क्षतिरिति सूचनाय। यद्वा ननु शरीरादिभ्यो भिन्नत्वेन श्रुतस्यात्मनः युक्तिभिरनु

८०

चिंतनंमननं ॥ तदुक्तं ॥ मंतव्यश्चोपपत्तिभिरिति ॥ तच्चानुमानादिजन्यमनुमित्यात्मकमेव ॥ अनुमितोऽपनीतत्तान निषे
धेन तस्य शब्दविषयकत्वासंभवात् लिंगोपहितलैंगिकभानेऽप्रमाण्याभावेन लिंगविषयापि शब्दस्यानुमितौभा
नासंभवाच्च ॥ तथा च शब्दज्ञानजन्यत्वव्यभिचारित्वमक्षुण्णमेवेत्यत आह ॥ जातिपदस्येति ॥ चाकारश्च मनन
२क. स्य शब्दविषयत्वानभ्युपगमेपि न क्षतिः ॥ इति सूचनार्थमिति ॥ केचित्तु ॥ शब्दविशेषविषयकेति ॥ श्रोतव्यो मंत
व्य इत्यादिवेदवाक्यरूपशब्दज्ञानेत्यर्थः ॥ जन्यशब्देति ॥ जन्यत्वप्रयोज्यत्वं जन्यशब्दज्ञानप्रयोज्यत्वाव्यभि
चारित्वादित्यर्थः ॥ तथा च जन्यशब्दघोऽजन्यत्वव्यभिचारित्वपदेऽजन्यशब्दज्ञानप्रयोज्यत्वव्यभिचारित्वमेव विवक्ष
णीयं तत्र ज्ञानत्वनिवेशात्तस्य च शब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव नातिव्याप्तिप्रसंगः ॥ ननु तत्कृत्यादिवारणाय
जातिपदस्य मानसाव्यक्तिजातिपरत्वावश्यकत्वेन तत एवात्रापि अतिप्रसंगवारणे किं जन्यत्वपदस्य प्रयोज्यत्वपर पद २
त्वमंगीकृत्य तद्दशातिव्याप्तिवारणेनेत्यत आह ॥ जातिपदं वेति ॥ वाकारश्च जन्यत्वस्य प्रयोज्यत्वाभावेपि न क्षतिरि
ति सूचनाय स्वार्थमिदं ॥ तदसत् ॥ शब्दज्ञानप्रयोज्यत्वव्यभिचारित्वविवक्षणे वेदादिवाक्यरूपशब्दज्ञा
नजन्यादृष्टजन्यत्वस्यानुमितावपि सत्त्वेनानुमितित्वस्यापि प्रयोज्यत्वव्यभिचारित्वासंभवादसंभवापत्तेरिति ॥
अत एवेति ॥ जातिपदस्य मानसाव्यक्तिपरत्वादेवेत्यर्थः ॥ तत्किं चेति ॥ आराध्यत्वेन ज्ञानं भक्तिः ॥ आरा
धनाच गौरवत्वे प्रीतिहेतुभूता क्रिया ॥ तत्फलावश्यंभावनिश्चयः श्रद्धेति तल्लक्षणं बोध्यं ॥ आराध्यत्वभक्ति
ज्ञानं विना आराध्यत्वेन ज्ञानासंभवादेवं फलज्ञानं विना फलावश्यंभावनिश्चयासंभवाच्च भक्तिश्रद्धाल
पोऽजन्यज्ञानजन्यत्वाव्यभिचारित्वस्य सत्त्वाऽजन्यशब्दघोऽजन्यत्वव्यभिचारित्वस्यापि सत्त्वात्तत्रातिव्याप्तिः ॥

जातिपदस्यमानसावृत्तित्वपरत्वे च एतयोर्मानसवृत्तित्वेन नातिप्रसंग इति ॥ ननु भक्तित्वश्रद्धात्वादेर्जातित्वे माना
भावादेव नातिव्याप्तिरित्यत आह ॥ आदिरिति ॥ आदिना आपत्तिपरिग्रहः ॥ आपाद्यत्वस्य विधेयतातिरिक्त
त्वे मानाभावेन वह्न्यनुमित्सनन्तरमपि वह्निमापादयामीति प्रतीत्यापत्तेः ॥ तादृशानुव्यवसायप्रतिवह्निविधेय
कोपत्तित्वेनैवेह नुतायां आपत्तित्वजातेरावश्यकत्वेन तद्वारणाय जातिपदस्य मानसावृत्ति जातिपरत्वमाव
श्यकमिति हृदयं ॥ अनुभवपदव्यावृत्तिमाह ॥ अनुभवपदमिति ॥ स्मृतिवारणायेति ॥ स्मरामीत्यनुगतप्र
तीत्या अनुभवसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धस्मृतित्वमादाय अतिप्रसंगवारणायेत्यर्थः ॥ स्मृति
त्वस्याखण्डत्वेपि अनुभवपदोपादाने च स्मृतिभिन्नज्ञानत्वरूपानुभवत्वस्य स्मृतावसत्त्वान्नातिव्याप्ति
रिति भावः ॥ ननु तथाप्येतादृशपरोक्षत्वजातिमादायैतल्लक्षणस्य शाब्दबोधादावतिप्रसंगः ॥ न च ता
दृशजातौ मानाभावः ॥ अनुमित्यादिस्थले बाधादिप्रतिबध्यतायां आहार्यप्रत्यक्षे व्यभिचारवारणाय
प्रत्यक्षान्यज्ञानत्वस्यावश्यं निवेशनीयतया तेषां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवात्तदपे
क्ष्य परोक्षत्वजातेरेव प्रतिबध्यतावच्छेदकत्वौचित्यादित्यत आह ॥ दितीति ॥ अनुभवत्वं विहाय परोक्षत्वं
स्मृतौ परोक्षत्वं विहायानुभवत्वं प्रत्यक्षे अनुमितौ चानयोः समावेश इति अनुभवत्वेन संकोचान्न परो
क्षत्वं जातिः ॥ एवंपि भिन्नविषयकानुमित्साविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धानु
मित्यन्यज्ञानत्वरूपजातिमादाय संकरा विधेयताया आपत्तित्वावारण्य न बाधप्रतिबध्यतावच्छेदक

त्वर

र

श्री

82

वासंभवेपि अनुमित्यादौ विशिष्यानुमितित्वादिकं निवेश्यैव वा पक्षबुध्याद्देः प्रतिबंधकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः॥
अत एव शाब्दबोधे बाधबुद्धेः प्रतिबंधकत्वाकल्पनया लाघवयोग्यताज्ञानं शाब्दबोधे हेतुरिति सिद्धांतः॥ अनो
यत्वाप्रत्यक्षान्यत्वं निवेश्यैव वा आहार्यप्रत्यक्षे व्यभिचारवारणीयः॥ वस्तुतस्तु जन्यतासंबंधेन बाधाविशिष्ट
ज्ञान४ न्येयावच्छिन्नं प्रतिबाधकत्वस्य हेतुत्वोपगमेन प्रत्यक्षानुमितिसाधारणैककार्यकारणभावेनैवोपपत्तेः
परोक्षत्वानिवेशस्यानर्थक्यात्॥ इच्छाविशिष्टत्वावच्छिन्नं प्रतिइच्छाया हेतुत्वेन इच्छाभिन्नबाधकाले सिद्धिशब्दव
व्यापत्तेः॥ अन्यथा इच्छाया उत्तेजकत्वे अप्रामाण्यज्ञानाभावादिभिर्विशेषणविशेष्यत्वे विनिगमनाविरहदुस्सा
दिकं बहुतरं महनीयं॥ नन्वनुमितित्वजातौ मानाभावेन क्षुण्णमसंतावि॥ न चानुमिनोमीत्यनुव्यवसायविष
यतया तत्सिद्धिः योग्यात्मविशेषगुणानां विषयाधीनमात्रेण साक्षात्त्वानभ्युपगमेन केवलमनुमिनोमीत्यनु
व्यवसायस्यासिद्धेः॥ न च पर्वतो वह्निमानुमिनोमीत्यनुव्यवसायतया तत्सिद्धिरिति वाच्यं॥ वह्निप्रकारकानु नु९
मितित्वस्य तद्विषयत्वे वह्निमान्पर्वतो घटवानित्यनुमित्यनंतरं तादृशव्यवसायापत्तेः॥ वह्निनिष्ठविधे
यताशालित्वस्य तद्विषयकत्वावश्यकत्वेन अनुमितित्वस्यानिवेशात् तद्विषयतया तत्सिद्धेरसंभवात्॥ न च पर्व न५
तोद्देश्यकवह्निविधेयकानुमितित्वस्य धूमपरामर्शजन्यतावच्छेदकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरि
ति वाच्यं॥ साधनादिभेदेनन्यायाभिन्नतया आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वाव्यव
हितोत्तरक्षणोत्पत्तिकत्वसंबंधेन धूमपरामर्शविशिष्टज्ञानस्यैव तत्कार्यतावच्छेदकत्वावश्यकत्वेन त
स्यानुमितित्वमनिवेश्य धूमपरामर्शजन्यतावच्छेदक[illegible]पगमात्॥ तत्कोटिप्रविष्टतया तत्सिद्धेरसंभवात्॥

+ स्वसामानाधिकरण्योभय २ × कोटौ ज्ञानत्वस्यैव

मा॰

एवंसिद्धता व विशिष्टस्यैव सिद्धसाधकार्यतावच्छेदकत्व यत्तत्कार्यतावच्छेदकत्वयापि न तत्सिद्धिरिति ॥ नैवं । वह्निनि
ष्ठविधेयताशालिज्ञानत्वस्य वह्निमानुमिनोमीत्यनुव्यवसायविषयत्वे पर्वतो वह्निमानित्यादिस्यापत्त्यनंतरम
पितादृशानुव्यवसायापत्तेः ॥ तथाहि ॥ वह्निं पादयामीत्यनुव्यवसायस्य वह्निप्रकारकोपस्थितिविषयत्वे वह्नि के३
मान्पर्वतो घटवान्स्यादित्यापत्त्यनंतरमपि तादृशशाब्दानुव्यवसायापत्त्या वह्न्यापाद्यकापत्तित्वमेव तद्विष
योवाच्यः ॥ नत्र चापाद्यस्यैव तस्यापाद्यत्वेदं न भिन्नस्यातिरिक्तस्य कल्पने गौरवात् ॥ अनुमित्सादिसाधा
रणविधेयत्वमेवापाद्यत्वं तथा चानुमित्सनंतरमापादयामीत्यनुव्यवसायापत्त्या आपत्तित्वस्यैवापत्त्यनं
म तरंप्यनुमिनोमीत्यनुव्यवसायापत्तेरनुमितित्वस्यापि सिद्धेः ॥ एवं पर्वतो वह्निरित्यादि शाब्दबोधा[illegible] नंतरम
पितादृशानुव्यवसायापत्तिः ॥ शाब्दबोधे आद्यनिर्दिष्टस्यैवोद्देश्यत्वेन चरमनिर्दिष्टस्य च विधेयत्वेन त
त्र वह्नौ विधेयताया आवश्यकत्वात् ॥ अन्यथा वह्निपर्वतन्ज्ञानित्ययोरुद्देश्यविधेयभावेन स्वीकारे
पर्वतो वह्निः वह्निः पर्वत इति शाब्दबोधयोरुद्देश्यविधेयभावावैलक्षण्येनावैलक्षण्यप्रसंगात् ॥
अथ विधेयतायामनुमितित्वे च मानाभावः ॥ वह्निप्रकारकज्ञानत्वस्यैव वह्निमनुमिनोमीत्यनुव्यवसा
यविषयत्वात् ॥ विषयतया तादृशानुव्यवसायं प्रति च तत्तदनुमितिसामग्रीविशिष्टज्ञानत्वेन तादात्म्य
प्रत्यासत्त्या हेतुत्वं कार्यतावच्छेदकं च वह्निप्रकारकतत्सामग्रीविशिष्टज्ञानविषयकमानसत्वमेव ॥ तत्तद
नुमितिसामग्री च बाधाभावसिद्ध्यभावतत्परामर्शादिरूपा सामग्रीवैशिष्ट्यं च स्वाव्यवहितोत्तर
क्षणोत्पत्तिकत्वसंबंधेन न चैतदपेक्ष्य वह्निनिष्ठविधेयताशाल्यनुमितित्वेन हेतुत्वे लाघवाद्विधेयता

तर्क·प्र·४२।

तर्क० ४२

याऽनुमितित्वस्य च सिद्धिरितिवाच्यं ॥ लाघवमात्रेणातिरिक्तविषयतासिद्धौ अव्यवहितोत्तरत्वादेर्विनिवेशगौर
वेण धर्मपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनापि अतिरिक्तविषयतासिद्धिप्रसंगात् ॥ एवमनुमितिप्रति
विलक्षणविषयताशालिज्ञानत्वेनैव हेतुतोपपत्तौ व्याप्त्यादिविषयतानिवेशप्रयोजनाभावाच्चेति चेन्न ॥ ला
घवमात्रेणातिरिक्तविषयतासिद्धेरभावात् ॥ विधेयतायां मानाभावेन सामग्रीविशिष्टज्ञानत्वेन हेतुत
स्यावश्यकत्वे विधेयताया अपि वानुमितित्वेपि मानाभाव इति चेन्न ॥ लाघवेनातिरिक्तविषयताया अन
भ्युपगमेपि आपत्यनंतरं तादृशानुव्यवसायवारणाय बाधाच्चावश्यावच्छेदककोटौ निवेशगौरवात् ॥
तद्घटितानुमितिसामग्रीविशिष्टवह्निप्रकारकानुमितित्वेनैवापत्यनंतरं तादृशानुव्यवसायवारणे ला
घवेनानुमितित्वजातेरावश्यकत्वात् ॥ वस्तुतस्तु ॥ सामग्रीजन्यत्वानुपस्थितिदशायामपि वह्निमनुमिनो
मीत्यनुव्यवसायोदयात् सामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विषयताभावेन वह्निनिष्ठविधेयता या
शालिअनुमितित्वावच्छिन्नाभावस्य तद्विषयतावश्यकत्वात् ॥ विधेयताऽनुमितित्वजातेश्च सिद्धिः ।
न च स्वव्याप्यवत्तापरामर्शादिघटितसामग्रीनिविशिष्टज्ञानत्वसंबंधावच्छिन्नसाध्यनिष्ठप्रति
योगितावच्छेदकताकज्ञानाभाव एव तद्विषयेतिवाच्यं ॥ तस्य संबंधत्वे मानाभावात् ॥ उक्तस्य निया
मकसंबंधस्याभावश्च प्रतियोगितानवच्छेदकत्वाच्चेति कृतं पल्लवितेन ॥ ननु ज्ञायमानलिंगस्यानुमिति
करणत्वे तु अतीतानागतहेतुकानुमितेरपलापः ॥ तस्यानुमितेः पूर्वमसत्वात् ॥ अन्यस्य च व्यापत्वे
नाद्यानात् ॥ व्याप्तेरैक्याभावेन यत्र विरोध्यविशेषणमिति न्यायेन परामर्शस्तत्र परामर्शत्वं
व्याप्तिज्ञानस्यासत्त्वेन च व्याप्तिज्ञानत्वेनापि करणत्वासत्त्वकल्पितपृच्छेति ॥ नन्विति ॥ लघुपदार्थेति ॥
५+ अत्र च संसर्गतया सामग्रीजन्यत्वनिवेशात् तदनुपस्थितिदशायामनानुमिनोमीत्याकारकानुव्यवसायानु व्यपर्ति ॥ ५

हेतुसाध्याभाववत्ज्ञानादिकमित्यर्थः॥ न च साध्याभाववत्ज्ञानत्वेन ज्ञानत्वेन वाज्ञानुमितिहेतुत्वे परामर्शादिजन्यकालेऽप्यनुमित्यापत्ति
त्तिरिति वाच्यं॥ विशेषसामग्र्यासहकृताया एव सामान्यसामग्र्याः फलोपधायकत्वेन परामर्शाद्यभावेनापत्त्यभावा
दिति वक्ष्यति॥ अत्र यद्यपि व्याप्तिघटकत्वेयवकृत्यमनुचितं तथापि व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शकुक्षा
तस्य करणात्तस्य तन्नायतयोक्तिः॥ ननु व्याप्तिर्निर्वक्तुमशक्या तथा केवलान्वयिघटकपदार्थज्ञानं करणमित्याशङ्क्य पृच्छति॥
ननु केयमिति॥ साध्याभाववदिति॥ वह्निमान् धूमादित्यादौ वह्न्यभाववति जलह्रदादौ धूमस्याविद्यमान
त्वाल्लक्षणसमन्वयः॥ धूमवान् वह्नेरित्यत्र धूमाभाववति अयोगोलके वह्नेर्विद्यमानत्वान्नातिव्याप्तिः॥ पर्वतीये
ति॥ पर्वतीयवह्नेस्तद्व्यक्तित्वेनात्यन्ताभाववतीत्यर्थः॥ एवं क्षणवृत्तित्वविशिष्टवह्न्यभाववद्घटेऽप्यभावसम
वायसंबंधावच्छिन्नवह्न्यभावादेर्नावेशिष्ट्यासज्यवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकत्वेन साध्याभावविशेषणेन वारणं संभवतीति तत्परित्यागः॥ ननु साध्यतावच्छेदकसंबंधावच्छिन्नसा
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितहेतुतावच्छेदकावच्छिन्नवृत्तित्वसामान्याभाव संबंधा
वत्त्वं व्याप्तिः॥ समवायसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसंबंधा
वच्छिन्नत्वं साध्यतावच्छेदकावच्छिन्नत्वनिवेशः॥ अत एव पर्वतीयवह्न्यभावस्यापि निरासः॥ न च पर्वतीयवह्नित्वं
पर्वतीयवह्निविशिष्टवह्नित्वं तत्पार्थविशिष्टस्यानतिरेकाद्वह्नित्वावच्छिन्नप्रतियोगिकत्वमस्त्येवेति वाच्यं॥ सा ता ४
ध्यतावच्छेदकावच्छिन्नत्वस्य साध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वार्थकत्वेन पर्वतीयत्ववह्नित्वोभयत्वे तेषामपर्याप्ता
वच्छेदकतया शुद्धवह्नित्वपर्याप्ततासादेनानुपपत्त्यभावात्॥ यदि च उभयोः प्रत्येकानतिरिक्ततया पर्वतीयत्व
वह्नित्वोभयपर्याप्तावच्छेदकतायामपि शुद्धवह्नित्वपर्याप्तत्वादुक्तदोषस्तदवस्थ एवेति विभाव्यते तदा साध्यता

अ-

८८

वच्छेदकभिन्ननिष्ठावच्छेदे[illegible]रूपितत्वेसतिकिंचिदवच्छेदकत्वानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रति
योगिताकत्वमितिनिष्कर्षोबोध्यः॥सत्यंतनिवेशात्पर्वतीयत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताकाभावमादायविष्यदत्व शे२
निवेशाच्चपर्वतीयत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकाभावमादायपर्यायप्रसंगः॥वह्न्यभाववतिधूमावयवेस
मवायेनधूमस्यसत्त्वाद्धेतुतावच्छेदकेसंबंधेनिवेशः॥धूमाभाववज्जलह्रदवृत्तित्वाभावस्यवह्नौसत्त्वाद्धूमवान्वह्नेरित्या
दावतिव्याप्तिवारणायसामान्याभावेति॥इत्थं चापिगोलकवृत्तित्वस्यापिसामान्यांतर्गततयातदभावस्यहेतौवह्नौसत्त्वान्ना
तिव्याप्तिः॥नचतथाप्ययोगोलकवृत्तित्वघटोभयाभावस्यसत्त्वादतिप्रसंगतादवस्थ्यमितिवाच्यं॥तादृशवृत्तित्वत्वावच्छि
वे न्नाभावस्यसत्त्वात्साध्याभावेचमभावीयदैशिकविशेषणता।विशेषणैववाच्यं॥एवंचघटत्वाभाववान्पटत्वादित्यादौघ दो१
टत्वाभावाभावस्यसाध्याभावस्यघटत्वरूपस्यसमवायेनैवसत्त्वादभावीयदैशिकविशेषणतयातदधिकरणाप्रसिद्धेः॥
अत्रकेचित्॥नतत्त्वेघटोनास्तीतिप्रतीताविवघटाभावोनास्तीतिप्रतीतावपिअभावीयदैशिकविशेषणताविषयत्वमनु
भूयतइतिभावाभावसाधारणींविशेषणतामंगीकृत्याप्रसिद्धिंपरिहरंति॥तदसत्॥तथासत्यपिकालिकसंबंधावच्छि त्वा७
ता न्नप्रतियोगिकस्याकाशाभावाभावस्यसाध्यतायामाकाशादिहेतावव्याप्तिः॥आकाशाभावेरूपसाध्याभावस्याभावीयविशेष
णतयाप्यप्रसिद्धिनिरस्तेः॥एवंभावाभावसाधारणताविशेषणतास्वीकारेभावीयविशेषणतयाभूतलवृत्तिर्घटइतिप्रतीत्या त ५
पत्तेश्चेतिचेन्नैवं॥साध्यवत्तागृहविरोधितानियामकसंबंधेनसाध्याभाववत्त्वस्यविवक्षितत्वात्॥घटत्वाभाववान्पटत्वा
व४ दित्यादौसमवायएवघटत्वाभावे[illegible]तागृहविरोधितानियामकइत्यप्रसिद्ध्यसंभवात्॥ननुतथापिजातिमान्सत्त्वादित्या
दौजात्यभाववत्सामान्यादिनिरूपितहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तित्वाप्रसिद्धेरव्याप्तिरितिचेन्न॥स्वाधिक
रणावृत्तिसाध्याभाववत्त्वमित्यस्यतदर्थत्वात्॥अथैवंसमाधिकरणेकालिकसंबंधेनध्वंसेभावसत्त्वादव्याप्तिः॥अ व्या२
भावीयविशेषणतयावृत्तिंचनिवेश्यचघटत्वाभाववान्प्रमेयत्वादित्यत्रातिव्याप्तिः॥घटत्वाभावाभावस्यघटत्व

(87)

स्यविशेषणतयाऽवृत्तेः॥ तथा च साध्यवत्ताग्रहविरोधितानियामकसंबंधेनावच्छिन्नत्वस्यावश्यं निवेशनीयतया सत्ता
भाववान् जातेः भावादित्यत्रा[illegible]व्याप्तिः॥ जातेः भावाधिकरणसामान्यादिनिरूपितसाध्यवत्ताग्रहविरोधिता
नियामकसमवायसंबंधावच्छिन्नवृत्तित्वाऽप्रसिद्धेरिति चेन्न॥ स्वाधिकरणावृत्तिसाध्याभावाधिकरणताक
त्वस्याविवक्षितत्वात्॥ साध्याभावाधिकरणता च साध्यवत्ताग्रहविरोधितानियामकसंबंधावच्छिन्ना बोध्या॥
अवृत्तित्वं च स्वरूपसंबंधेनैव ग्राह्यं॥ इत्थं च जातेः भावाधिकरणसामान्यादिनिरूपितस्वरूपसंबंधावच्छि
न्नवृत्तित्वस्य अप्रमेयत्वादौ प्रसिद्धत्वात् तदभावस्य च सत्ताधिकरणे सत्त्वेनानुपपत्त्यभावादिति॥ [illegible] साध्यव
त्तिसाध्यकाव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यमत्र निवेशनीयं॥ केचित्तु॥ हेतुतावच्छेदकसंबंधाव
च्छिन्नवृत्तित्वस्वरूपसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वसामान्याभावो व्याप्तिः॥
तेन सत्तावान् जातेरित्यादावप्रसिद्धिवारणाय हेतुतावच्छेदकसंबंधसामान्ये साध्याभाववदनुयोगिकत्वस्व स्वंहेतुः=९
प्रतियोगिकत्व एतदुभयाभावविशिष्टत्वं व्याप्तिरित्याहुः॥ इति न कोप्यनुपपत्तिरिति चेत्॥ अत्रोच्यते॥ तथा
पि केवलान्वयिनि साध्याभावाप्रसिद्ध्या व्याप्तिलक्षणमव्याप्तमेव॥ नन्वव्याप्तिर्नामानुमितिकारणत्वेनाभि
मतस्य व्याप्तिज्ञानस्य व्यतिरेकव्यभिचार एव स चात्र नास्त्येवेति॥ वस्तुगत्या वाच्यत्वाभावाप्रसिद्धावपि प्रति
योगितया वाच्यत्वाद्यपोऽवं भाववद्वृत्त्याकारकस्य भ्रमात्मकज्ञानमादायानुमितेरुपपन्नत्वात्॥ तथा हि॥ साध्यनिष्ठ
विषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतासीवनिरूपिता
भावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षनिष्ठविषयताशालिज्ञानत्वे
सत्तावान् जातेरित्यादौ न कोऽपि दोष इत्याहुः॥ अपरे तु साध्याभाववदवृत्तित्वमित्यत्र ७

४४

नैवचानुमितिहेतुत्वं तत्र प्रमादायोपपद्यत एव ॥ अथाभावो न वाच्यत्वीयसंसर्गादृशविशेषदर्शनकाले तत्तदनुपपत्तिरेव ॥
न च तदानेव्यत एवानुमितिरिति वाच्यं ॥ तस्यास्तदाप्यनुभूयमानत्वादिति चेत् तथापि निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्ध्या दर
प्रतिबध्यतया॰ भावो न वाच्यत्वीयदर्शितज्ञानकालेपि प्रतियोगितया वाच्यत्वीयदर्शि निर्धर्मितावच्छेदकज्ञानेप्यनौबा
धकाभावेनानुमितेरुत्पत्तेः॥ अभावत्वमनिवेश्य साध्यीयमनुवदवृत्तित्व ज्ञानस्यैवचानुमितिहेतुत्वादिति
चेन्नैवं॥ अव॰ त्वज्ञानेस्य निर्धर्मितावच्छेदकज्ञानं प्रत्यपि प्रतिबंधकतया प्रतियोगित यावत्त्वलीनवत्त्विद
ति ज्ञानकाले वाच्यत्वीयवदवृत्तित्वज्ञानस्याप्यसंभवेनानुमित्यपलापस्य दुर्वारत्वादिति निपुणतरमालोच
नीयं सूक्ष्मदर्शिभिरिति ॥ ननु नीलघटे यत्किंचिद्घटप्रतियोगिकत्वे दसत्वेन नीलघटो घटान्य इत्यादिवा
क्यस्यापि प्रामाण्यापत्तिरिति चेत् अन्यतावच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभावबोधं प्रत्येव किंचित्पस
दसमभिव्याहृतान्यादिपदज्ञानत्वेन हेतुत्वमुपेयं। एवंच प्रकृते साध्यपदसमभिव्याहृतान्यादिपदस्य
साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावबोधकत्वमेव। तथाच साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्यो
न्याभाववदवृत्तित्वमेव लक्षणं लभ्यते तत्र च नोक्तदोष इत्याशयेनाशंकते॥ अथेति॥ साध्यवदिति॥ सा
ध्यतावच्छेदकावच्छिन्नवदित्यर्थः॥ अन्यथा साध्यवत्त्वस्य साध्यस्वरूपत्वेन पर्वतीयवह्निमदन्योन्याभा
वावारणात्॥ साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतानिरूपितप्रतियोगिताका
न्योन्याभाववदवृत्तित्वमिति निष्कर्षः॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावविवक्षणे
नैव वह्न्यलक्षणेपि वारितेनन्याय्येनाव्याप्तिनिरासः संभवेपि अत्यंताभावस्याव्याप्यवृत्तितया संयोगी द्रव्य

त्वादित्यादावव्याप्तिः॥ इदं चान्योन्याभावस्य व्याप्यवृत्तितया संयोगवदन्योऽन्याभावस्य द्रव्ये सत्त्वेनैव नाव्याप्तिरिति। पूर्वोक्तप्रतियोगिवैयधिकरण्यादीनं वैशेषिकत्वमिति न तत्र तथा विवक्षितमिति ध्येयं। अव्याप्तिं निरस्यति। नचेति न हीत्यर्थः॥ केवलान्वयीति। इदं प्रमेयं वाच्यत्वादित्यादावित्यर्थः। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं। प्रमेयत्वस्य च सार्वत्रिकत्वेन तदन्याऽप्रसिद्ध्याऽव्याप्तिरिति भावः॥ लाघवात्साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानमेवानुमितिहेतुः केवलान्वयिनि तादृशज्ञानासंभवेनानुमितिरिव नोपपद्यते। एवं च कुत्र व्याप्तिरिति मीमांसकमतमनुपदर्शयति॥ अत्र मीमांसका इति। इह प्रमेयत्वमिति। साध्यवदन्यावृत्तित्वज्ञानाऽप्रसिद्ध्याभावेनाऽनुमित्यसंभवादनुमिनोमीत्याकारकतद्धेतौ किं प्रत्यक्षानुव्यवसायोपपत्तिरित्यर्थः। न चान्योन्याभावे प्रमेयत्ववत्प्रतियोगिकत्वभ्रमदशायामेव तादृशानुभवोपपत्तिरिति वाच्यं। तथापि प्रमेयत्वस्य केवलान्वयित्वज्ञानदशायां तादृशज्ञानस्यानुपपत्तितादवस्थ्यात्। कारणबाधादिति। विशे॰ प्रदर्शनदशायां साध्यवदन्योन्याभाववद्वृत्तित्वज्ञानस्यानुमितिकारणत्वेनाऽभिमतस्य बाधात्। असंभवात्॥ ज्ञातिरिति। इयं प्रमेयत्वमनुमिनोमीति। प्रमेयत्वविधेयकानुमितिरेव तादृशानुव्यवसायविषयः। कारणबाधेन च प्रमेयत्वविधेयकानुमितेरनुत्पत्त्या विषयबाधेन तादृशप्रत्ययस्य भ्रमत्वमित्यर्थः॥ व्यभिचारेण व्यतिरेकव्यभिचारेण तद्बुद्धेः साध्यवदन्यावृत्तित्वस्वरूपव्याप्तिबुद्धेः॥ कारणत्वासिद्धेरिति॥ सिद्धेत्यस्य कारणत्वेन तदभावेन तथानुमित्युत्पत्तेस्तत्त्वात्॥ अनुमितावेव व्यभिचारेण तस्यैव कारणत्वमसिद्धं॥ न च परेण तादृशानुमितिरेव नेष्यत इति वाच्यं॥ तत्रानुभवस्य प्रमाणत्वे दर्शितत्वात्। यथाकथंचिदपि प्रतीतेः प्रमात्वस्य शक्योपपादनत्वेन प्रतीतिः

३२ २

र्भ्रमत्वकल्पनायाअन्याय्यत्वाच्च॥ अन्यथा क्वापि विषयव्यवस्था न स्यादिति भावः॥ साध्ये प्रमेयत्ववदन्यत्वेति॥
अलीकभिन्नत्वेन प्रमेयत्वस्य न्यूनत्वसूचनं॥ नन्वलीकस्य ज्ञानविषयत्वे मानाभाव इत्यत आह॥ असदिति॥
शशशृंगमिति प्रतीतिविषयस्य [illegible] त्वादिति भावः॥ शशीयशृंगस्यापरमार्थिकत्वेनालीकत्वमिति भावः॥ अमेवे
सत्वा४ सं[illegible]तोरिति॥ ज्ञानविषयत्वस्य कालसंबंधित्वव्याप्यत्वादिति भावः॥ तेन न सिध्यसिद्धिव्याघातः॥ असतोपि
ज्ञाने कालसंबंधत्वीकएव ज्ञानविषयत्वसत्वेन न तस्य व्याप्यत्वं संभवतीत्यर्थतस्तन्निरासः॥ शशशृंग
मित्यादिप्रतीतेश्च शृंगस्य शशीयत्वेन सानोपगमेनान्यथाख्यात्यैवोपपत्तेरिति न तदन्यथानुपपत्त्या तत्सि
द्धिरिति भावः॥ आपातत्व सख्यातिस्तथापि प्रमेयत्वसाध्यकानुमितावव्याप्तिपरिहारेपि ज्ञेयत्वादिसाध्यके
साकुवरिति तुष्यतु दुर्जन इति न्यायेनाह॥ किंचेति॥ कश्चित्तु सिध्यसिद्धिव्याघातादाह॥ किंचेतीति॥ तदसत्॥
उक्तरत्याघातस्य परिहारात्॥ दृष्टमपीति॥ असत्ख्यातिस्वीकारेपीत्यर्थः॥ अव्याप्तिः साध्यवदन्याप्रसिद्धिनि
बंधनाव्याप्तिः॥ तथाव्याप्तिमेवदर्शयति॥ न हीति॥ सर्वत्रैर सत्ख्यातिवादिभिः॥ विरोधादिति शेषः॥ नी
प४ लावतीकाकार मतमाशंके॥ अन्येत्विति॥ संबंधसामानाधिकरण्यं धूमवान्वह्नेरित्यादौ वह्नौ धूमसामा
नाधिकरण्यसत्वादिति व्याप्तिरतः कोहम्म नेति॥ अयोगोलकीयवह्नौ धूमसामानाधिकरण्याभावेन का
भा२ र्त्स्न्येन संबंधाभावाद्दोषः॥ अत्रास्वरसमाह॥ नवीनेति॥ तत्र लक्षणवाक्ये वदंति॥ दूषणं वदंति॥ कार्त्स्न्येना
प्येसाधनसाधनवतिवर्तिप्रश्नमुखेन तदेवाह॥ कोपीमिति॥ साध्येकार्त्स्न्यं दूषणेनैव साध्यवति कार्त्स्न्ये

नैव क्षणेदूषणसंसवेनप्रयत्नोर्कन्नोद्भंकितं ।। असिद्धानुमाने धूमवानित्यादौ अव्याप्तिमेवाविवरणोति ।।
नहीति ।। अयःपिंडवन्हेरिति ।। अत्र निरूपितत्वं षष्ठ्यर्थः ।। अयःपिंडीयवह्निनिरूपितसामानाधिकर
ण्याभावादित्यर्थः ।। एकव्यक्तीति ।। द्रव्यंपार्थिवीत्वादित्यादावित्यर्थः ।। अत्र हेतोरैक्येनानेकाशेषुत्वरूपका
रस्याप्रसिद्धेरिति भावः ।। एकमात्रवृत्तीति ।। एतद्रूपवाने तद्रसादित्यादावित्यर्थः ।। तत्र हेतुमतः ऐक्यान्नहेतु
म ५ मतीतुल्यरूपकारस्यासंवादिति भावः ।। ननु हेतावैवकास्यं विवक्षितं तथाच अक्रतेकास्यस्य व्यापकत्व
रूपतया हेतुतावच्छेदकव्यापकसाध्यसामानाधिकरण्यवत्त्वमितिविवक्षणीयमितिचेन्न ।। द्रव्यंसत्वादित्या
दौ सत्तायाः एकव्यक्तिकत्वेन सत्तात्वव्यापकद्रव्यत्वसामानाधिकरण्यसत्वादित्यव्याप्तेः ।। तथापि हेतुम
तिकस्यैवविवक्षितं ।। तथा च हेतुव्यापकसाध्यसामानाधिकरण्यत्वं ।। व्यापकत्वं चावच्छेदकतया ।। य
त्र यत्र धूमस्तत्र तत्रावच्छेदकतया वह्निसामानाधिकरण्यसत्वात् वह्निमान्धूमादित्यादौ लक्षणस
मन्वयः ।। पर्वते धूमे वह्निसामानाधिकरण्यमिति प्रतीतेः ।। अथ यथा हेत्वधिकरणताव्यापकसाध्याधिकर
णताकत्ववत्वमिति चेन्न ।। साध्याधिकरणवृत्तित्वरूपसाध्यसामानाधिकरण्यस्य तत्तदाधेयत्वे
दन्यभिन्नत्वमात्रवद्धन्निष्ठाभावाप्रतियोगित्वरूपव्यापकत्वस्यासंभवात् ।। प्रथमस्य दुष्टत्वात् ।। द्वि
तीयेप्येतदपेक्ष्य हेतुव्यापकं यत्साध्यं तत्सामानाधिकरण्यस्यैव लघुत्वात्तस्यापि चये वक्ष्यमाणव्या
प्यपेक्षया गुरुत्वेन हेयत्वादिति निर्वकिंचिदेतत् ।। ननु साध्यसमाधिकरणस्य समानाधिकरणयावत्त्वं व्याप्ति
रित्यनेन यावंतः साध्यसमानाधिकरणास्ते सर्वे हेतुसमाधिकरणा इत्यर्थलाभः स्यात् ।। तेन तच्चायं गौर

व्याप्तिस्यादौ गोत्वसमानाधिकरणद्रव्यत्वादीनां अश्वत्वसामानाधिकरण्यादतिव्याप्तिनिरासाय यावत्पदमि
ति चेत् ॥ इत्थं च गोत्वप्रकारककप्रमाविशेष्यादीनां मध्ये यावदन्तःपातित्वया अश्वत्वसामानाधिकरण्याभावेनाति अ॰
व्याप्तिः ॥ इदं तु न संगच्छते ॥ इत्थं वाच्यं ज्ञेयत्वादिसत्त्ववान् यत्समानाधिकरणानां यावतां तैः यत्त्वसमानाधिकरण
त्वात्तु तथा संसर्गेऽपि वह्निमान् धूमादित्यादौ वह्निसमानाधिकरणानां अयोगोलकत्वादीनां धूमसामानाधि
भावा॰ करण्याद्व्याप्तेः ॥ धूमवान् वह्नेरित्यादावतिव्याप्तिदोषश्चेत् आह ॥ यत्समानाधिकरणा इति ॥ वह्निसमानाधि
करणद्रव्यत्वादीनां धूमसामानाधिकरण्यात् व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वमिति ॥ इदमेव समुन्नयति ॥
ति॰ सर्वैरेवाद्भिनाधूमस्येति ॥ निरूपितलक्षणार्थः ॥ धूमनिरूपितावह्निनिष्ठा व्याप्तिरित्यर्थः ॥ अथ द्रव्यगुण
कर्मान्यत्वे सतीत्यत्रत्वाद्द्व्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्येन सत्तासमानाधिकरणानां गुणत्वादीनां द्रव्यत्व
सामानाधिकरण्याभावादव्याप्तिः ॥ एवं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेश्च ॥ जातिसमा
नाधिकरणानां सर्वेषां सत्तासामानाधिकरण्यादिति चेन्न ॥ विशिष्टस्यातिरिक्तत्वमंगीकृत्यैव तल्लक्षणाभि
धानात् ॥ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्ये गुणः सत्तावानिति प्रतीतिवत् गुणो गुणकर्मान्यत्वविशिष्टसत्तावा नि॰
निति प्रतीत्यापत्तेर्विशिष्टस्यातिरिक्तत्वमेवोपेयमतएवं च नोक्ताव्याप्त्यतिव्याप्ती ॥ ननु विशिष्टस्यातिरि
क्तत्वेऽपि समानाधिकरणतायाः विशिष्टाधिकरणतायाश्चैक्येन गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति
प्रतीत्यापत्तिवारणाय विशिष्टस्यांगीकृत्यापि विशिष्टनिरूपिताधिकरणतायाः अतिरिक्तत्वमवश्यमंगीका
र्या एवं च विशिष्टस्यातिरिक्तत्वेनेति पूर्वोक्तदोषस्तदवस्थ एवेति अतः विशिष्टस्यानतिरिक्तत्वेऽपि ल

४ + द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेनाव्याप्तिरतो यद्विशिष्टेत्युक्तं ॥ + ४

शि० १ लक्षणमाह ॥ यद्विशिष्टेति ॥ यद्विशिष्टसमानाधिकरणाः यावन्तः साध्यसमानाधिकरणास्तद्वत्त्वमिति पाठः ॥ यत्संदेहे तु तावच्छेदकपरं ॥ केचित्तु ॥ विशिष्टस्यानतिरिक्तत्वे केवलान्वय्यव्याप्तिरव्याप्तिश्चेत्यत आह ॥ यद्विशिष्टेति ॥ तन्मते च पूर्वोक्तलक्षण एव हेतुतावच्छेदकसाध्यतावच्छेदकयोर्निवेश इत्याहुः ॥ तदसत् ॥ तद्वत्त्वमित्यनेन लक्षणान्तरकथनं तस्यासंगतत्वापत्तेः ॥ तस्मान्मदुक्तरीतिरेवात्रानुसर्त्तव्या ॥ नन्वेवमपि गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्राव्याप्तिः साध्यतावच्छेदकस्यापि निवेश आवश्यक इति वाच्यं ॥ विशिष्टसत्तायां विशिष्टसत्तानिरूपिताधारतासंबंधेन साध्यतायां जातिसमानाधिकरणगुणत्वादीनां विशिष्टसत्तानिरूपिताधारतासंबंधेन विशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभावेनातिव्याप्तेरभावात् ॥ समवायेन तस्याः साध्यत्वे तु सद्धेतुत्वादेवोक्तदोषाभावादित्यभिप्रायात् ॥ यदि च समवायेनैव तत्साध्यतायां गुणे गुणकर्मान्यत्वविशिष्टसत्ता नास्तीति धीबलात् गुणकर्मान्यत्वविशिष्टसत्ताभावस्य गुणे सत्त्वेन विशिष्टसत्तात्वावच्छिन्नाभाववद्वृत्तितया व्यभिचारित्वं ॥ न च सत्ता[redacted]भावो न प्रतियोगिव्यधिकरण इति वाच्यं ॥ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारितया तस्य तत्रापि सत्त्वात् ॥ अन्यथा तत्तत्त्वमूर्त्तत्वोभयवान् वृत्तित्वादित्यादेर्व्यभिचारित्वानुपपत्तेः ॥ लाघवेन निरवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारित्वाच्चेति समवायेन विशिष्टसत्तायां साध्यत्वे व्याप्तिरिति विभाव्यते तदपि साध्यतावच्छेदकमपि निवेश्यं ॥ अत एव यद्विशिष्टसमानाधिकरणा यावन्तः साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणास्तद्वत्त्वमिति ॥ तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्ताया अनतिरेकेऽपि नाव्याप्तिः ॥ न च गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरि

साध्यतायां ३

१+ तत्र चानतिरिक्तत्वेपीत्यपिना विशिष्टस्यातिरिक्तमंगीकृत्य पूर्वलक्षणं सूचितं।१

त्यादेरतिव्याप्तिरिति पुस्तकेषु उत्तोलितः पाठोपि दृश्यते तैरितिनक्वाप्यनुपपत्तिः॥ इदमेव लक्षणं संगमयति॥ स्ववतिचेति॥
मस२ न चेद्दृशीति॥ स्वविशिष्टसमानाधिकरणं सर्वधूमाधिकरणवर्तिनेत्यर्थः॥ वह्नित्वविशिष्टसमानाधिकरणायावदं
तर्गतायोगोलकत्वादेर्धूमासमानाधिकरणत्वादितिभावः॥ धूमव्याप्तिः॥ धूमनिरूपितव्याप्तिः॥ अत्रैवसा न३
धनतावच्छेदकसंबंधेन साधनाधिकरणं बोध्यं॥ अन्यथा समवायेन धूमाधिकरणवृत्तिधूमावयवत्वादीनां
वह्निसामानाधिकरण्याभावादव्याप्तेः॥ एवं साध्याधिकरणत्वमपि साध्यतावच्छेदकसंबंधेन अन्यथा वह्न्यधिकरण न५
वृत्त्ययोगोलकत्वादीनामपि कालिकसंबंधेन धूमाधिकरणायोगोलकवृत्तित्वादतिप्रसंगापत्तेः॥ धूमसमानाधिकरणा
नां संयोगेन वह्न्यधिकरणानां पर्वतादिवृत्तित्वात्समवायेन वह्निसाध्यके संयोगेन धूमहेतुकेऽतिव्याप्तेश्च॥ ए
वं साधनाधिकरणवृत्तित्वघटकसंबंधेन साध्याधिकरणवृत्तित्वं वाच्यं॥ अन्यथा वह्निमानाधिकरणायोगोल स८
कत्वादीनामपि धूमाधिकरणमहानसादौ कालिकसंबंधेन वृत्तित्वादतिव्याप्तितादवस्थ्यमिति॥ नन्व
घ६ त्र साधनाधिकरणवृत्तित्वं यदि साधनतावच्छेदकसंबंधेन विवक्षितं। तदा इदमेतद्रूपभिन्नं गुणत्वादित्यादौ गुण
त्वाधिकरणसमवेतानां यावतामेतद्रूपभिन्नात्समवेतत्वादतिव्याप्तिः॥ एतद्रूपमात्रसमवेतस्याप्रसिद्धेः॥ नापि सा
ध्यतावच्छेदकसंबंधेन जातिमान्मेयत्वादित्यत्र मेयत्वाधिकरणसमवेतानां यावतां जातिमत्समवेतत्वा॥ इतिप्र
संगात्॥ न च विषयतया तद्वृत्तित्वं विवक्षणीयं॥ वह्निमान्धूमादित्यादौ विषयतया धूमाधिकरणवृत्तीनां धू
मवन्मात्रविषयकज्ञानादीनां वह्न्यधिकरणेपि विषयतया वृत्तेर्लक्षणसमन्वयः॥ धूमवान्वह्नेरित्यादौ अयो
गोलकमात्रविषयकज्ञानादीनां धूमासमानाधिकरणत्वान्नातिव्याप्तिरिति वाच्यं॥ घटभिन्नंमेय

ना^ ६+ त्वादीनां वह्निसमानाधिकरणत्वात् लक्षणसमन्वयः अयोगोलकस्य प्र[illegible]रिकप्रमावि ष्य+६

त्वादिसत्प्रमेयत्वाधिकरणवृत्तीनां [illegible] घटभिन्नत्वसमानाधिकरणत्वादित्यव्याप्तिः।। घटमात्रविषयकज्ञानस्य चात्र
सिद्धत्वात्।। न च येन केनापि संबंधेन साधनाधिकरणवृत्तित्वं विवक्षितमिति वाच्यं। द्रव्यं सत्त्वादित्यादौ सत्त्वाधिकरणव
त्तीनां यावतामेव कालिकसंबंधेन द्रव्यत्वाधिकरणवृत्तित्वादित्यव्याप्तिरिति चेन्न।। येन येन संबंधेन साधनाधिकर
णवृत्तयो यावंतस्तेन तेन संबंधेन साध्याधिकरणवृत्तपस्तद्धत्वस्यैव विवक्षितत्वात्।। यदि चैवमननुगमइति विभाव्य
घ५ तेतदाविशेषणताविशेषेण सा[illegible]नाधिकरणवृत्तयो यावंतः विशेषणताविशेषेण साध्याधिकरणवृत्तयस्त
कृ६ त्त्वमिति बोध्यं।। धूमवत्त्वप्रकारक[illegible]प्रमाविशेष्यत्वस्य च धूमसमानाधिकरणत्वान्नव्यभिचारिण्यतिप्रसंगइ
ख६ तिनिगर्वः।। केवलान्वयिनि लक्षणमुपपादयति।। अस्ति चेदमिति।। इदं निरुक्तव्याप्तिलक्षणं।। केवलान्वयिनि।।
केवलान्वयिसाध्यके प्रमेयमभिधेयत्वादित्यादौ।। एवं चेति।। मतमपास्तं इत्यनेनान्वयः।। एवं एतादृशस्य व्याप्ति
त्वे च लाघवादिति।। हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्त्यपेक्षया लाघवादित्यर्थः।। तत्प्रतियोगिवै
य्यधिकरण्यादिनिवेशेन गौरवादिति भावः।। साध्यवदिति।। साध्यं साध्यवदन्यावृत्तित्वस्य गगनादावपि सत्त्वेन वह्नि
साध्यके गगनादिहेतुके गगनादावतिव्याप्तिरतः साध्यसमानाधिकरणत्वमिति।। न च तत्र व्याप्तिसत्त्वेऽपि पक्ष
धर्मताज्ञानविरहेणैवानुमितिवारणे किं तद्वारणाय विशेषणोपादानेनेति वाच्यं।। गगनमवृत्तित्ववत्तित्वज्ञान
स्य गगने पर्वतवृत्तित्वज्ञाने ग्राह्याभावावगाहितया प्रतिबंधकत्वेन तदनुपपत्तावपि भिन्नविषयकस्य गगन
वान्पर्वत इति ज्ञानस्योत्पत्तौ बाधकाभावेन पक्षधर्मताज्ञानस्यापि संभवेन तद्वारणाय विशेषणोपादानस्याव
श्यकत्वात्।। एवं इदं द्रव्यं घटत्वपटत्वोभय[illegible]दित्यत्राविरुद्धेऽतिव्याप्तिवारणाय तस्यावश्यकत्वं।। इदं तु सामा
स्मा

तर्क॰अ॰४९

अनु॰
~~[illegible]~~४९

नाधिकरण्यज्ञानस्याप्यन्वयव्यतिरेकाभ्यांकारणत्वाभिप्रायेण॥अन्यथानुवृत्तिमत्वनिवेशेनापिगगनादि
वारणासंभवइतिबोध्यं॥नचेदमिति॥साध्यवदन्यावृत्तित्वमित्यर्थः॥नेदमनुमानमिति॥नकेवलान्वयिसा
ध्यकानुमानमित्यर्थः॥व्याप्तिज्ञानाभावात्तादृशानुमितेरसिद्ध्यानतत्करणतयातदनुमानस्वीकारइतिभा
वः॥नतोपीति॥साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपव्याप्तिस्वरूपतोपिअस्यनिरु
क्तव्याप्तिस्वरूपस्यलघुत्वात्॥अत्ताबाधप्रवेशेनलघुत्वात्॥नचयावत्स्वव्यापकत्वादन्यस्यदुर्वच
तयाव्यापकत्वस्याभावघटितत्वेनगुरुतयाकुतोस्यलघुत्वमितिवाच्यं॥अपेक्षाबुद्धिविशेषविषयत्वरूप
स्यैवव्यापकत्वस्यात्रप्रवेशनीयत्वात्॥वस्तुतस्तुसाध्यवदन्यावृत्तित्वस्यह्याधिकरणावृत्तित्वस्याभावक
त्वरूपस्यावश्यंविवक्षणीयत्वेनावृत्तित्वस्यचसाध्यवत्तायाश्चविरोधितानियामकसंबंधेनावश्यंवक्तव्यत ण९
याविरोधितानियामकत्वस्यचसमवायोभावीयविशेषतासाधारणस्यानुगतस्याभावाद्गौरवेणानिरुक्तव्या
प्तिस्वरूपस्यैवलघुत्वात्॥निरुक्त~~[illegible]~~व्याप्तिस्वरूपेचविशेषणताविशेषेणैवसामानाधिकरण्यस्यनि
वेशेनव्यापकत्वांशेप्रतियोगिवैयधिकरण्याद्यप्रवेशेनलाघवस्यातिस्फुटत्वादिति॥एवंगुरुधर्मावच्छि
व्य४ न्नसाध्यकस्थलेतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्या~~[illegible]~~व्याप्तिवारणायसाध्यतावच्छेदकावच्छिन्नवन्निष्ठा
न३ भावप्रतियोगितावच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वंव्याप्तिरितिवक्तव्यं॥तत्रतादृशप्रतियोगिताना
वच्छेदकत्वस्यतादृशप्रतियोगितावच्छेदकत्वापेक्षयाकंबुग्रीवादिमत्वावच्छिन्नावच्छिन्नप्रतियोगिताभेदनि क२
वेशेननसंभवतीतिघटत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षयाकंबुग्रीवादिमत्वावच्छिन्नवन्नि

97

व्याप्त्यावप्रतियोगितावच्छेदकत्वस्यगुरुत्वेनतादृशाप्त्यावाप्रसिद्धेः॥किंतुतादृशाप्रतियोगितावच्छेदकंतत्तद्व्यक्तित्वे
नोपादायतच्चव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटएवानिवेश्यतइतिगौरवात्॥दुर्ज्ञेयत्वाच्चनतादृशव्या
प्तेर्ज्ञानंहेतुरितिध्येयं॥इदमुपलक्षणं॥प्रमेयत्वमनुमिनोमीत्यनुव्यवसायबलादेवतत्प्रकारकत्वावश्यकत्वादितिभा
चा गेवोक्तमिति॥सर्वत्रव्यभिचारशंकासत्त्वेनव्याप्तिग्रहानुदयात्कारणाभावेनानुमितेरसिद्ध्यानतत्कारणतया
अनुमानप्रामाण्यमिति॥चार्वाकमतंदर्शयितुंतन्मतमुपन्यस्यति॥अत्रचार्वाकाइति॥किंचिदिति॥धूमसमा
नाधिकरणत्वसामानाधिकरण्येनवह्निसमानाधिकरण्याभावसंशयेधूमसमानाधिकरणत्वावच्छेदेनव
ह्निसामानाधिकरण्यरूपव्याप्तिग्रहानुदयादित्यर्थः॥ननुतादृशशंकायामपिव्याप्तिग्रहेकिंबाधकमित्यतआ
ह॥नेत्येति॥नहीत्यर्थः॥[redacted]शंकायांधूमसमानाधिकरणत्वसामानाधिकरण्येनवह्निसामानाधिकरण्याभा च ल७
वशंकायां॥तस्यास्तादृशशंकायास्तत्प्रतिबंधकत्वात्॥तादृशव्याप्तिप्रतिबंधकत्वात्॥नैभूतत्वसामाधिक
ण्येनघटाभाववत्ताज्ञानस्यनिर्णयात्मनःतत्तत्त्वावच्छेदेनघटवत्ताज्ञानेबाधनिर्णयविधयाप्रतिबंधक
कथं५ त्वेपितादृशशंकायास्तत्त्वेप्रतिबंधकत्वंग्राह्यंसंशयस्यापिप्रतिबंधकत्वेचपर्वतोवह्निमान्नवेतिसंशयेऽनुमि
त्यादेरनुत्पत्तिरितिवाच्यं॥पर्वह्निसामग्र्याप्रतिबंधिकाविशेषादर्शनेतद्वारापितत्रेतिन्यायेनाविशिष्यप्रत्यक्षवि
शेषदर्शनाभावविशिष्टतद्वत्ताप्रकारकज्ञानत्वेनसंशयस्यापिप्रतिबंधकत्वांगीकारात्॥अन्यथास्थाणु
र्वापुरुषोवेतिसंशयोत्तरं[redacted]विशेषदर्शनेसंशयोत्तरप्रत्यक्षापत्तेः॥तत्रबाधनिर्णयाभावात्॥संशयस्य
नवनयेऽप्रतिबंधकत्वादिति॥यद्वाअप्रामाण्यज्ञानाभावादौसविशेषणविशेष्यभावविनिगमनाविरहेणवि

विनैव२

शेषदर्शनस्योत्तेजकत्वासंभवान्नविशेषदर्शनाभावविशिष्टतद्भावप्रकारकज्ञानत्वेनसंशयस्यप्रतिबंधकत्वंविशेषदर्शनशून्यकाले संशयोत्तरप्रत्यक्षानुपपत्तेः संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वकल्पनेनतदभावादोषोपपत्तेरितिविभाव्यते तदातादृशासिमप्राप्रतिबंधिका बोध्येति भावः ॥ ननु वह्निधूमयोः सामानाधिकरण्यस्यैव द वं३ र्शनमेव तादृशशंकाविरोधीत्याशयेनाह ॥ नचेति ॥ तयोर्दर्शनात् ॥ वह्निधूमयोः साध्यसाधनयोः सहचारदर्शनात् ॥ निवृत्तिः ॥ व्यभिचारशंकानिवृत्तिः ॥ शतशइति ॥ घटादिरूपपार्थिवे लोहलेख्यापार्थिवत्वादित्यादौ घटादिषु पार्थिवत्वलोहलेख्यत्वयोः सामानाधिकरण्यग्रहेपिहीरके व्यभिचारग्रहादित्यर्थः ॥ तथाचव्यभिचारेण

न स्तयोर्दर्शनस्य तादृशशंकाप्रतिबंधकत्वमिति भावः ॥ ननु धूमवह्न्योः कार्यकारणभावात् धूमो यदि वह्निव्यभिचा म० रीस्यात्तर्हि वह्निजन्यो न स्यादिति तर्क एव धूमो वह्निव्यभिचारी न वेति शंकानिवर्तकः ॥ पार्थिवत्वलोहलेख्यत्वयोस्तु कार्यकारणभावाभावात् ॥ यदि लोहलेख्यं न स्यात् तदा पार्थिवत्वं न स्यादिति तर्कासंभवान्न तत्र व्यभि भि-वा१ चारशंकाविरह इत्याशंक्यते ॥ न च तर्कादिति ॥ व्याप्तिग्रहमूलकत्वेनापाद्यापादकयोर्व्याप्तिग्रहमूलकत्वेन ॥ अनवस्थानादिति ॥ तर्कमूलभूतव्याप्तावपि ॥ व्यभिचारशंकानिरासार्थं तर्कान्तरापेक्षायामनवस्थेत्यर्थः ॥ तथा च मूलशैथिल्यान्न तर्कस्य तच्छंकानिवर्तकत्वमिति भावः ॥ अत्र विपर्ययेतरकोटिमात्रापर्यवसानं इष्टापत्तिः ॥ मूलशैथिल्यं चेति तर्के त्रयो दोषाः ॥ विपर्ययेतरकोटिमात्रापर्यवसानेयिनएव तदभावशंकानिवर्त्तकत्वात्तदितरकोटिपर्यवसाने च तदसंभवात् विपर्ययेतरकोटिमात्रापर्यवसानस्य दूषकत्वं बोध्यं ॥ इष्टापत्तेश्च तर्ककारिणी ॥ उक्तापाद्यव्यतिरेकनिर्णयविघटकत्वेन मूलशैथिल्यस्य च तत्कारणी ॥ उक्तापाद्यापा

१ + धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यर्थः ॥ तन्निवृत्तिः ॥ व्यभिचारशंकानिवृत्तिः ॥ + ६

ना४ अ४

ध्ये दकव्याप्तिग्रहप्रतिबंधकेचेनयथायथंदूषकताबोध्या॥उपसंहरति॥इत्थंचेति।व्यभिचारशंकाप्रतिबंधकस्याभावेन
जागरूकव्यभिचारसंशयेचेत्यर्थः॥ग्राहकाभावात्॥व्यभिचारज्ञानाभावोरूपग्राहकाभावात्।कुतइति।हेतोरनुमानप्रमाणंस्या
दित्यर्थः॥अनुमितिकरणत्वेयत्वानुमानस्यप्रामाण्यंव्याप्त्यनिश्चयेचानुमितेरभावात्तत्करणतयाअनुमानप्रामाण्यदूर
पास्तत्वमितिभावः॥व्यभिचारज्ञानविरहादिकमिति।तद्वत्ताज्ञानंप्रतितदभाववत्ताज्ञानाभावस्यहेतुतयाव्यभिचाररूपव्याप्ति व
ग्रहसाध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानाभावोहेतुरित्यर्थः॥आदिनासहचारज्ञानपरिग्रहः॥नचसाध्याभाववद्वृत्ति
त्वांशेसंशयात्मकव्यभिचारसंशयसत्वेव्याप्त्यग्रहात्संशयनिश्चयसाधारणव्यभिचारज्ञानाभावएवहेतुर्वाच्यस्तथाचपक्षी
यसाध्यसंदेहात्मकव्यभिचारसंशयस्यापिप्रतिबंधकत्वप्रसक्त्यानुमानोच्छेदापत्तिरितिवाच्यं।साध्याभाववत्त्वांशेनिश्च मान्
यात्मकवृत्तित्वांशेसंशयनिश्चयसाधारणव्यभिचारज्ञानाभावस्यैवहेतुत्वात्॥ननुज्ञानादीनामव्याप्यवृत्तितयाशरीरावच्छे
देनव्यभिचारज्ञानसत्वेऽपिघटावच्छेदेनात्मनिसमवायेनतदभावसत्वाद्व्याप्तिग्रहापत्तिरितिचेन्न॥समवायसंबंधा ना८
वच्छिन्नप्रतियोगिताकव्यभिचारज्ञानविशिष्टात्मत्वाभावस्यस्वसमानाधिकरणैकत्वसंबंधेनव्यभिचारज्ञानाभावत्वस्यवा र१
हेतुत्वात्॥तस्यचव्याप्यवृत्तित्वादिति।अथतथापिध्वंसवह्न्योःसहचारज्ञानस्यव्याप्तिग्रहहेतुत्वेमानाभावः॥नचवह्निध्वंस
हचारभ्रमात्व्याप्तिभ्रमदर्शनादन्वयव्यतिरेकाभ्यांतस्यकारणत्वमितिवाच्यं।ग्राहकसामग्रीक्रमयौगपद्याभ्यामेवसह
चारग्रहव्याप्तिग्रहयोःक्रमयौगपद्ययोरुपपत्तेस्तयोःपरस्परहेतुत्वेमानाभावइतिचेन्नैवं॥स्वसमानाधिकरणयावंतोधर्मा
तु इत्यत्रधर्मेहिसामानाधिकरण्यरूपसहचारज्ञानस्यविशेषणज्ञानत्वेनहेतुतयातस्यैवादिपदेनसंगृहीतत्वात्॥ननुसा
ध्यसाधनज्ञानस्यापि॥एवंप्रतिबंधकाभावांतरस्यापिआदिपदेनसंग्रहोक्तत्वादितिदिक्॥ननुव्यभिचारज्ञानवि
रहःसंशयानिश्चयसाधारणाभावःसर्वत्रसंशयेत्वेचकथंसंघटतेसाशंक्यनिराचष्टे॥नचेतितत्कारणसमावदिवादि

100

का ना

व्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यतः तर्कः ।। अनवस्थां निरस्यति ।। क्वचिन्नास्त्वेति ।। तर्कमूले सर्वः ।। तन्निवर्तकः ।। व्यभिचारशंकानिवर्त्तकः ।। ननु सर्वत्र व्यभिचारशंकोदिसम्भवे त्वसिसेवल्सामंत आह ।। अनुभूयत एवेति ।। तथा च प्रमाणाभावेन संशयसामग्र्येव न कल्पत इति भावः ।। ननु तर्कस्य व्यभिचारशंकानिवर्त्तकत्वे प्रमाणाभावः ।। अनाहार्यशं-

प५ कायास्तर्ककारणीभूततज्ज्ञानेनैव निरस्तत्वात् । तथाहि ।। आपत्तिं प्रतिपक्षधर्मतां च आहार्यरूपापाद्यव्यापादकवत्ताज्ञानं आपाद्यव्यतिरेकनिर्णयश्च हेतुः ।। व्याप्तिश्चान्वयतो व्यतिरेकतश्च ।। तथा च धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यत्र वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यमिति अन्वयव्याप्तिज्ञाने वह्निजन्यत्वाभावे वह्निव्यभिचारित्वव्यापकत्वग्रहात् वह्निव्यभिचारित्वव्यापकवह्निजन्यत्वाभाव इति ज्ञानसंपत्त्या आपाद्यव्यतिरेकनिर्णयविषयात्तदभाववत्ताज्ञानस्य च सत्त्वात् ।। वह्निव्यभिचारित्वव्यापकाभाववत्ताज्ञानसंभवान्नानाहार्यव्यभिचारशंकासंभवः ।। एवं वह्निजन्यत्वव्यापकीभूताभावप्रतियोगिवह्निव्यभिचारित्वमिति व्यतिरेकव्याप्तिग्रहेऽपि वह्निव्यभिचारित्वाभावे वह्निजन्यत्वव्यापकत्वग्रहे तुल्यवित्तिवेद्यतया वह्निजन्यत्वेऽपि वह्निव्यभिचारित्वाभावव्याप्यत्वग्रहे वह्निव्यभिचारित्वाभावव्याप्यं वह्निजन्यत्वमिति ज्ञान-

न२ संभवे तद्वत्ताज्ञानस्य चापाद्यव्यतिरेकनिर्णयविषयासत्त्वेनैतदभाववान्धूमोऽयमिति ज्ञाने विषमानेऽपि तद्व्यापकाभाववत्ताज्ञानस्य विशिष्टवैशिष्ट्यावगाहिन एव तदत्ताज्ञानप्रतिबंधकतया कथं तस्य विरोधित्वं ।। एवं व्यतिरेकिणि आपादकाभावव्याप्यापाद्याभाववान्धूमोऽयमिति ज्ञाने संभवेऽपि तदभावव्याप्यवत्ताज्ञानस्यापि व-

२+ तदभाववत्ताज्ञानव्याप्यवत्ताज्ञानस्य सत्त्वान्न तदाशंकोदयः ।। नव्यास्तु यन्न्यापादकव्यापकमापाद्यं ।।+२

(10)

× वेप्यर्थ्यमिति चेदत्रोच्यते। अनाहार्यशंकाया न व्यतिसंभवेपि आहार्यशंकानिवर्त्तकत्वेनैव केनैतोपेक्षा ×१०

धीत्वेनैव शंक्यावगाहिन एव तत्र प्रतिबंधकत्वात्तदसंभव एवेति वाच्यं॥ धूमव्यापको वह्निः वह्न्यभाववांश्चायमिति ज्ञान
द्वयसाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्यापकत्वग्रहकालीनतद्धर्मावच्छिन्नाभाववत्ता निश्चयत्वेनैव व्यापकाभा
करादि ३ वज्ज्ञानस्य प्रतिबंधकत्वात्॥ एवं पुरुषत्वव्याप्य करादिमांश्चायमिति ज्ञानवद्द्वयसाधारण्याय तद्धर्मावच्छिन्नविशे
ष्यकव्याप्यत्वग्रहकालीनतद्धर्मावच्छिन्नवत्त्वनिश्चयत्वेनैव तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वात्॥ उक्तज्ञा
नद्वयसत्वेन संशयानुदयात्॥ यद्विच व्यतिरेके आपादकाभावे आपाद्याभावव्यापकत्वग्रहेपि आपाद्याभाववत्त्वे आ
न६प६ पादकाभाववत्त्वज्ञानस्यैनेष्यत्वं तुल्यवित्तिवेद्यत्वेमानाभावात्॥ एवं व्यापकाभाववज्ज्ञानस्य तदभावव्याप्यव
त्ताज्ञानस्य च विशिष्टवैशिष्ट्यावगाहिन एव तन्मात्रवात् प्रतिबंधकत्वं उक्तज्ञानद्वयस्य प्रतिबंधकत्वेपि तदुभयोन
स्पष्ट स्यैव विशिष्टज्ञानादेः प्रतिबंधकत्वेन दृष्टे आपादकसंशयोत्पत्तौ बाधकाभावादिति विभाव्यते तथापि आपाद्याभा
मनुमिति ववत्तानिश्चयस्यापादकज्ञाने व्यावर्त्तकधर्मदर्शनविधया प्रतिबंधकत्वमव्याहतमिति अनाहार्यव्यभिचारि
त्वसंशयस्याभावात् आहार्यशंकायास्तु विरोधित्वान्न कस्यापि उपयोगः॥ [illegible]स्याः अप्रतिबंधकत्वे तु तर्कस्याः प्रति न
बंधकत्वमेव॥ न च तथापि तर्कस्याहार्यज्ञानरूपस्य कथमाहार्यश्चमाहार्यशंकाप्रतिबंधकत्वं आहार्यज्ञानस्या
प्रतिबंधकत्वात् प्रतिबध्यत्वाच्चेति वाच्यं॥ अनिष्टप्रसंजनात्मकतर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसा
धनत्वज्ञानजननेनापादकज्ञाने द्वेषोत्पत्त्या तच्चेच्छानुसंतानाविच्छारूपकारणाभावेनाहार्यशंकानुदयात् तर्केण न तन्नि ३
वर्त्तकस्यार्थवशसंपन्नत्वात्॥ अत एवापादकांशे संशयात्मकज्ञानमपि तर्के हेतुः॥ अन्यथा तन्निर्णयस्यैव हेतु
त्वे कारणीभूते आपादकनिर्णय एव तर्कमिति मध्ये [illegible]साधनतज्ज्ञानसंभवेपि तत्संशये विशिष्टसाधनताज्ञाना

१०२

तर्क०प्र०५८

सत्यक्ष५८

त्त्वेनतत्रेच्छोत्पत्तौबाधकात्त्वेनाहार्यशंकानिवर्त्तकत्वासंभवात्॥केचित्तु॥तदापादकापत्तित्वेनाऽ[illegible]हार्यसाधारण अनाहार्य१
तद्विशेषबुद्धित्वेनप्रतिबध्यप्रतिबंधकभावः॥समानविषयकत्वात्तावे[illegible]पिफलबलात्कल्पनीयइतितर्कोपियो
गित्वमाहुः॥अन्येतु॥व्यभिचारशंकायामुत्तेजकतयातर्कोपयोगइत्याहुः॥यद्यपिबाधकालीनमिच्छाजन्यंज्ञा
नमाहार्यंतथापिप्रकृतेरिच्छाजन्यत्वमात्रंआपादकांशेआहार्यत्वंबोध्यं॥तर्कश्चद्विविधः॥व्याप्तिग्राहोविषयपरि
शोधकश्च॥आद्यस्तूक्तएव॥द्वितीयस्तुपर्वतोयदिनिर्वह्निःस्यात्तर्हिनिर्धूमस्यादित्याकारकः॥विषयस्या
नुमितिविषयस्यसाध्यस्यपरिसंशुद्धिः॥विरोधिशंकाविघटनं॥ननुसाध्यव्याप्यवत्तापरामर्शेसाध्यसंदेहस्या
नवतारात्कुतस्तस्यविरोधित्वं॥आद्यसंशयस्याप्रतिबंधकत्वाच्चतर्केणापिकथंतन्निरासइतिचेन्नैवं॥स्वर
सवाहिनःसंशयस्यविशेषदर्शनेनप्रतिबध्यत्वेपिअन्याहितस्यतस्याप्रतिबध्यत्वात्प्रतिबंधकत्वाच्च॥तथाचयथा
धूमादौक्रमव्याप्तेनव्यभिचरितव्यंतथापिकुतश्चिद्धूमसत्त्वसाधनाद्धूमत्वावच्छेदेपिसव्यभिचरितव्यमितिशंकातद पा८
र्कैकवह्निविरहसाधकमितिजिज्ञासोपजायते विरोधिप्रमाणजिज्ञासयाबाधकप्रमाणशंकातयासाध्या
भावशंकाजन्यतेसाचसत्यपिपरामर्शेऽन्याहितत्वादुत्पद्यते॥अत्राप्रामाण्यशंकाहितेवाधर्मशंका[illegible]सत्यपि
अर्थनिश्चये॥निर्वह्निःस्यादितितर्केणचानिष्टप्रसंजनात्तेनाविरोधिप्रमाणजिज्ञासानुत्पत्तौबाधकप्रमा
णशंकानिवृत्तौतदाहितसाध्यशंकायाअपिनिवृत्तिः॥अन्यथाविधायास्तुसाध्यशंकायाःसतिपरामर्शेसंभवा
त्प्रतिबंधकत्वाच्चेतिसर्वमवदातं॥दृष्टांतेति॥महानसीयधूमवह्न्योःसन्निकर्षेणतत्रैवव्याप्तिग्रहोनतुपर्वते

क

(103)

रूप३ धूमत्व२

यधूमेपि पर्वतीयवन्हेरसन्निकर्षेणतादृशरूपेणव्याप्तिग्रहासंभववादीति भावः॥ स्मर्यतइति। महानसीयधूमे
धू.२ धूमत्वंधर्मितावच्छेदकीभूयव्याप्त्यनुभवः ततः पर्वतीयधूमज्ञानात् एकसंबंधिज्ञानमपरसंबंधिस्मारकमिति न्या
येन तादृशव्याप्तेः स्मरणेजाते व्याप्तिस्मरणे विशेषणज्ञानात् वह्निव्याप्योयंधूमः पर्वतवृत्तिरिति व्याप्त्यंशेउ
पनीतज्ञानात्मकंप्रत्यक्षं ततश्चानुमितिरित्यखंडलार्थः॥ नचमहानसीयधूमवृत्तिव्याप्तेः पर्वतीयधूमेऽसत्वा
मा त्कथंतत्प्रत्यक्षमितिवाच्यं॥ यादृशधूमसमानाधिकरणाः सर्वेषां व्याप्यसमानाधिकरणास्तद्वृत्तित्वमभिन्नत्वं च तद्धर्मवत्वं त म्
प्रि.६ द्धर्मएवेत्यर्थपर्यालोचनया धूमत्वस्यैव व्याप्यतावच्छेदकत्वात् तस्य पर्वतीयधूमेपि सत्वात्॥ ननु एवं धूमत्वस्यैव व्या
प्तित्वे तस्य व्याप्यतावच्छेदकत्वानुपपत्तिः॥ अत एवावच्छेद्यावच्छेदकभावानभ्युपगमादिति वाच्यं॥ कारणतात्व घ७
कारणतावच्छेदकयोः इदं त्वत्र उपहितानुपहितभेदादेव न स्यसमर्थनीयत्वात्॥ अत एव परामर्शग्रंथे सत्
त्व्याप्तेः पक्षवृत्तिधूमे सत्वादेवं वह्निसाध्यकत्वेनेन चिंतामणिकारेणापि तथोक्तं॥ नच यो यत्र पूर्वमवग
तः स एव तत्र संस्कारवशात् यथार्थप्रत्यक्षेत्वासत्त्वादिति नियमात् पर्वतीयधूमे पूर्वं व्याप्तेरवगमात् कथं तत्र व्या न५
प्तेरुपनीतज्ञानं॥ यत्र चंदने सौरभं घ्राणेनोपलब्धं तत्रैव चक्षुषा सुरभिचंदनमित्युपनीतज्ञानं॥ अन्यत्र त्वनु
मानादिति वाच्यं॥ यद्धर्मावच्छेदेन यद्धर्मत्वं तद्धर्मावच्छेदेन तदुपनीतज्ञानमित्येव नियमात्॥ अस्ति चात्र धूम
त्वेनैव व्याप्तेर्ग्रहात् धूमत्वेनैव व्याप्तेरुपनीतज्ञानमिति॥ इदं तु सामान्यलक्षणानंगीकारेणोक्तं॥ व
स्तुतस्तु॥ सामान्यलक्षणांगीकारेण व्याप्तेर्ज्ञानात्वेपि तादृशनियमाभ्युपगमेपि न क्षतिः॥ महानसीयधूमे
क्ष

धूमत्वेनवह्निव्याप्तिज्ञानंजायमानंधूमत्ववह्नित्वसामान्यलक्षणयायावद्धूमवह्निज्ञानेनयावद्वह्निनिरूपितया
यद्धूमनिष्ठव्याप्तिज्ञानमेवजायतइतिपर्वतीयधूमेपिव्याप्तेःस्फुरितत्वेनतदुपनीतभानेबाधकाभावादनुमिति
रूपपत्तेरित्यभिप्रायेणाह॥ यद्वेति॥ केचित्॥ उक्तेत्यादि॥ महानसीयधूमनिष्ठव्याप्तिस्तत्रैवगृहीताततःपर्वतीय
धूमेधूमत्वदर्शनात्महानसीयधूमनिष्ठव्याप्तेरेवस्मरणंततःपक्षधर्मताधर्मेमहानसीयधूमनिष्ठव्याप्त्युप
नीतभानंततअनुमितिरित्यर्थः॥ तथाचभ्रमात्मकपरामर्शादेवानुमितिरितिभावः॥ ननुसल्लिंगपरामर्शस्यै
वव्याप्तित्वेनसल्लिंगपरामर्शस्यैवप्रमानुमितिहेतुत्वन्यायधार्थपरामर्शाभावेकथंप्रमात्मिकानुमितिरित्यतआह॥
यद्वेतीत्याकूतः॥ तदसत्॥ धूमत्वस्यैवव्याप्तित्वेनसल्लिंगपरामर्शस्यैवपूर्वकल्पेपिसंभवात्॥ यद्यपिपक्षसमा
नाधिकरणात्यत्रतत्वंव्याप्तिरित्युक्तव्याप्तेर्नानात्वमपिग्रंथकृदभि[redacted]हितंतथापिपर्यायद्विशेषेतिद्वितीयल
क्षणस्यैवनिर्दुष्टत्वेतदभिप्रायेणसल्लिंगपरामर्शमादायैवयोजयितुंशक्यत्वेभ्रमात्मकपरामर्शमादाय॥ न५
उक्तकुसृष्टेरनादरणीयत्वात्॥ इतिनकिंचिदेतत्॥ धूमत्वसामान्यलक्षणप्रत्यासत्तेति॥ अत्रचज्ञायमानंसा
मान्यंप्रत्यासत्तिरितिबोध्यं॥ तत्रेंद्रियसंबद्धत्वधा॥ तेनमिलितनयनस्यनसामान्यलक्षणाप्रत्यासत्तिजन्य
ज्ञानापत्तिः॥ तथाचेंद्रियसंयुक्तेधूमेधूमइतिज्ञानानंतरंधूमत्वसामान्येयावद्धूमविषयकंधूमाइत्याकारकं लक्षणपा॰
ज्ञानंजायते॥ इंद्रियसंबंधश्चात्रसंयुक्तसमवायः॥ धूलीपटलेधूमभ्रमानंतरंधूमाइतिज्ञानानुत्पत्तेः॥

तथा च यत्तदुत्तरं धूलीपटले धूमत्वेन व्याप्तिग्रहाज्ञायमानायां वह्न्यनुमितेरुच्छेद असंगा..त् पर्वतीयधूमे व्याप्त्यग्रहात् किंतु इंद्रियसंबद्धविशेष्यक
ज्ञानप्रकारत्वरूपो वा ज्ञानिकासंबंधो यो यो इंद्रियसंबंधघस्याचलौकिकसंबंधः ॥ तेन निमीलितनयनस्य न तदापत्तिः ॥ ज्ञानं च तदिंद्रियजन्यं ग्राह्यं ॥ तेन
पुरोवर्तिनि घटे विशेष्ये दृश्यमाने स्मर्यमाणघटत्वेन न याहृत्यचाक्षुषापत्तिः ॥ इदं च बहिरिंद्रियस्थले बोध्यं ॥ तेन तथाविधमानसादयेऽपि क्षतिः ॥ अत्रेदं च सा न ३
धमानसामान्यस्य प्रत्यासत्तित्वे यत्र नानाकपाले एकः घटः प्रत्यासन्नस्तत्र तद्घटनाशे दशायां तद्घटत्वसामान्यलक्षणया यावद्घटत्वज्ञानं न स्यात् ॥ न च तत्रैव
घटत्वमेव तत्तद्व्यक्तिसंबंधेन परंपरया प्रत्यासत्तिरिति वाच्यं ॥ यत्र तत्तद्व्यक्तिसंबंधेन परंपरया न घटत्वादिमानं किंतु तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिप्रकारेण तत्तद्व्य
क्तिमत्ताज्ञानं तत्र गत्यसंभवात् ॥ न च परंपरयात्तद्व्यक्तित्वमेव प्रत्यासत्तिरिति वाच्यं ॥ तत्तद्व्यक्तित्वस्य तत्तद्व्यक्तिरूपसाधकतया तस्यापि नष्टत्वादिति ॥ तथा रसा घा ६
विधसामान्यज्ञानं प्रत्यासत्तिर्बोध्या ॥ तत्र च घटत्वाश्रयतया वस्तुतोऽपि प्रत्यक्षे इंद्रियसंबंधविशेष्यकज्ञानप्रकारीभूतघटत्वत्वेन तथाविधघटत्वज्ञानत्वे
न वा न हेतुतायां विषयकत्वस्य कार्यतानवच्छेदकत्वेऽपि विनिगमनाविरहेण पादिविषयकत्वस्यापि विकल्पसंपन्नत्वेन तन्निवेशप्रयोजनाभावात् ॥ प्रत्यास
घट१ योगाजन्यस्वविषयकज्ञानाजन्यघटत्वातिरिक्तघटवृत्तिधर्मप्रकारकप्रत्यक्षं प्रति तथाविधघटत्वत्वेन ज्ञानत्वेन वा हेतुता निर्विकल्पकोत्तरोत्पन्न
घटप्रत्यक्षे व्यभिचारवारणाय संयोगाजन्यत्वं तन्निवेशः ॥ पटत्वेन घटज्ञानानंतरं पटवद्घटस्युपनीतभाने तत्र पटत्वेन घ
टप्रत्यक्षोदयात्तत्र घटत्वज्ञानाभावाद्व्यभिचारवारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः ॥ द्रव्यत्वसामान्यलक्षणाजन्यप्रत्य न्य ८
द७ क्षवारणाय घटत्वातिरिक्तेत्यादीति चेन्न ॥ तथा सति घटत्वद्रव्यत्वोभयसमूहालंबनस्थले परस्परकार्यकारणभावाप
त्तेः ॥ किंतु घटत्वादिप्रकारतानिरूपितलौकिकान्यघटादिमुख्यविशेष्यताशालिचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषप्रत्या
५दि द्वि५ सत्तित्वं घटत्वज्ञानाघटत्वप्रकारताशालिचाक्षुषत्वादिना वा हेतुता बोध्या ॥ प्रत्यक्षविषयत्वसमवायघटितसामानाधि
करण्यं ॥ द्वितीयं च समवायघटितसामानाधिकरण्यं प्रत्यासत्तिः ॥ विशेष्यतायां घटत्वप्रकारतानिरूपितत्वनिवेशा
द्द्रव्यत्वादिसामान्यलक्षणाजन्यज्ञानेन व्यभिचारः ॥ निर्विकल्पकानंतरोत्पन्नघटमुख्यविशेष्यकलौकिकचाक्षुषव्य
भिचारवारणाय विशेष्यतायां लौकिकान्यत्वनिवेशः ॥ घटत्वप्रकारकघटस्मरणजन्यघटाद्युपनीतभाने घटत्वप्रका
रकचाक्षुषरूपकारणविरहाद्व्यभिचारवारणाय विशेष्यतायां मुख्यत्वनिवेशः ॥ मुख्यविशेष्यतात्वं च प्रकारतान्यवि

शेष्यतायां बहिरिंद्रियजन्यज्ञानेउपनीतंविशेषणतयैवभासते।।मानसेत्वनियमात्।।विशेष्यतयैवघटादेरिति।।ननुमुख्यवि
शेष्यत्वमिति।।कारणतावच्छेदककोटौघटत्वादिप्रकारताकत्वनिवेशान्ननिर्विकल्पकोत्तरंसामान्यलक्षणाजन्यस्याव
द्घटप्रत्यक्षापत्तिः।।पुरोवर्तिनिदोषवशान्नयनेनागृह्यमाणेस्मरणप्रकारीभवताघटत्वेनयावद्घटचाक्षुषवारणा
स्मरण४ यचाक्षुषत्वनिवेशः।।समवायेनघटत्वप्रकारकज्ञानबलात्कालिकादिसंबंधेनघटत्वाश्रययावद्घटिकप्रत्यक्षाप
त्तिनिवारणायसंबंधविशेषोपिनिवेशनीयइतिप्राचीनमतेनिष्कर्षः।।नवीनमतंदर्शयितुंशंकते।।नव्यास्त्विति।।तदाश्रये
ति।।सामान्याश्रयेत्यर्थः।।साक्षात्कारःस्यादिति।।चाक्षुषसाक्षात्कारःस्यादित्यर्थः।।तेनमानससाक्षात्कारे
दर्पेपिनक्षतिः।।नवीनमतमभिप्रेत्यसिद्धांतयति।।घटसामान्यमिति।।यदित्यस्यसामान्येनाभेदान्वयः।।त[illegible]का प्र७
रकतदाश्रयेति।।मानससाक्षात्कारसामग्रीसत्वात्।।लौकिकेति।।सामग्रीचचक्षुःसन्निकर्षालोकसंयोगादि
रूपा।।सहकारित्वादिति।।बहिरिंद्रियजन्यज्ञानसहकारित्वादित्यर्थः।।विमुद्रितनयनस्यचचक्षुःसंयोगादिरू
पधूमसामग्र्यसत्वान्नप्रत्यक्षमितिभावः।।नचधूलीपटलेधूमभ्रमात्धूमादितिज्ञानानुदयापत्तिः।।धूमभ्रम
सामग्र्यसत्वात्तत्रलौकिकप्रत्यक्षसामग्र्यभावादितिवाच्यं।।तदाश्रयेत्यस्यतद्धर्मप्रकारतानिरूपितविशेष्य
ताश्रयेत्यर्थात्।।धूमत्वप्रकारतानिरूपितविशेष्यताश्रयेधूलीपटलेलौकिकप्रत्यक्षसामग्र्यसत्वेनादोषात्।।
ननुप्राचीनमतेतत्पुरुषीयधूमाश्रयविषयकलौकिकचाक्षुषत्वावच्छिन्नंप्रतितत्पुरुषीयचक्षुःसन्निकर्ष
त्किंचिद्विशेष्यकतत्पुरुषीयचाक्षुषप्रकारे।तद्धूमत्वेनहेतुतयातेनैवविमुद्रितनयनस्यापिप्रत्यक्षापत्ति

वारणे गुरुतरसामग्र्याः सहकारित्वकल्पने नव्यमते गौरवमिति चेन्नैवं ॥ अथ चेत्तमसि सौदामिनीसंपातजनितद्रव्यविषयक
चाक्षुषोत्तरं आलोकसंयोगविगमेऽपि तादृशकारणसत्त्वात् सकलद्रव्यसाक्षात्कारधारापत्तेः तादृशसामग्र्याः स
हकारित्वकल्पनावश्यकत्वात् ॥ एवं धूमत्वांशे यदप्रत्यक्षे ज्ञानप्रकारीभूतधर्मत्वेनैव हेतुत्वं न त्विंद्रियभेदेन पुरुषभे
देन वा कार्यकारणभाव इत्यपि लाघवं ॥ अथैवं चक्षुःसन्निकृष्टपुरोवर्त्तिनि घटे ग्रहप्रतिबंधकदोषसत्त्वे घटत्वस्मर त्व ४
णबलात् यावद्घटचाक्षुषापत्तिः न च तदाश्रयत्वस्य तद्धर्मविशेषत्वस्यार्थः । तथा च तद्धर्मविशिष्टलौकिकप्रत्यक्षसा
मग्र्याः सहकारित्वात् तद्धर्मारोपितलौकिकप्रत्यक्षसामग्र्याः सहकारित्वलक्षणे प्रकृते घटत्वांशे दोषसत्त्वात्तद्घटितसा
मग्र्यसत्त्वान्न घटत्वाश्रययावद्घटचाक्षुषापत्तिरिति वाच्यं ॥ तथा सति धूलीपटले धूम[illegible]मानंतरं धूमादौ तज्ज्ञा
नानुदयापत्तेः ॥ धूमत्वांशे लौकिकप्रत्यक्षसामग्र्यसत्त्वादिति चेन्न ॥ तत्र यावद्घटचाक्षुषस्वीकारे इष्टापत्तेरिति न
व्यमतनिगर्वः ॥ अत्र केचित् ॥ ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारे सुरभिचंदनमित्यादौ सौरभादिज्ञानानिर्वाहात्तत्स्वीका त्वा ८
पि ष्टरः ॥ सौरभत्वसामान्यलक्षणया सौरभभाननिर्वाहे सौरभत्वविधर्मज्ञानाभावेन सौरभत्वज्ञानस्य सामान्यल
क्षणया निर्वाहासंभवात् ॥ अत एव दीधितिकृत् सुरभिचंदनमित्यादौ सौरभत्वादेरपि ज्ञानमित्याह ॥ तच्चेन्न सं
गच्छते ॥ सौरभत्वप्रकारकसौरभविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रति सौरभसन्निकृष्टत्वेन सामान्यलक्षणाजन्यप्र त्वप्रकारक ५
त्यासत्तेर्हेतुत्वोपगमेन सौरभत्ववृत्तिधर्मज्ञानाभावेऽपि सौरभत्वज्ञानबलादेव सौरभत्वज्ञानोपपत्तेरिति ज्ञानल
क्षणप्रत्यासत्तिस्वीकारो निरर्थकः ॥ अथ सामान्यलक्षणया प्रत्यक्षे जननीये तद्धर्मप्रकारतानिरूपित
विशेष्यतांशे लौकिकप्रत्यक्षसामग्र्याः सहकारित्वात् तां विना कथं सामान्यलक्षणया सुरभिचंदनमित्यादौ सौ
रभस्य सौरभत्वस्य वा भानमिति ज्ञानलक्षणास्वीकार आवश्यक इति चेन्न ॥ सामान्यलक्षणया तद्धर्माश्रयप्रत्यक्षवि

108

शेष्यताशाल्यलौकिकप्रत्यक्षेजननीये एवतदाश्रयलौकिकप्रत्यक्षसामग्र्याः सहकारित्वाभ्युपगमेनतदभावेपिसौ
रभविशेषणकालौकिकप्रत्यक्षजनने बाधकाभाव इत्याकूतं तन्न। यत्र सौरभत्वांशेउपनीतज्ञानात्मकंसौरभत्व
प्रकारकचंदनविशेष्यकंसौरभंचंदनमितिभ्रमात्मकंज्ञानंतत्रसौरभत्वभानंसौरभत्वज्ञानरूपसामान्यलक्षणया
ननिर्वहतिसौरभत्वप्रकारतानिरूपितसौरभनिष्ठविशेष्यताशालिज्ञानत्वस्यैवसौरभत्वज्ञानरूपायाःसामा
न्यलक्षणाप्रत्यासत्तेः कार्यतावच्छेदकत्वात्॥ ननु[illegible]दीधितिकृता इत्थंच धर्मविषयकज्ञानंधर्मिणःप्रत्यासत्तिरि
तरानुयोद्धयकंज्ञानंतस्यैवेतितथाचचंदनस्यसौरभत्वानाश्रयत्वेनतत्रसौरभत्वभानार्थंज्ञानलक्षणास्वीकार
आवश्यकः॥ नचतत्रदोषबलादेवसौरभत्वभानमितिवाच्यं॥ अस्यदोषस्येंद्रियसन्निकर्षजन्यत्वनियमेनसौरभत्वां
शेसन्निकर्षस्यावश्यकत्वात्॥ अतएवरजतत्वांशेलौकिकसन्निकर्षाभावादलौकिकसन्निकर्षस्यसत्वान्ना
न्यथाख्यातिरितिप्राभाकराः॥ तथाचतादृशनियमस्यसर्वसिद्धत्वात्सौरभत्वभानार्थंज्ञानलक्षणास्वीका
रआवश्यक इति॥ ननुव्याप्तिज्ञानस्यानुमितिहेतुत्वसंभवेपिकोपवर्त्तंव्याप्तिज्ञानकालेप्यनुमित्यापत्तिरित्याशंकते॥
नन्विति॥ ननुपक्षवृत्तिधूमविशेष्यकंव्याप्तिज्ञानंकारणंतत्रपक्षवृत्तिधूमोवह्निव्याप्य इत्याकारकं[illegible]तत्सत्वे
चानुमित्युत्पत्तौकुत्रापिविवाद इत्याशयेनाशंकते॥ नचेति॥ सर्वत्रैव धूमेति॥ पक्षवृत्तित्वावगाहिज्ञानंका
रणमितितावद्ध्रुवंवह्निव्याप्यधूमवान्पर्वत इतिज्ञानादप्यनुमित्यापत्तेः॥ तत्राधेयता[illegible]याज्ञानेभानाभा
स्त॰२ वात्॥ किंतुव[illegible]गत्यापक्षवृत्तिविषयकंतत्तत्र धूमोवह्निव्याप्य इत्यत्रापिधूमत्वेनपर्वतीयधूमविषयकत्वाद
ज्ञातमितिअततोनुमित्यापत्तिरितिभावः॥ यत्तुदृष्टांते धूमोवह्निव्याप्य इतिज्ञानाद्दृष्टांतेनुमित्यापत्तिरित्याशंकते॥

१०९

५०

नन्विति तत्तुच्छं।। दृष्टांते महानसादौ वह्निमत्त्वाज्ञानसत्त्वेन पक्षताविरहादेवानुमितेरनुदयादन्यथासिद्धांतेर्गतेः।
न हि व्याप्यस्य स्वरूपेण पक्षतावैशिष्ट्ये हेतुमत्तानिश्चयः कारणमिति तदर्थः।। तथा सति पक्षताभावः परामर्शकुक्षि
त्रुयप ३ क्षेपापत्त्या कारणतावच्छेदकतापत्त्याकरणत्वोपपत्तेः।। किंतु पक्षत्वं साध्याधिकरणत्वमेव तथा च व्याप्तिविशिष्टवै
शिष्ट्यावगाहि ज्ञानं कारणमित्यर्थोल्लिख्यते तत्तु महानसादावपि संभवत्येवेति पक्षताविरहान्न तत्रानुमितिरित्यु
पेयं।। द्रव्यत्वेनेति।। एकरूपावच्छिन्नव्याप्तिपक्षधर्मतावगाहित्वमनत्वेन हेतुत्वात्किंतु वह्निव्याप्यवानिति ज्ञाना
दनुमित्यनापत्तिरिति भावः।। व्याप्यत्वप्रकरणेति।। व्याप्तिविशिष्टवैशिष्ट्यावगाहि ज्ञानं कारणमित्यर्थः।।
नन्वेवं खंडशः अव्यभिचारसहचारयोर्ग्रहे व्यभिचारितद्वह्निसहचरितधूमवानिति ज्ञानात्।। एवं विशेष्ये
मि विशेषणं तत्रापि विशेषणांतरमित्यादिन्यायेन वह्निव्याप्यधूमवानयमिति ज्ञानादनुमित्यनापत्तिरिति चेन्न।।
व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन लाघवेन कारणत्वसिद्धौ ततोनुमित्यभावेऽप्यापत्तेः।। लाघवं च व्या
प्त्यंशे निश्चयत्वानिवेशेन।। अन्यथा वह्निव्याप्तिवह्निव्याप्यसाध्यधूमवान्पर्वत इति व्याप्त्यंशे संशयात्मकज्ञाना
दनुमित्यापत्तेः।। व्याप्त्यंशे निश्चयात्मकतादृशज्ञानत्वेन कारणत्वं वाच्यमिति गौरवान्मन्मते तु व्याप्तिविशिष्टवैशिष्ट्यावगाहि उ४
बाधे विशेषतावच्छेदकप्रकारकनिश्चयत्वेन विशेषतावच्छेदकप्रकारकज्ञानाभावत्वेन वा कार्यकारणभावेति तथा
कारणत्वे न व्याप्त्यंशे संशयात्मकतादृशज्ञाने विशिष्टवैशिष्ट्यविषयकत्वाभावेनैवापत्त्यभावादिति दिक्।। व्या शे२
प्तिविशिष्टवैशिष्ट्यावगाहित्वं च व्याप्यत्वावच्छिन्नप्रकारतानिरूपितपक्षनिष्ठविशेष्यताशालित्वं।। न च व्याप्य
पक्षोपंजयवैशिष्ट्यावगाहित्वेन तत्।। व्याप्यत्वावच्छिन्नविषयतानिरूपितपक्षनिष्ठविषयताशालित्वमिति यावत्।।

ता५ मा व४ उ४

(110)

प्यो१

तर्कसं॰ ५४

अनु॰ ५४

एवं च वह्निव्याप्यो धूमः पर्वत इत्याधेयतासंसर्गकपर्वतप्रकारकज्ञानस्यापि संग्रह इति वाच्यं॥ अप्रामाण्यज्ञानद्वयस्यो
त्तेजककालानुरोधेन निश्चयपदद्वयनिवेशानुरोधेन च द्वयोः पृथगेव हेतुतायाः ऐक्यासंभवेनाऽऽवश्यकत्वात्॥
न्य३ अथ एकविधपरामर्शस्य हेतुत्वेऽन्यविधाप्रामाण्यज्ञानसत्त्वेऽनुमित्यनापत्तेः॥ मिथो विशेषणविशेष्यभावे विनिगमना
विरहेण च नानासंबंधावच्छिन्ननानाधर्मावच्छिन्नावच्छेदकताया ऐक्यासत्त्वेनावच्छेदकतायामव्यासज्य
वृत्तित्वासंभवात्॥ नन्वेवं वह्निव्याप्यो धूमः पर्वत इति ज्ञानादनुमित्यनुदयापत्तिः तत्रोक्तविशिष्टवैशिष्ट्या
वगाहित्वसत्त्वादिति चेन्न॥ तस्यापि स्वातंत्र्येण हेतुत्वोपगमात्॥ अव्यवहितोत्तरत्वनिवेशेन च परस्परजन्या
नुमितौ न व्यभिचारः॥ वस्तुतस्तु॥ अनुमितेः पक्षविशेष्यकत्वनियमेनाप्युपरि विशेषो व्यवसायकर इति न्या
येन पक्षविशेष्यकपरामर्श एव हेतुर्न व्याप्यविशेष्यकोऽपीति ध्येयं॥ उक्तातिप्रसंगं वारयति॥ न चेति॥ नन्वेवं
वह्निव्याप्यो धूमः धूमवान्पर्वत इति ज्ञानादनुमित्यनुदयापत्तिरिति वाच्यं॥ तदुत्तरपरामर्शांगीकारेण तदुपपत्तेरि
ति भावः॥ निश्चयपदमिति॥ निश्चयत्वं च न तदभाववत्प्रकारकत्वे सति तत्प्रकारकत्वं॥ तथा च शुद्धपर्वतत्वावच्छिन्न व्या५
विशेष्यतानिरूपितवह्निव्याप्यधूमाभावप्रकारता[illegible]न्यत्वे सति शुद्धपर्वतत्वावच्छिन्नविशे त्वा४
ष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिनिश्चयत्वेन पर्वतोद्देश्यकवह्निविधेयकानुमितौ हेतुत्वं॥ नीलपर्वतो
वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्यधूमवांश्चेति निर्णयसंग्रहाय प्रथमशुद्धत्वनिवेशः॥ नीलपर्वतो
वह्निव्याप्यधूमवान्नवेति संशयवारणाय द्वितीयशुद्धत्वनिवेशः॥ नीलपर्वतो वह्निव्याप्यधूमवानिति निश्च

511

यस्य च तादृशानुमितौ स्वातंत्र्येण हेतुतया न ततोऽनुमित्यनुपपत्तिः ॥ अथ पर्वतत्वसामानाधिकरण्येन धूमधूमा
भावावगाहि वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभाववांश्च पर्वत इति ज्ञानं तदानुमित्यनापत्तिरिति चेन्न ॥
धर्मितावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहि वह्निज्ञानं समुच्चयः अवच्छेदकावच्छेदेनान्यतरकोट्यव
गाहिज्ञानं संशय इति नियमात् तथा च पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्ताज्ञानस्य हेतुतायां पर्वतत्व
व्यापकत्वविशिष्टदैशिकविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारतान्यत्वनिवेशः ॥ पर्वतत्वावच्छेदेन व
ह्निव्याप्यवत्ताज्ञानस्य हेतुतायां च शुद्धदैशिकविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारकताशून्य
त्वनिवेश इति दिक् ॥ अनुमितिं प्रति परामर्शत्वेन हेतुत्वे कारणताघटकानन्यथासिद्धत्वनियतपूर्ववृत्तित्व
रूप धर्मद्वयं विशिष्टपरामर्शत्वावच्छेदेन कल्पनीयं ॥ वह्निव्याप्यो धूमो धूमवान् पर्वत इति ज्ञानद्वयस्यानु
प्रति मितिं हेतुत्वे तु परामर्शहेतुत्वेन क्लृप्तनियतपूर्ववृत्तिताकस्य तस्यैवानन्यथासिद्धत्वमात्रं कल्प्यते ॥ तथा च
विशिष्टपरामर्शत्वेन हेतुत्वमसंभवदुक्तिकमिति निष्कृष्टमीमांसकमतं दर्शयति ॥ मीमांसकास्त्वित्यादिना ॥
व्याप्यतावच्छेदकेति ॥ व्याप्यतावच्छेदकत्वेन गृहीतो यो धर्मस्तत्प्रकारकपक्षधर्मताज्ञानमित्यर्थः ॥ अत
एवानुपदं तद्रूपेण व्याप्तिग्रहादीति वक्ष्यति ॥ ययोक्तु तेष्वप्यस्यांशे भ्रमात्मकज्ञानादनुमित्यनुदयापत्तिः ॥ त
त्र वस्तुगत्या व्याप्यतावच्छेदकत्वाभावात् ॥ व्याप्तिज्ञानेन व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानेन सहकारितादृशव्या
प्तिज्ञानेन ॥ अनुमितौ जननीयायां सहकारि धूमो वह्निव्याप्यो द्रव्यं पर्वतवच्चेति ज्ञानादनुमित्यापत्तिं वारयति वारयति ॥

पं ५

अनु॰ ५९
[illegible] ५९

तर्कसं॰ ५९

व्याप्यतावच्छेदमिति॥ व्याप्यतावच्छेदकतया गृहीतमित्यर्थः॥ स्वमते लाघवं दर्शयति॥ एवं चेति॥ ज्ञानद्वयाद
पीत्यपि नावह्निव्याप्यधूमवान्पर्वत इति ज्ञानसंग्रहः। तथाच नैय्यायकमते ज्ञानद्वयात्परामर्शं कल्पयित्वा अनुमि
तिस्वीकारे गौरवमिति भावः॥ लाघवादिति॥ विशिष्टनिश्चयफलरूपलघ्वेकधर्मावच्छिन्नानन्यथासिद्धत्वक
ल्पनाया गुरुधर्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनापेक्षया लघुत्वादित्यर्थः॥ ननु कारणतावच्छेदकलाघ
वेनापि यत्र धूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानं ततः अनुमितिस्तत्र स्वतंत्रविशिष्टपरामर्शं कल्पयित्वाऽनुमिति
कल्पनेन तज्ज्ञानध्वंसादिकल्पने गौरवं क्षणाधिक्यं च स्यादित्यत आह॥ किंचेति॥ वह्निव्याप्यवानिति॥ व्याप्य
तावच्छेदकधूमत्वादिना तत्तज्ज्ञानादित्यर्थः॥ तथा च लाघवाद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वरूपलघ्वे
कधर्मावच्छेदेन कारणत्वे सिद्धे यत्र तादृशज्ञानद्वयं तत्राप्यंतरा विशिष्टपरामर्शं कल्पयित्वानुमितिस्वीकारः।
लाघवानुरोधेन क्षणविलंबस्यापि न्याय्यत्वात्॥ फलमुखगौरवस्यादोषत्वात्॥ मीमांसकमते तु व्याप्त्यं
शे निर्धर्मितावच्छेदका वह्निव्याप्यवानिति शाब्दपरामर्शात्स्वविषयैवानुमितिरित्यपरुचापदीति॥ वस्तुतस्तु व्याप्य
तावच्छेदकप्रकारकव्याप्तिज्ञानव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानयोर्हेतुत्वेपि वह्निव्याप्यो धूमः आ
लोकवान्पर्वत इति ज्ञानादनुमित्यापत्तिः। आलोकत्वस्य वस्तुगत्या व्याप्यतावच्छेदकत्वात्॥ व्याप्यतावच्छे
दकत्वेन गृह्यमाणधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वेपि तथाऽलोकत्वस्यापि कदाचिद्व्याप्यतावच्छेदक
त्वेग्रहात्॥ तत्कालीनतद्रूपाय व्याप्यतावच्छेदकत्वप्रकारकग्रहविषयधर्मस्य तुक्तौ तत्कालीनस्वरूपाय

118

निवेशोगौरवात्॥ एतेनगन्धप्रमाणव्याप्यतावच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेनपक्षधर्मतायत्प्रकारीस
वच्छमवच्छिन्नविशेष्यकव्याप्तिज्ञानत्वेनवाएकधर्मेणमप्यापिकारणत्वंकल्प्यतइत्यपिपरास्तं॥ कालादिप्रवेशेगौर
वादिति॥ धूमत्वप्रकारकःव्याप्तिज्ञानत्वेनधूमत्वप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वंवाच्यं॥ तथा च वह्निव्याप्योधूमः
धूमवान्पर्वतइतिज्ञानद्वयस्यनतावत्सर्वतोद्देश्यकवह्निविधेयकानुमितित्वसामान्येनियतपूर्ववर्तित्वंकिंतुवह्निव्या
प्यालोकवान्पर्वतइतिपरामर्शत्वमजन्यतावदेशानुमितौतयोरसावात्॥ किंतु अनुमितिविशेषे तयोर्हेतुत्वंतत्तुविशेषप
रामर्शस्यापिवह्निव्याप्यवानितिशाब्दपरामर्शजन्यानुमितावस्येवेतिकिंलाघवंतन्मतइतिनजानीमहेइतिदिक्॥
ननुव्यभिचारज्ञानकालेऽपिनिर्धर्मितावच्छेदकव्याप्यवत्तापरामर्शसंभवेनानुमित्यापत्तेर्व्यभिचारस्यहेत्वाभा
सत्वानुपपत्त्याहेतुतावच्छेदकमनिवेश्यनिश्चयत्वानिवेशंविनानुपपत्त्याव्याप्तेर्निर्वक्तुमशक्यतयाचहेतुतावच्छेदकग
र्व्याप्यवत्तापरामर्शएवहेतुर्वाच्यस्तथाचव्याप्यवानितिशाब्दपरामर्शस्थलेकथमनुमितिरित्यस्वरसादाह॥
तस्मादिति॥ वह्निव्याप्यवानित्येवंरूपादिति॥ वह्निव्याप्यधूमवानित्येवंरूपादित्यर्थः॥ उपसिद्धादेवेत्येवकारेण
मीमांसकाभिमतस्यज्ञानद्वयस्यनिरासः॥ व्याप्त्यंशेसंशयात्पक्षधर्मतांशेसंशयाच्चानुमित्यापत्तिवारणाय
व्याप्त्यंशेनिश्चयत्वंपक्षधर्मतांशेचनिश्चयत्वंनिवेशनीयं॥ नैय्यायिकमतेव्याप्त्यंशेनिश्चयत्वमनिवेश्यव्या
द्विविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनैवहेतुत्वमुपेयते॥ व्याप्त्यंशेसंशयात्मकज्ञानेन~~वह्निव्याप्यधूमवा~~वि
शिष्टवैशिष्ट्याभावेनैवापत्त्यभावादितिपूर्वमेवावेदितत्वात्॥ एवंधर्मद्वयावच्छेदेनहेतुत्वकल्पनात्एकध
र्मावच्छेदेनैवतत्कल्पनमितिपास्तं॥ विस्तरः॥ तृतीयमिति॥ अनुमितिकारणीभूतलिंगपरामर्शस्यतृतीयत्वक

तर्क॰प्र॰ ५५
५५

त्रयमित्यर्थः ॥ प्रथममिति ॥ दृष्टांते यद्धूमदर्शनं तत्प्रथममित्यस्यान्वयः ॥ नतइति ॥ पर्वते धूमदर्शनानंतरं धू
मो वह्निव्याप्य इति स्मरणात्मकं व्याप्तिज्ञानं द्वितीयमित्यर्थः ॥ तद्विशिष्टेति ॥ व्याप्तिविशिष्टेत्यर्थः ॥ स्मृतायां
व्याप्तौ वह्निव्याप्यधूमवान्पर्वत इति ज्ञानमेव तत् तृतीयमित्यर्थः ॥ केचित्तु ॥ दृष्टांते धूमदर्शनं प्रथममित्यर्थः ॥
व्याप्तिज्ञानं दृष्टांतीय धूमस्य व्याप्तिमत्तया ज्ञानं द्वितीयमित्यर्थः ॥ तद्विशिष्टेति ॥ दृष्टांते प्रागनुभूतव्याप्ति
विशिष्टहेतोः पक्षवृत्तित्वावगाहिज्ञानं तृतीयमित्यर्थः ॥ ननु प्रामाणिकः इति न्यायवस्तु ॥ गौरवमेवं न दोषा
इति व्याचख्युः ॥ गौरवादिति ॥ लिंगपरामर्शत्वापेक्षया तृतीयलिंगपरामर्शत्वेन हेतुत्वे गौरवादित्यर्थः ॥
ननु प्रामाणिकं गौरवं न दोषायेत्यत आह ॥ व्यभिचारा च्चेति ॥ महानसादौ सिद्धिसत्वेऽपि सिषाधयिषाबला
दनुमित्युत्पत्त्या तत्र तृतीयलिंगपरामर्शत्वेन व्यभिचारादित्यर्थः ॥ फलायोग[illegible]व्यवच्छिन्नत्वं कर
णत्वं रूपकारणत्वं लिंगस्यापि तत्तद्विशिष्टकारणत्वमिति प्रेत्य परामर्श एवानुमितिकरणमिति केचित्[illegible] ॥ लिंगपरा
मर्शस्यानुमितिहेतुत्वे लिंगस्यापि तद्विशिष्टकारणतायामाह कं प्रमाणमस्ति विबाधके, विशेषणस्यापि कारणत्वं गच्छतीति
न्यायेन विशेषणीभूतलिंगस्यापि कारणत्वग्रहात् ॥ दंडत्वादेरपि घटकारणतापत्त्या सत्यंतनिवेशः ॥ तत्रान्यथा
सिद्धेरबाधकत्वात् ॥ एवं विनिगमनाविरहेणापि लिंगस्यानुमितिकरणत्वमित्याशयमनस्याचार्याः ॥ तदुभयमतं निराकु
र्वन्स्वस्य मतमाह ॥ सोऽयमिति ॥ व्यापारत्वाद्वादिति ॥ फलायोगव्यवच्छिन्नत्वस्य कारणत्वस्य च व्यापारवदसा
धारणकारणत्वापेक्षया गुरुत्वेनाहेतुत्वादिति भावः ॥ यथा चैतत्तथा प्रत्यक्षपरिच्छेदे विवेचितं ॥ ननु यत्र परा

परामर्श एवानुमानमिति ॥ एवं लिंगपरामर्शस्यानुमितिहेतुत्वे

अनु॰ ५५
५५

ण६

मर्शानंतरं स्मिच्छिनाशः ततोनुमितिः तत्र योग्यविभुविशेषगुणत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नगुणत्वेन हेतुतयापरा
मर्शस्यापि स्मिच्छिनाशरूपव्यापारवत्करणत्वं संभवसंभवतीति चेन्न। यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तद्व्यापारत्वमि
तिनियमेन तज्जातीयेऽन्यत्र तथात्वासंभवेन तस्यानुमानत्वेनांगीकारस्यासंभवितत्वादिति।। लिंगमिति।। अनुमि
तिकरणमित्यनुषज्यते परामर्शव्यापारकमित्यनेन करणलक्षणसत्त्वं सूचितं।। न हीति।। अतीतानागतधूम
विषयको यत्र मानसो वह्निव्याप्यवत्तापरामर्शस्तत्रानुमितेरनुत्पत्त्यापत्तेरित्यर्थः।। न च तत्र तत्प्रागभावादीना
मेव लिंगत्वमास्तामिति वाच्यं।। तेषां तु व्याप्यत्वेनाऽपरामृश्यमाणत्वादिति भावः।। नन्वतीतलिंगस्यत्वे
पा नुमितिपूर्वं तस्य सत्त्वेन हेतुत्वमक्षतमत आह।। अनन्यथेति।। अनुमित्यव्यवहितपूर्वक्षणावच्छेदेन तत्सत्त्वमि
ति भावः।। ननु कारणत्वं कार्याव्यवहितपूर्वक्षणावच्छेदेन कारणतावच्छेदकसंबंधावच्छिन्नकार्याधिकरणवृ
त्त्यभावाप्रतियोगिता न त्ववच्छेदकधर्मवत्त्वं तच्चातीतानागतस्य त्वेऽनुमित्यव्यवहितपूर्वं धूमासत्त्वेनापि तत्सं
कोप बंधावच्छिन्नप्रतियोगिताभावस्यासंभवात्क्षुण्णमेवात यादि।। न तावत्कार्यदशायां ध्वंसप्रागभावौ संबंधः।। वै तयोः सर्वथा
संबंधावच्छिन्नप्रतियोगिताकत्वे सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे च मानाभावेन तथात्वासंभवात् प्रसत्वे प्रमा
णत्वे वा एकविशेषवृत्तिसंबंधावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरनभ्युपगमात्।। धूमाधिकरणतयोस्तथा
त्वासंभवात्।। नाप्यत्यंताभावः प्रतियोगिवृत्तिध्वंसप्रागभावयोरत्यंताभावविरोधित्वादिति चेन्न।। तयोर्विरोधि
त्वे मानाभावात्।। अन्यथाऽन्तराश्यामे घटे रक्तरूपं नास्तीति प्रतीत्यनुपपत्तिः।। तस्या ध्वंसादिवि

तर्कप्र०५८

न प८ ने१

अनु०५८

क्त

भयत्वेऽत्वभाविरक्तवतिरक्तघटेपि तदापत्तिरिति एकत्र ध्वंसप्रागभावयोरत्यंताभावविरोधेऽप्यन्यत्रापि तयो
रत्वसामानाधिकरण्ये बाधकाभावात् ॥ इत्थं चातीते तत्साविधूमवत्यपि धूमो नास्तीति प्रतीत्या धूमात्यंताभावस
त्त्वेनानुमितिरूपकार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकधर्मवत्त्वरूपकारणत्वासंभवात् ज्ञायमानं लिंग
मनुमानमिति दिक् ॥ ननु धूमवति धूमात्यंताभावसत्त्वेपि अव्याप्यवृत्तिक्रियादीनां संयोगादिकं प्रति हेतुत्वोपपत्त
ये कारणत्वलक्षणे कार्याधिकरणवृत्त्यत्यंताभावे यत्र अभावे प्रतियोगिवैय्यधिकरण्यं वृत्तिमत्त्वं वा हेतुमत्ताया
द्वीविरोधितानियामकसंयोगसंबंधेनावश्यं विवक्षणीयं ॥ एवं च धूमाधिकरणे धूमात्यंताभावे सत्त्वेपि तस्य प्र
तियोगिवैय्यधिकरण्याभावाद्धूमवन्नाय हि विरोधितानियामकसंबंधेन वृत्तिमत्त्वाभावाच्च न तादृशत्वं किंतु अ
न्य एव तादृशोऽभावस्तत्प्रतियोगितानवच्छेदकत्वं धूमवत्त्वे क्षुण्णमेव ॥ न च धूमानधिकरणकालावच्छेदेन धू
मात्यंताभावोऽपि प्रतियोगिव्यधिकरण एवेति वाच्यं ॥ प्रतियोगिव्यधिकरणत्वं न प्रतियोग्यधिकरणावृत्तित्वं सा
मानाधिकरणस्याव्याप्यवृत्तित्वमानाभावात् ॥ किंतु प्रतियोग्यनधिकरणवृत्तित्वं अन्योन्याभावस्य व्याप्य
वृत्तितया प्रतियोग्यनधिकरणे न प्रतियोग्यधिकरणत्वसंभवः ॥ अन्यथा अव्याप्यवृत्तित्वसंग्रहवाद
वस्थ्यं इति धूमाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् ॥ नन्वेवं रासभसंयोगादीनामपि कारणत्वापत्तिः ।
त्वदुक्तरीत्या तस्यापि प्रतियोगिवैय्यधिकरण्याभावादिति वाच्यं ॥ अनन्यथासिद्धपदेनैव तद्वारणात् ॥ न
च रासभादीनामपि तेनैव वारणे कारणतालक्षणे नियतपदं व्यर्थमिति वाच्यं ॥ स्वपक्षेऽन्वयमेवतावद्धिस ।

त्व

न

117

यय ॥ न च रासभासंयोगादिवल्लिंगस्यापि अन्यथासिद्धत्वमिति वाच्यं ॥ अन्यथासिद्धेरेकस्यानिर्वक्तुमशक्यतया
तद्घटितभेदकूटस्यैव निवेशनीयतया गौरवेण धूमव्यक्तिभेदानिवेशात् ॥ विशिष्टकारणताया ग्राहकप्रमाणमसति बाध
पा२ के विशेषणस्यापि कारणत्वं गृह्णातीति नियमस्य साधकस्य सत्त्वाच्च ॥ अन्यथा इंद्रियसंयोगादिना हेतुत्वेंद्रि
यस्यापि हेतुत्वानुपपत्तेः ॥ विषयितया लिंगविशिष्टज्ञानं करणं ज्ञानविशिष्टं लिंगं चेत्यत्र विनिगमनाविरहो
पि तद्धेतुतासाधकः ॥ ननु परामृश्यमाणलिंगस्यानुमितिसामान्यहेतुत्वे धूलीपटलादपि वह्न्यनुमित्यनुद
प्रमा६ यापत्तिस्तत्र लिंगाभावात् ॥ न च[illegible]नुमितौ न हेतुः अनुमितिसामान्ये तु परामर्शो हेतुरिति वाच्यं ॥ यत्सामान्ये
यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्यैवासति बाधके प्रयोजकत्वात् ॥ परामर्शगमाचस्यैव अनुमितिप्र
मात्रप्रयोजकत्वादिति चेन्न ॥ लिंगत्वं न तावद्व्याप्तिपक्षधर्मतावत्त्वं येन धूलीपटलेनन्न स्यात् ॥ किंतु
तद्धेतुत्वं तस्य च तत्रापि सत्त्वादिति न[illegible]कीं किंचिदेतत् इत्याचार्यमतमखण्डितमेवेति ॥ मैवं ॥ कार्याधि
करणत्वनियतस्य प्रतियोग्यधिकरणत्वानवच्छेदककार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणत्व
स्याभावप्रतियोगितानवच्छेदकधर्मवत्त्वे सति कार्याधिकरणे कार्याधिकरणसत्त्वस्यैव कारणपदार्थ
त्वात्तस्य चातीतानागतलिंगे सत्त्वादिति दिक् ॥ नवीनास्तु ॥ नहि वयं लिंगज्ञानत्वेन कारणतां ब्रूमो ये
नोक्तनियमावकाशो विनिगमनाविरहो वा भवेत् ॥ किंतु ज्ञानत्वेन ~~[illegible]~~ नैवेति [illegible] लिंगस्य हेतुत्वं व्याप्ति
प्रकारकपक्षधर्मताज्ञानरूपपरामर्शात्मकविशेषसामग्रीविरहाच्च न यत्किंचिज्ज्ञानादनुमित्यापत्ति

नतुर

ननु २

रित्याऽऽह ॥ ननु पत्र विशेष्ये विशेषणमिति न्यायेन परामर्शादनुमितिस्तत्र व्याप्तिज्ञानस्य परामर्शद्वारा कारणत्वा-
संभव इत्यत आह ॥ साध्यज्ञानं चेति ॥ साध्यत्वं सिद्धिकर्मत्वादिरूपतया गुरुतरमत आह ॥ लिङ्गज्ञानं चेति ॥ लिं-
गनिवेशे गौरवमत आह ॥ जन्यज्ञानं चेति ॥ जन्यपदं नित्यसंस्कारस्वरूपयोग्यस्य फलावश्यंभावादिति मतमभिप्रेत्य
तदनंगीकारे तु नोपादेयमेव तत् ॥ अतिप्रसंगहीनं ॥ परामर्शान्यूनकालीनपटज्ञानादनुमितिप्रसंग इत्यर्थः ॥
व्यापारेण परामर्शरूपव्यापारेण ॥ तन्निरासात् ॥ अतिप्रसंगनिरासात् ॥ न चैवं पटज्ञानेऽपि पर्वतो वह्निमानित्य-
नुमितिजनकत्वापत्तिः ॥ इष्टत्वात् ॥ कार्यत्वेन ज्ञानत्वेन कार्यकारणभावात् ॥ भवन्मतेऽपि तज्जनकत्वव्यवहा-
रस्यांगीकृतत्वात् ॥ न चानुमितित्वावच्छिन्नजनकत्वव्यवहारो न तन्मत इति चेत्तावता ज्ञानत्वे स्वावादिति ॥ नन्वे-
तावता परामर्शस्य व्यापारद्वारा ज्ञानमनुमितिकारणमिति सिद्धं ॥ तथा च यत्र वह्निव्याप्यधूमवानिति स्मरणा-
त्मकपरामर्शस्तत्रानुमितिर्न स्यात् परामर्शव्यापारकस्य ज्ञानस्य तत्राभावादित्यत आह ॥ ज्ञानपदमिति ॥
सविकल्पकेति ॥ तथा च सविषयकत्वेनैवानुमितिकारणत्वे संस्कारस्यैव स्मरणात्मकपरामर्शद्वारा कारणत्व-
संभवात् नानुपपत्तिरिति भावः ॥ ननु सविषयकत्वस्यैव ज्ञानत्वापेक्षया गुरुत्वे न ज्ञानत्वमेव जनकतावच्छे-
दकं न चोक्तानुपपत्तिः ॥ तत्रापि स्वजन्यसंस्कारजन्यस्मरणरूपपरामर्शस्यैव व्यापारवत्वादित्यभिप्रेत्या-
ह ॥ स्वत्वं तु सर्व एवेति ॥ इयता प्रबंधेनानुमानस्वरूपं निरूप्य तद्विभागमाह ॥ तच्चेति ॥ अनुमानं अनुमिति-
करणं ॥ ननु केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वं तच्च इदं वाच्यं ज्ञेयत्वादित्यत्रोपपन्नावपि इदं वाच्यं

ग्रे ३ पि ३

पत्वादित्यादेस्तथात्वप्रसंगश्चस्यतः पारिभाषिकं केवलान्वयिपदार्थमाह। तत्रेति। तेषु मध्ये इत्यर्थः। केवलान्व
यिसाध्यकेति। केवलान्वयिसाध्यविधेयकान्वयमितिजनकत्वमित्यर्थः। इत्थं च इदं वाच्यं घटत्वादित्यत्रापि के
वलान्वयिवाच्यत्वरूपसाधकत्वान्नासंग्रह इति भावः। साध्यविशेषणीभूतकेवलान्वयित्वं निर्वक्ति। तत्रेति।
अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमित्यर्थः। नन्वेवमाकाशाभावादीनां केवलान्वयित्वानुपपत्तिः। आ
काशरूपाभावप्रतियोगित्वादित्यत आह। वृत्तिमदत्यन्ताभावाप्रतियोगित्वस्य विवक्षितत्वात्। आकाशस्य
न वृत्तिमदत्यन्ताभाव इति न दोष इति। केचित्तु घटाभावो नास्तीति प्रतीत्या घटाभावाभावसिद्धावपि आका
श्र ८ शाभावो नास्तीति प्रतीतिरभावादाकाशाभावाभावो न मानं। प्रतियोगित्वं च स्वरूपसंबन्धविशेष एव न त्व
भावविरहत्वमिति नाकाशे आकाशाभावप्रतियोगित्वानुपपत्तिः। एवं च वृत्तिमद्विशेषणानुपादानेऽपि न
क्षतिरित्याहुः। वस्तुतस्तु। अन्योन्याभावप्रतियोगितानवच्छेदकत्वं तत्संयोगाभावादीनां केवलान्वयित्वा
पत्तेर्येप्रतियोगिवैयधिकरण्यमत्र निवेशनीयं। प्रतियोगिवैयधिकरण्यं चात्र प्रतियोग्यनधिकरणवृ
त्तित्वं न तु प्रतियोग्यधिकरणावृत्तित्वं। तथा सत्यधिकरणभेदेनाभावभेद[illegible]संयोगाभावस्य संयोगाधि
करणवृत्तित्वाभावेन तादृशाभावाप्रतियोगित्वात्संयोगस्य केवलान्वयित्वापत्तेः। तथा विवक्षिते तु संयो
गानधिकरणवृत्तित्वविशिष्टसंयोगाभावाप्रतियोगित्वात्तावान्नोक्तानुपपत्तिः। इत्थं च आकाशरूपाभाव
स्य निरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वोपपत्तेर्वृत्तिमदत्यन्ताभा
वेनेदं व्यर्थमेव। नन्वेवमाकाशाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्ध्या तादृशाभावाप्रतियोगित्वाकाशा

का नरा ४ णा ५

५।३ इत्यंचवक्तिमतेअसंताभावेष्वनदेयमेव।अकाशस्यनिरुक्तप्रतियोगिवैय्य+ प्रतियोगि०
धिकरण्याभावेनैवाकाशाभावस्यकेवलान्वयित्वोपपत्तेः॥+५

अनुमान५८

दी०अ०५८

तिव्याप्तिरितिवाच्यं॥यादृशप्रतियोगितावच्छेदकसंबंधसामान्येप्रतियोगिकत्वयादृशात्वावधिकरणानुयोगिका
त्वोन्यसाभावस्यादृशप्रतियोगिताशून्यत्वस्यविवक्षितत्वात्॥तस्यचआकाशात्वासाधारणत्वात्॥वृत्तिनि
यामकसंयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकएवाकाशाभावःकेवलान्वयी॥तथाचवृत्ति
नियामकसंयोगेनाकाशप्रतियोगित्वाभावेनोन्यसाभावसत्वात्सोपिप्रतियोगिव्यधिकरणएवेतिनातिव्याप्ति
रिति॥अन्योन्याभावप्रतियोगितानवच्छेदकत्वेसतिवृत्तिमत्वंवातत्वमित्यादिक॥न स्यदृशमिति॥यथेति॥नन्व
भिधाविषयत्वमभिधेयत्वं॥अभिधाचअस्माच्छब्दादयमर्थोबोद्धव्यइत्याकारकेच्छा॥साचास्माकिनेवसाचास्मा
कमनयावीदृशाविषयत्वंयो॥किंचिद्यादृशेच्छाविषयत्वंवा॥नाद्यः॥यावदिच्छाविषयत्वस्यकुत्राप्यसत्वात्॥नांत्यः॥
अस्मदीययाकिंचिदिच्छाविषयत्वस्यसर्वत्रासत्वात्इत्यतआह॥अभिधेयत्वमिति॥भगवदिच्छायाःसर्वविष
यत्वेनतद्विषयत्वस्यसर्वत्रसत्वादितिभावः॥एतदेवोपपादयति॥तत्रेति॥तादृशव्यक्तिविषयत्वंचेत्यर्थः॥अभिधे व्यक्ता
यत्वस्यतादृशेच्छारूपशब्दशक्तिशाब्दरूपत्वेविषयतासंबंधेनत्वस्यनियामकतयाइहाभिधेयत्वमित्यभिधे
यत्वावगाहिप्रतीत्यनुपपत्तेः॥तादृशशब्दशक्तिविषयत्वरूपमेवतस्याभिधेयत्वमितिध्येयं॥ननुसामान्यतस्तत्पदं धेय
जन्यत्वप्रकारकपटबोधविशेष्यकेच्छाविषयत्वादिकमेवतत्वं॥कर्तव्यबोधविषयकेच्छाविषयत्वमेकोधर्मोनास्त्येवस
र्वसाधारणतत्वस्याभावात्॥किंतुविशिष्यपटपदजन्यत्वप्रकारकपटबोधविशेष्यकेच्छाविषयत्वादिक
मेवतत्वं॥तच्चप्रत्येकंनकेवलान्वयीत्यतआह॥वस्तुपदेति॥तथावस्तुपदजन्यत्वप्रकारकवस्तुबोधविशेष्यकेच्छा
विषयस्यसर्वसाधारणंसंभवत्येवेतिनोक्तानुपपत्तिरित्यर्थः॥भगवज्ज्ञानविषयत्वादिति॥प्रमेयत्वसामान्यलक्षण

121

म्स्यासनिजन्यास्मदादिज्ञानविषयत्वस्यापि केवलान्वयित्वे केवलान्वयित्वमित्यपि बोध्यं ।। अनुमितिं प्रति साध्यसं
देहरूपपक्षतायाः कारणता केवलान्वयिस्थले साध्यसंदेहाभावेनानुमितिरेन । मध्यसावान्तेरमनुमानमितिनमी
मांसकमतं दर्शयति ।। अत्र केचिदिति ।। पक्षतायाः हेतुत्वे युक्तिमाह ।। यत्रेति ।। साध्यवत्वेनेति ।। संदिग्धसाध्य
धर्मवत्वं पक्षत्वमिति प्राचीनोक्तलक्षणस्य यदि संदेहस्यैव विषयीकृतसाध्यवत्वमित्यर्थः ।। तदा तेनानाग
तसाध्यकानुमितेरुच्छेदः इति साध्यप्रकारकसंदेहविषयत्वमेव पक्षत्वमिति भावः ।। अतः कथमिति ।। तथाच
न पूर्वोक्तविभागः इति भावः ।। सिसाधयिषेति ।। अत्र साध्यनिश्चयस्य सिसाधीयषाविरहेण वैशिष्ट्यमे
ककालावछेदेनैकात्मवृत्तित्वं अतो न भिन्नकालीनपुरुषांतरीयसिसाधयिषाविरहसत्वेपि सिसाधयि
षाधीनानुमित्यनुपपत्तिः ।। केवलान्वयिनि पक्षतामुपपादयति ।। सा चेति ।। इहापि केवलान्वयिसाध्यकस्थ
लेपि संशय इत्यनंतरं पक्षतेति शेषः ।। संशयं विनेति ।। घनगर्जितेन मेघानुमानस्थले इत्यादि ।। यत्र वा सं
शयोस्ति तत्रापि लिंगदर्शनव्याप्तिस्मरणादिना तन्नाशान्न तस्यानुमित्यव्यवहितपूर्ववर्तित्वमिति भा
वः ।। ननु साध्यनिश्चयेऽनुमित्यनुत्पत्त्या साध्यनिश्चयाभावस्यैव पक्षतात्वमस्तु कृतं विशिष्टांतेनेत्य
त आह ।। साध्येति ।। विशिष्टांतमिति ।। सिसाधयिषाविरहविशिष्टत्वं साध्यनिश्चयविशेषण
मित्यर्थः ।। विवक्षितत्वेन दोष इत्याह ।। तच्चेति ।। विशेषणाभावप्रयुक्तविशिष्टाभावस्तत्राप्यस्त्येवेति
भावः ।। सिसाधयिषाविरहाभावस्य सिसाधयिषाया एव पक्षतात्वे सिसाधयिषाशून्यकालेऽसति

त्तसाध्यनिश्चयेऽनुमित्सुखस्यापत्त्या विशेष्यनिवेशेन विशिष्टाभावस्यैव पक्षतात्वमवसेयं॥ ननु पर्व
तोद्देश्यकवह्निविधेयकानुमितिं प्रति सिसाधयिषाविरहविशिष्टवह्निप्रकारकपर्वतविशेष्यकनिश्चय नि२
त्वावच्छिन्नाभावरूपपक्षताया हेतुत्वे पाषाणमयो वह्निमान् पर्वतस्तेजस्वीत्यादिवह्निप्रकारकपर्व
तविशेष्यकनिश्चयसत्त्वे पर्वतो वह्निमानित्यनुपपत्तिः॥ एवं पर्वतो वह्निमानिति सिद्धिसत्त्वे द्रव्यं वह्नि
मत्सत्त्वाद्द्रव्यवानित्यनुदयापत्तिरत आह॥ संक्षेप इति॥ तथा च पर्वतत्वावच्छिन्नोद्देश्यतानिरू
पितवह्नित्वावच्छिन्नविधेयताशालिसंयोगसंसर्गकानुमितिं प्रति पर्वतोद्देश्यकवह्निविधेयका
नुमितिगोचरेच्छाविरहविशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारतानि
रूपितसंयोगनिष्ठसांसर्गिकविषयताशालिनिश्चयत्वावच्छिन्नाभावत्वेन हेतुत्वान्न काप्यनुप
पत्तिरिति भावः॥ अत्र च घटानुमितीच्छासत्त्वे पर्वतो वह्निमानित्यनुमितिवारणाय पर्वतोद्देश्यकव
ह्निविधेयकानुमितिगोचरेच्छात्वेन इच्छाया निवेशः॥ अनुमितिजनयितताभित्साधनानुगतोनांतघछा ५
न्नत्वेन पर्वतो वह्निमनुमियामि इत्याद्यनुगतेच्छानां तु पर्वतोद्देश्यकप्रकारतानिरूपितवह्निविधेय
कत्वप्रकारतानुमितिगोचरेच्छात्वेनोत्तजकत्वं वाच्यं॥ ननु सर्वसाधारणपर्वतोद्देश्यकवह्निवि
धेयकानुमितिगोचरेच्छात्वेन तथा सति घटानुमितिसामग्रीसत्त्वे पर्वतो वह्निमानिति सिद्धिस
त्त्वेऽनुमितिजनयितताभितीच्छासत्त्वेऽपि न घटानुमित्सापत्तेः॥ सिद्ध्यप्रतिबं[illegible]स्तत्परानुमित्सु[illegible]सत्त्यापि इच्छा।

ध्यी१

याविषयसिद्ध्याद्युपपत्तेरयोगात्॥ नासां तत्तद्व्यक्तित्वेनोत्तेजकत्वेन अन्यानुमितिसामग्र्यसमवधानका
लीनानामेव तथाविधेच्छानामनुत्तेजकतया घटानुमितिसामग्रीकालीनायास्तस्या अनुत्तेजकत्वात्।
अनुगतेच्छानां तु बाधकाभावात् पूर्वोक्तानुगतरूपेणोत्तेजकत्वमिति॥ ननु धूमपरामर्शसत्त्वे पर्वतो
वह्निमानिति सिद्धिसत्त्वे सत्यां चालोकेन वह्निमनुमिनुयामितीच्छायां पर्वतो वह्निमानित्यनुमित्यापत्ति
क५ रिति चेन्न॥ धूमलिंगकानुमितिं प्रति धूमलिंगकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वात्। एवमा
ति६ लोकादिस्थलेपि न दुरुंदाधिकारेण लिंगविशेषणापि चानियं[illegible]तं पक्षत्वमिति। अथ वह्निव्याप्यधूम
वान्पर्वतः वह्निव्याप्यालोकवान्पर्वत इति समूहालंबनात्मकपरामर्शकाले सिद्धिसत्त्वे आलोकेन वह्निमनु
मिनुयामितीच्छाकाले आलोकलिंगकानुमित्युत्पत्त्या तस्याश्च धूमपरामर्शजन्यत्वेन धूमलिंगकत्वात्तदर्थं
एवं धूमलिंगकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावरूपकारणाभावाद्व्यभिचार इति आलोकपराम
अ६ र्शविशिष्ट आलोकलिंगकेच्छायोपि[illegible] उत्तेजकत्वमावश्यकं। एवंरूपलिंगकपरामर्शविशिष्टरूप
५ एवं लिंगकेच्छायोपि एवं धूमलिंगकेच्छायामपि धूमपरामर्शविशिष्टाया एव लाघवेनोत्तेजकत्वेन एकरू
अ५ चानुमितिपक्षतयोः कार्यकारणभाव इति लिंगभेदेन पक्षतायाः कारणत्वे मानाभाव इति चेन्न। स्वा
व्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन धूमलिंगकेच्छा[illegible]विरहविशिष्टसिद्ध्यभावस्य हेतुत्वोपगमात्
विर२ उक्तसमूहालंबनस्थले च धूमलिंगकेच्छाविशिष्टसिद्धिविशिष्टानुमितेरुत्पत्त्या व्यभिचारासंभवा
त्। न चोक्तस्थले धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावं विनापि च यादृशसामग्रीबलाद्धूमलिं
३ + सिद्धिविशिष्टं यत्तदन्यानुमितिं प्रति धूमलिंगकेच्छाविरहविशिष्ट + ३

तर्क॰प्र॰ ६०

अनुमितिकत्वन्नातादृशसामग्रीबलौधूमलिंगं ५

अनुमान ६०

गैकपरामर्शस्थले सिद्धिसत्त्वेप्यनुमित्यापत्तिरितिवाच्यं॥ धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावधूमपराम
र्शोभयघटितसामग्र्या आलोकलिंगकेच्छाविरहविशिष्टसिद्ध्यभावआलोकपरामर्शोभयघटितसाम
+२ अन्यतरस्यै ग्र्योः यत्र तत्र नियामकत्वात्॥ अन्यथा तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकेच्छानामुत्तेजकत्वे तावतां
दभावकूटस्यैव तत्र निवेशने तेषां विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात्॥ ननु पर्वतोद्देश्यक
वह्निविधेयकानुमितिं प्रति स्वीयव्याप्तिप्रकारकतानिरूपितविशेष्यतावच्छेदकीभूतधर्मवल्लिंगकत्व
प्रकारकत्वस्य सामानाधिकरण्योभयसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टायाःसिसाधयिषाविरह २६
विशिष्टसिद्ध्यभावत्वेन कारणत्वे एकरूपेणैवेच्छाया उत्तेजकत्वं नतु लिंगभेदेन समूहालंबनस्थले च आ
लोकपरामर्शविशिष्ट आलोकलिंगकेच्छाया एव तथात्वेन व्यभिचारावकाशादितिचेन्मैवं॥ तथापि
अनुमितिर्जायतामित्यननुगतेच्छानांतु अनुगमकरूपाभावेन तत्तदिच्छाभावकूटस्यैव एकत्र निवेश।
नायतया तेषां मिथो विशेष्यविशेषणभावे विनिगमनाविरहात्॥ अवच्छेदकताया व्यासज्यवृत्तित्वस्य
निरस्तत्वात्॥ तस्मात्तत्तल्लिंगपरामर्शकालीनतत्तदिच्छाभावं निवेश्य तत्तल्लिंगभेदेन पक्षताया हेतु
त्वमेवोचितमिति दिक्॥ केवलव्यतिरेकिणं लक्षयति॥ असत्सपक्ष इति॥ सिद्धसिद्ध्याघातभया
तं २ दाह॥ वर्त्तेति॥ असत्सपक्षैर्वेत्यर्थः॥ पक्षातिरिक्त इति॥ अनिश्चितसाध्यसाधनसहचारकत्व
मितिस्वरूपकथनं नतु विवक्षितं तथा निवेशे वैयर्थ्यात्। किंतु अनिश्चितसाध्यकत्वं तत्त्वं। साध्य

128

साधनयोरितरभेदपृथिवीत्वयोः॥ ननु तत्र साध्यसंशयसत्वेपि क्षमासमनु निश्चयसत्वात् अनिश्चितसाध्यकत्वमत्रा
ध्यसा२ ह॥ निश्चीयत एवेति॥ साध्यसाधनसंदेहचारनिवेश प्रयोजनाभावेन तदनिवेश्यानिश्चितसाध्यकत्वमेवास्तु कृ
तं पक्षातिरिक्त इति विशेषणेनेति शंकते॥ न चेति॥ एवकारेण पक्षातिरिक्त इत्यस्य व्यवच्छेदः॥ उच्चारयति॥
घटादाविति॥ प्रसक्तत एवेति॥ घटो न जलादिरिति प्रतीतेः॥ न च परमाणुसंसर्गाभाववद्वृत्तीन्द्रियग्रहीतियोग्य
कत्वेन कथमितरभेदः प्रसक्तः योग्यानुपलब्धिविरहात्॥ स्तंभे पिशाचान्योन्याभावो न प्रत्यक्षः॥ किंतु वा
युर्वर्तीति वचनस्य लिंगग्रहोपलक्षणत्वादिति वाच्यं॥ तादृशं तथा सत्यनुपलब्धिविरोधितदभावस्यैव योग्य
तीं त्वात्॥ न लैंगिकग्रहीतियोग्यकत्वं॥ अन्यथा जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः॥ एवं च पिशाचभेदस्यैवेतरभे स
दस्यापि प्रसक्तत्वोपपत्तिः॥ निश्चितत्वादिति॥ ननु पाकानन्तरघटस्य प्रसक्तत्वात् तत्र निश्चयेपि पक्षातिरिक्तो
निश्चितसाध्यकत्वमस्त्येवेति भावः॥ पक्षतावच्छेदकावच्छिन्नातिरिक्तत्वं चात्र पक्षातिरिक्तत्वं बोध्यं॥ नातो घ
टादेरपि यत्किंचिद्घटातिरिक्तत्वादुक्तदोषः॥ अन्यथेति॥ घटादावितरभेदानिश्चयदशायामित्यर्थः॥ न घटितेति॥
साध्यघटितेत्यस्यार्थः॥ विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया साध्यज्ञानं विना साध्यघटितव्याप्तिज्ञा
नासंभवादिति भावः॥ साध्यनिश्चये॥ इतरभेदनिश्चये॥ तस्याः घटस्य पक्षत्वमिति॥ सिद्ध्यभावत्वादि
रूपं पक्षत्वमित्यर्थः॥ घटेतरभेदनिश्चयेनेतरभेदनिश्चयाभावरूपपक्षताभावात्कथं पृथिवीत्वसामा स२
न्यस्य पक्षत्वमिति भावः॥ पृथिवीत्वेति॥ पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन साध्य

सिद्धेरेवप्रतिबंधकतयाग्रहणेपृथिवीत्वसामानाधिकरण्येनघटादावितरभेदनिश्चयेपिपृथिवीत्वावच्छेदेना
नुमितौनक्षतिरितिभावः॥ नचैवमंशतः सिद्धसाधनस्यैवदूषकत्वविलोपप्रसंगइतिवाच्यं॥ पक्षतावच्छेद
कैक्येतद्दूषकस्येष्टत्वात्॥ पक्षतावच्छेदकनानात्वेएवतद्दूषकत्वांगीकारात्॥ यथावाङ्मनसीनित्येमूर्त्तत्वा अ२
दित्यत्रानित्यवागितिबुद्धेरुद्देश्यया सिद्ध्यानोभयधर्मावच्छेदेनानित्यत्वानुपपत्तिरिति॥ तदवच्छेनपृथिवीत्वा
वच्छेदेन॥ पक्षतेति॥ इतरभेदनिश्चयाभावरूपपक्षताविरोधित्वादित्यर्थः॥ विरोधित्वंचसहानवस्थानरू न ५
पंबोध्यं॥ इहघटेसःपृथिवीत्वावच्छेदेनेतरभेदनिश्चयः॥ सर्वत्रेति॥ परमाण्वादिरूपपृथिव्यामित्यर्थः॥
तन्निश्चयेति॥ इतरभेदनिश्चयाभावादित्यर्थः॥ परमाण्वादेरयोग्यतयाप्रत्यक्षेणतत्रतस्यनिश्चेतुमशक्य
त्वात्॥ तथाचपृथिवीत्वसामानाधिकरण्येननिश्चयसत्वेप्यवच्छेदकावच्छेदेननिश्चयाभावात्॥ घटादेःप
क्षत्वमव्याहतमितिभावः॥ इदंचघटादौपृथिवीत्वेनेतरभेदनिश्चयमभ्युपेत्यवस्तुतस्तुघटत्वेनैवतत्रेतर
भेदनिश्चयेनपृथिवीत्वेनेतरभेदानिश्चयात्॥ पृथिवीत्वधर्मितावच्छेदकानुमितौतद्धर्मितावच्छेदकका
नुमितौवाबाधकाभावात्तत्तद्धर्मितावच्छेदकसिद्धेरेवप्रतिबंधकत्वादितिध्येयं॥ अन्वयीति॥ व्यतिरेक[illegible]
योःसाध्याभावहेत्वभावयोःसहचारात्॥ युक्तेति॥ अन्वयव्याप्तिर्ग्रहीतइत्यर्थः॥ लाघवेनानुमितिसामान्ये
अन्वयव्याप्तिज्ञानस्यैवहेतुत्वादितिभावः॥ नचैवमितरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववतीपृथि
वीतिपरामर्शादितरभेदज्ञानेऽन्यकालेपृथिव्यामितरभेदविशेष्यकानुमितेरुच्छेदः॥ एवंस्वातंत्र्येण

इतरभेदज्ञानसत्त्वेनादृशपरामर्शात्पृथिवीतरभेदवतीत्यनुमितेरप्युदयप्रसंग इति वाच्यं ॥ अन्वयव्याप्तिज्ञानस्यैव
अनुमितिहेतुत्ववादिनामाचार्यादीनां णां नदो [illegible] इष्टापत्तेः ॥ प्रांच इत्यनेनान्वयः ॥ स च विशेषणज्ञा
नविधया सहचारज्ञानस्यान्वयव्याप्तिग्रहहेतुत्वाभावेन तज्ज्ञानस्य कथं तादृशव्याप्तिग्रहहेतुत्वमिति ॥ न च व्य
भिचारज्ञानविरोधिसहचारज्ञानत्वेनोभयसहचारज्ञानयोरपि हेतुत्वमिति वाच्यं ॥ अगृहीतसाध्याभावानवगाहित
याव्यतिरेकसहचारज्ञानस्य व्यभिचारज्ञानविरोधित्वाभावात् ॥ अन्ये केचित् ॥ प्राचीनमते अन्वयव्याप्ति
ज्ञाने भिन्नधर्मिकत्वेपि व्यतिरेकसहचारज्ञानस्यान्वयव्यतिरेकाभ्यां यथा हेतुत्वं अन्वयव्याप्तिज्ञानमे
व चानुमितिसामान्ये हेतुरित्युपेयते तथान्वयसहचारज्ञानं व्यतिरेकव्याप्तिज्ञाने हेतुः तज्ज्ञानमेव चानुमि
तिसामान्ये हेतुरित्युच्यतां विनिगमकत्वाभावात् ॥ न चैवमन्वयव्याप्त्यवगाहि वह्निव्याप्यधूमवत्तापराम
र्शादनुमितेरनुपपत्तिरिति वाच्यं ॥ भवतादितरभेदाभावव्यापकीभूताभावप्रतियोगिपार्थिवीत्ववती पृथि
वीति व्यतिरेकव्याप्त्यवगाहिपरामर्शादनुमित्यनुदये इष्टापत्तेरियमभापि तत्र तदनुसारस्यैष्टत्वादिति तन्न ॥
अन्वयव्याप्तिज्ञानस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात् ॥ तथाहि ॥ व्यतिरेकव्याप्तिस्साध्याभावनिष्ठाधू
मेतद्वृत्तान्यत्वा अयमव्यापकीभूताभावप्रतियोगितासंबंधेन स्वनिरूपकाभावप्रतियोगितासंबंधेन तयाहि
रूपा गुरुत्वसंबंधेन व्याप्तिविशिष्टधूमवत्तावगाहिपरामर्शत्वेन हेतुत्वे गौरवात् ॥ सामानाधिकरण्यरूपा दि २
न्वयव्याप्तिज्ञानस्यानुमितिहेतुत्वे तु स्वरूपसंबंधेन वह्निनिरूपितव्याप्तिविशिष्टहेतुमत्तानिश्चयस्यैव तत्त्व

128

मितिलाघवं ।। किंचैवं साध्याभावाप्रसिद्ध्या व्यतिरेकव्याप्तिज्ञानासंभवेन केवलान्वय्यपि अनुमानोच्छेदप्रसंगः इति दिक् ।।
अन्वयव्याप्तिज्ञानमिव व्यतिरेकव्याप्तिज्ञानमप्यनुमितिहेतुः ।। न चैवं केवलान्वय्यनुमित्यनुरोधेनावश्यकॢप्तहेतुभावे
नान्वयिव्याप्तिज्ञानेनैवोपपत्तौ तस्य पृथक्कारणत्वकल्पने गौरवमिति वाच्यं ।। इतरभेदज्ञानशून्यकाले इतरव्यापकी
भूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शादितरभेदविशेष्यकानुमितेः स्वातंत्र्येणेतरभेदज्ञानसत्वे
तादृशपरामर्शादितरभेदविशेषणकानुमितिस्वरूपफलापप्रसंगेन हेतुत्वस्यावश्यकत्वात् ।। प्रामाणिकगौरवस्यादो
षत्वात् ।। न चैवं परस्परव्यतिरेकेपि परस्परेण कार्योत्पादने परस्परजन्यानुमितौ तयोर्व्यभिचार इति वाच्यं ।। एवमन्
तेऽन्वयसहचारज्ञानव्यतिरेकसहचारज्ञानयोरन्वयव्याप्तिज्ञानहेतुत्वे तत्र व्यभिचारवारणाय व्यवहितोत्तर
त्वस्य निवेशनीयत्वादिति अन्वयव्यतिरेकाभ्यामुभयविधव्याप्तिज्ञानस्यानुमितिहेतुत्वमिति मणिकारमतमा
दर्शयति ।। साध्याभावेत्यादिना ।। अनुमितिः साध्यविधेयकानुमितिः । ननु हेत्वभावनिरूपितसाध्याभावनि
ष्ठव्याप्तिज्ञानं हेत्वभावविधेयकानुमितिं जनयतु न तु साध्यविधेयकानुमितिं अनुमितौ व्याप्तेस्तावच्छेदकरूपे क ६
णव्यापकस्यैव भाननियमात् ।। अन्यथा वह्निव्याप्तिज्ञानात् घटानुमित्यापत्तिरित्याशंकते ।। न चेति ।। अन्यव्या
प्तिग्रहात् ।। अन्यनिरूपितव्याप्तिज्ञानात् ।। हेत्वभावनिरूपितव्याप्तिज्ञानादित्यावत् ।। अन्यानुमितिः साध्य
विधेयकानुमितिः ।। ननु अन्यव्याप्तिज्ञानस्यान्यविधेयकानुमितिजनकत्वे बाधकाभाव इत्यत आह ।। अति
प्रसंगादिति ।। घटनिरूपितव्याप्तिज्ञानात् पटविधेयकानुमितिप्रसंगादित्यर्थः ।। पदार्थमिति ।। स्वाश्रयव्या
पकीभूताभावप्रतियोगित्वसंबंधेन साध्याभावनिष्ठव्याप्तिविशिष्टहेतुमत्तावगाहिनिश्चय इत्यर्थः ।। सोनुमाप ध्या ८
८+ निवेश इवमन्मतेपि परस्परजन्यानुमितौ व्यभिचारवारणाय व्यवहितोत्तरत्व [illegible] +८

कइति॥साध्यविधेयकानुमितिविशेषे हेतुरित्यर्थः॥व्यतिरेकव्याप्त्यवगाहिपरामर्शाव्यवहितोत्तरानुमितिजनकमि
तिपावत्॥व्यापकतावच्छेदकरूपेणाव्यापकस्याभानमिति नियमस्तु अन्वयव्याप्त्यवगाहिपरामर्शजन्यानुमिति
स्थल एवेतिद्रष्टव्यं॥ननु घटादौ वितरभेदस्य निश्चितत्वेन पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् पटवदित्यन्वय्येव।
न तु व्यतिरेकी॥निश्चितसाध्यकत्वमेव दृष्टान्तत्वे प्रयोजकत्वेन तु पक्षान्यत्वमपीति चेन्न॥अन्वयसहचारग्रहदशा
यां व्यतिरेकसहचारेणैकव्याप्तिग्रहोदयात्॥तदुक्तमाचार्यैः॥आस्तां तावदयं सुहृदुपदेशः॥केवलव्यतिरेकि
लक्षणं तावत्सिद्धमिति॥अन्वयव्यतिरेकिणं लक्षयति॥उभयान्य इति॥केवलान्वयिकेवलव्यतिरेक्यन्य इत्य
र्थः॥प्रसिद्धानुमानमिति॥वह्निमान् धूमादित्यर्थः॥केचित्तु॥अन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं
व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वमेव केवलव्यतिरेकित्वं॥उभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वं
२॥ इति विरोधे धूमस्यापि केवलान्वयित्वं केवलव्यतिरेकित्वे इष्ट एव।न चैवं विभागव्याघातः तदुपधेयसंकरेऽप्युपाधेयसं
करादिति॥अत एवाह संक्षेप इत्याहुः॥ननु इदं ज्ञायमानलिंगस्यानुमानत्ववादिनये उपपद्यते न तु लिंगज्ञानस्या
नुमानत्वनये॥अत एवानुपपन्नमेव॥एवं हि तद्विभिद्धतेरतिवक्ष्यतीति चेन्न॥तज्ज्ञानं त्रिविधमित्यस्य अनुमिति
जनकलिंगज्ञानविषयीभूतलिंगं त्रिविधमित्यर्थः॥न चानुमितिकरणस्यैव विभागोचितत्वात् लिंगस्य त्रिविधत्वा
नभिसंगतमिति वाच्यं॥केवलान्वयिसाध्यकानुमितिजनकत्वमेव केवलव्यतिरेकिलिंगकानुमितिजनकत्वं अ
न्वयव्यतिरेक्युभयलिंगकानुमितिजनकत्वभेदेन लिंगज्ञानस्य त्रिविधत्वेन लिंगस्यापि त्रैविध्यसंभवात्
वस्तुतो लिंगज्ञानस्यैव त्रैविध्यं लिंगज्ञानस्य तु तद्विषयत्वेन तत्॥केवलान्वयिसाध्यकानुमानमित्यस्य च केव
लान्वयिसाध्यकानुमितिजनकज्ञानविषय इत्यर्थः॥एवं पक्षातिरिक्तेऽनिर्णीतसाध्यकत्वमित्यस्य पक्षातिरिक्तो

त्रिप

निश्चितसाध्यकानुमितिजनकज्ञानविषयत्वमर्थः। एवं पक्षातिरिक्ते ऽनिश्चितसाध्यकत्वमित्यस्य पक्षातिरिक्तेऽज्ञ-
यान्यत्वस्य न केवलान्वयिके ऽन्वयव्यतिरेकिसाध्यभिन्नसाध्यकविधेयकानुमितिजनकज्ञानविषयत्वमर्थः।। एवं दे-
तावभिहितत्वस्य तादृशज्ञानविषयीभूतो हेतावसिद्धत्वमर्थ इति न शंक्यं पक्षकत्वंकल्पे गौरवमिति।। तत्वनिर्णयवि-
जयरूपैककार्यकारित्वात् प्रसंगाच्च हेत्वाभासान्निरूपयति।। एवमिति। तदाभासाः हेत्वाभासाः।। हेतुवदाभा- ह ४
सन्त इति योगात् धर्म्मे हेत्वाभासपदवाच्य इति ध्येयं।। अनुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषय-
त्वं हेत्वाभासत्वं।। बाधतदभावव्याप्यवत्तादौ ज्ञानादौ तासा साक्षादेवानुमितिप्रतिबंधकत्वाद्बाधसत्प्रतिपक्षयो-
र्लक्षणसमन्वयः।। व्यभिचारज्ञानादीनां अनुमितिकरणव्याप्तिज्ञानादिप्रतिबंधकत्वेन तद्विषयत्वेन व्यभिचारादे-
स र्हेत्वाभासत्वोपपत्तेः।। अत एव व्यभिचारसंग्रहायानुमितिप्रतिबंधकत्वमपि विहायानुमितत्करणान्यतरेत्युक्तं।। न च तद्धे-
तोरेवास्तु किं तेनेति न्यायेन व्यभिचारज्ञानस्यानुमितिजनिप्रतिबंधकत्वमेवास्त्विति वाच्यं।। धूमपरामर्शका-
ले ऽआलोको वह्निव्यभिचारीति वह्निव्यभिचारिज्ञानकाले ऽनुमित्यनुदयप्रसंगात्।। न च तद्धर्मावच्छिन्नलिंग-
कानुमितौ तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानस्यैव प्रतिबंधकत्वमिति वाच्यं।। गौरवात्।। साक्षादविरो-
धिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव विरोधित्वाच्च।। न चैवं धूमो वह्निव्याप्य इति ज्ञानकाले भिन्नेन्द्रियादि-
जन्यव्यभिचारज्ञानकालेप्यनुमित्युदयापत्तिरिति वाच्यं।। इष्टत्वात्।। तदुक्तं करणे पूर्णे किं न सिद्ध्येदिति।। व्यभि-
चारादिज्ञानमवारणायातिप्रसंगभंगाय यथार्थेति।। विभजते।। तत्रेति।। तत्र त्रिविधेत्यस्य। व्यभिचारे निरूपणीये।।

(137)

साध्यवदन्येति। साध्याभाववद्वृत्तित्वमिति ह्रदे धूमाभाववदयोगोलकवृत्तित्वेन धूमवान्वह्नेरित्यादौ लक्षणासं-
त्त्वेऽपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभावद्वृत्तित्वादेतद्वृक्षत्वस्यापि तत्त्वापत्तिः प्रतियोगिवैय्य-
धिकरण्यादिनिवेशे चातिगौरवमिति तत्परित्यागः॥ अन्योन्याभावस्य चाव्याप्यवृत्तित्वान्न दोषः॥ न च कपि-
संयोगी घटो भवत्वद्रव्यवारणाय प्रतियोगिवैय्यधिकरण्यनिवेशावश्यकत्वमिति वाच्यं। साध्यतावच्छेदकावच्छि-
न्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वस्य विवक्षितत्वात्॥ न हि कपिसंयोगत्वावच्छिन्नवदन्यत्व-
स्यैतद्वृत्तेः सत्त्वमिति। यद्वा चान्योन्याभावस्याव्याप्यवृत्तित्वेऽपि साध्यतद्वृत्त्यापि प्रतियोग्यवृत्तित्वस्यैव ला-
घवेन निवेशनीयत्वात्॥ प्रतियोगिवैय्यधिकरण्यापेक्षया लाघवस्य स्फुटत्वात्॥ न च द्रव्यं गुणकर्मान्य-
त्वविशिष्टसत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेन सत्ताया द्रव्यभिन्नगुणादिवृत्तित्वादतिप्रसंग इति वाच्यं॥
धि णा ६ साध्यवदन्यनिष्ठाकरेनाधेयतानिरूपकतावच्छेदकहेतुतावच्छेदकावच्छिन्नस्य तदर्थत्वात्॥ लक्ष्ये लक्षणं
दि अ ५ योजयति॥ यथेत्यादिना। यै[illegible]न्योन्याभावोऽप्यव्याप्यवृत्तिः तदा कपिसंयोगी एतद्वृक्षत्वादित्यत्राति-
व्याप्तिः॥ प्रतियोग्यवृत्तित्वनिवेशे च गौरवमित्यत आह। साध्यासमानाधिकरणेति। साध्याधिकर[illegible]वृत्ति णा ४
त्वमत्र साध्यसामानाधिकरण्यं न तु साध्यानधिकरणवृत्तित्वं॥ अन्यथा वह्न्यनधिकरणवृत्ति द्रव्यत्वा-
दि[illegible]सामानाधिकरण्यस्य धूमेऽपि सत्त्वेन वह्निमान्धूमादित्यादावतिप्रसंगापत्तेः॥ अत्र च साध्याधिकरणेऽ-
वृत्तित्वं येन संबंधेन तेन संबंधेन तदधिकरणत्वं विशेषणविशेषणवाऽवृत्तित्वं तदधिकरणत्वं च बोध्यं॥

ण्य २ ता ९

(132)

एतेन यत्किंचित्संबंधेनावच्छिन्नत्वोक्तौ संयोगादिनावच्छिन्नपर्वतत्वसामानाधिकरण्यमादाय धूमादावतिव्याप्तिः। संबंधसामान्येनावच्छिन्नत्वोक्तौ धूमवदन्यत्वादेरपि कालिकादिसंबंधेन धूमवद्वृत्तितया तद्वत्तिगगनादिरेव तत्सामानाधिकरण्यं च वक्तव्यसंभवादसंभवापत्तेरिति परास्तं ।। तत्सामानाधिकरण्यं च तदधिकरणे हेतुतावच्छेदकसंबंधेन संबंधित्वं नातः कालिकादिसंबंधमादाय धूमादावतिव्याप्तिरिति ।। यद्यप्यसाधारणादिसाधारणमेवैतत् ।। तथाप्युपधेयसंकरेऽप्युपाधेरसंकरादिति न्यायेन तत्साधारण्येऽपि न क्षतिविरहः ।। असाधारणाद्यज्ञानेऽपि एतज्ज्ञानेऽनुमितिप्रबंधादिति ।। सपक्षविपक्षव्यावृत्तत्वमसाधारणत्वं निश्चितसाध्यवद्वृत्तित्वे सति निश्चितसाध्याभाववद्वृत्तित्वमिति शब्दो नित्यः शब्दत्वादित्यादौ सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च शब्दत्वस्य व्यावृत्तत्वात् लक्षणसमन्वयः ।। न च शब्दोऽनित्यः शब्दत्वादिति सद्धेतौ शब्देऽनित्यत्वनिश्चयदशायां निश्चितसाध्यवद्व्यावृत्तत्वादसाधारण्यापत्तिरिष्टत्वात् ।। असाधारणसत्प्रतिपक्षयोरनित्यत्वदोषवादिनां प्राचां मते नैतल्लक्षणादिति तन्मतं दूषयितुं स्वयं लक्षणमाह ।। साध्येति ।। ननु सपक्षव्यावृत्तत्वमसाधारणत्वमित्यस्य का गतिरित्यत आह ।। इदमेवेति ।। पूर्वं निरुक्तार्थकमेव ।। ननु निश्चितसाध्यवद्व्यावृत्तत्वं तन्मतेन शब्दोऽनित्यः शब्दत्वादित्यस्य संग्रहः स्यादिति ।। आव्याप्तिरिति ।। अनित्ये शब्दे शब्दत्वस्य सत्त्वेनानित्यत्वव्यापकत्वावप्रतियोगित्वस्य शब्दत्वे सत्त्वादिति भावः ।। सद्धेतुत्वादिति ।। ननु असाधारणसत्प्रतिपक्षयोरनित्यदोषत्ववादिप्राचीनमते सद्धेतावपि तत्सत्त्ववदिति चेन्न ।। बाधभ्रमेऽनुमितिप्रतिबंधान्नानुमितिः ।। तत्र हेतुस्तु

ओ २ बाधस्य ।। अनित्यदोषत्वापत्तिः ।। यदि च बाधबुद्ध्या प्रतिबंधा ९

B 3

नउक्तहतिविभाव्यतेतदागच्छतेप्यसा[illegible]धारणसत्प्रतिपक्षस्यत्वेनतदभावव्याप्यवत्ताज्ञानेनानुमितिप्रतिप्रति
बंधः ननुतत्रहेतुरपिदुष्टइत्यस्यफलत्वयत्वादिनिभावः॥ एतत्तज्ज्ञानं॥ असाधारण[illegible]त्वज्ञानं॥ साक्षात्ग्राह्याभावा
वगाहित्वात्॥ व्यतिरेकीति। व्यतिरेकिव्याप्तिमत्सत्प्रतिपक्षरूपत्वात्॥ तथाचतदभावव्याप्यवत्ताज्ञानम[illegible]स्या
नुमितिविरोधित्वमितिभावः॥ ननुसाध्यव्याप्यवत्ताज्ञानंसाध्याभाववत्ताज्ञानंचात्रसंवलितमितिसत्प्रतिपक्षा
दभेदप्रसंगइत्यतआह। नचैव[illegible]मिति॥ एवंसत्प्रतिपक्षरूपत्वे। सत्प्रतिपक्षत्वमिति॥ तथाचैतस्यतदंतर्गतत्वंपं
चैवहेत्वाभासाइतिविभागव्याघातइतिभावः। हेतिति। साध्यव्याप्यहेतुसाध्याभावव्याप्यहेतोर्भेदएव
सत्प्रतिपक्षत्वंयथाह्रदोवह्निमान्धूमात्ह्रदोवह्न्यभाववान्ह्रदत्वादित्यादौ। प्रकृतेचैकस्यैवशब्दत्वस्योभय
साधकत्वेनतस्योभयलिंगकत्वघटितंसत्प्रतिपक्षत्वमितिभावः॥ अदृश्येति। तथाचसाध्यसाधनयोःस
हचारग्रहेणान्वयव्याप्तिग्रहेणनान्वयित्वमितिभावः। तथाचेति॥ नित्यत्वा[illegible]भावव्यापकीभूताभाव
प्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाहिनित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात्साध्यमिवअनित्यत्वाभावः नित्य
त्वं। तथाचनित्यत्वव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाहिअनित्यत्वव्याप्यशब्दत्ववत्ताप
रामर्शात्साध्याभावोपिसाधनीयः॥ नचविरुद्धोभयसाधनंजनयतीतिपरस्परानुमितिप्रतिबंधएवेत्यर्थः॥
विरुद्धयोःसाध्यसाध्याभावयोः॥ अनिर्णयइति॥ अनुत्पत्तिरित्यर्थः॥ अनिर्णयइत्यनेनसत्प्रतिपक्षस्य

गि २

13/4

र्क.प्र.६५

अनुमान ६५

लेसंशयाकारानुमित्यंगीकर्तृरत्नकोशकारमतमादर्शितं॥तदभावव्याप्यवत्ताज्ञानस्यविशिष्टबुद्धिसामान्य रस्पर
[illegible]तुविरोधितयासत्प्रतिपक्षस्थलेनसंशयाकारानुमितिः॥किंतुपरामर्शस्यानुमितिप्रतिबंधएवेतिसि
द्धांतमतंतन्नप्रत्यक्षस्थलेतदभावव्याप्यवत्ताज्ञानस्यप्रतिबंधकत्वेपिअनुमितौतत्प्रतिबंधकत्वाक रा
५४ ल्पनेनसंशयानुमितौबाधकाभावः॥संशयत्वस्यार्थसमाजग्रस्तत्वेपिसाध्यतदभावव्याप्यवत्तापरामर्शा
भ्यांसाध्यतदभावानुमितौजायमानायांफलतःसंशयानुमितेरुपपत्तेः॥प्रत्यक्षस्थलेतदभावव्याप्य
वत्ताज्ञानस्यप्रतिबंधकत्वेकल्पनीयेप्रत्यक्षत्वमनिवेश्यतत्संस्कारकबुद्धित्वमेवतत्प्रतिबध्यतावच्छेदकं
तच्चानुमितिसाधारणमितिकथमनुमित्युत्पत्तिरितितुनाशंकनीयं॥इच्छायाउत्तेजकानुरोधेनविशिष्यैवप्र
त्यक्षत्वंनिवेश्यप्रतिबध्यप्रतिबंधकभावस्यावश्यकत्वात्॥नचशाब्दस्थलेइच्छायाउत्तेजक
त्वात्॥तथैवप्रत्यक्षान्यज्ञानत्वंतत्प्रतिबध्यतावच्छेदकंतच्चानुमितिसाधारणमितिवाच्यं॥प्रत्यक्षा
न्यत्वज्ञानत्वयोर्मिथोविशेषणविशेष्यभावेविनिगमनाविरहेणतदपेक्षयाशाब्दत्वस्यैवतत्प्रति
बंधकत्वस्याक्लृप्ततयानसंशयानुमितौकिंचिद्बाधकमिति॥[illegible]॥तदभावव्याप्यवत्ताज्ञानवि
शिष्टान्यत्वावच्छिन्नंप्रतितदभावव्याप्यवत्ताज्ञानस्यप्रतिबंधकत्वंइच्छाविशिष्टेतरावच्छिन्नंप्रतिचइच्छा स्वा २
त्वेनहेतुत्वमितिआह॥यानुमितेरनंगीकारेणतदसावव्याप्यवत्ताज्ञानसत्वेनेच्छाबलात्तेनापिफलद

तत्प्रतिबध्यतावच्छेदकत्वात्परोक्षत्वजातेरनुभवत्वेनसंकरान्नतस्यापितत्वमिति॥अनुमितौ

135

सावव्याप्यवत्ताज्ञानात्सावरूपकारणबलात्संशयानुमित्युत्पत्तिरिति दिक्॥ न्यायवादाह॥ अवेति साध्यकत्वमि
ति॥ न चैवं धूमवानाकाशीदित्यादेरसंग्रह इति वाच्यं॥ स्वरूपासिद्ध एव तन्निवेशात्॥ केचित्तु॥ केवलान्वयिप
मविछिन्नपक्षकत्वमनुपसंहारित्वे उदाहरणं च सर्वमनित्यं प्रमेयत्वादित्यादि॥ व्यतिरेकव्याप्तिग्रहप्रतिबंध
श्चात्र दूषकताबीजमित्याहुः॥ साध्येति॥ साध्यतावच्छेदकसंबंधेन साध्याधिकरणे हेतुतावच्छेदकसंबंधे
नावृत्तित्वमित्यर्थः॥ तेन समवायेन वह्नेः साध्यतायां संयोगेन धूमहेतोः संयोगेन वह्न्यधिकरणवृत्तित्वेपि गो
त्वाधिकरणे अवृत्तित्वस्य कालिकादिना वर्त्तमानत्वेपि च नाव्याप्तिः॥ साध्यतावच्छेदकावच्छिन्नाधिकरणनिरू
धिकरणतानिरूपकतानवच्छेदकहेतुतावच्छेदकावच्छिन्नमिति निष्कर्षः॥ तेन गुणकर्मान्यत्वविशिष्टसत्ताव
न् गुणत्वात् गुणे गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ यथायथं नाव्याप्तिः॥ उपाधीति॥ असाधारणत्ववि
रुद्धत्वाद्युपाधीनां भेदादित्यर्थः॥ विरुद्धत्वहानेऽसाधारणत्वाघटकत्वेपि अनुमितिप्रतिबंधकत्वादीति भावः॥
सत्प्रतिपक्षः साध्यविरोधीपरामर्शः॥ तद्वांश्च हेतुः सत्प्रतिपक्ष इति योगार्थमभिप्रेत्याह॥ पक्षेति॥ अ
त्र साध्यघीप्रतिबंधकपरामर्शः सत्प्रतिपक्ष इत्युक्तेनावठेकसामंजस्ये पक्षेति संपादनायातमिति कश्चित्॥
तन्न॥ पक्षविशेष्यकसाध्याभावव्याप्यवत्तापरामर्शस्य च तदन्यादिविशेष्यकसाध्यवत्ताज्ञानेऽविरोधि
तया पक्षविशेष्यकत्वलाभाय तद्ग्रहस्यावश्यकत्वात्॥ इदं च सत्प्रतिपक्षस्यानित्यत्वदोषत्वांगीकर्तृ

प्राचीनमते लक्षणं बोध्यं । बाधभ्रमादनुमितिप्रतिबंधकस्यापि अनित्यदोषत्वापत्तेः ॥ सद्धेतोर्नास्त्वमि
ति सत्प्रतिपक्षस्य नानित्यदोषत्वमिति । स्वमते तु पक्षे साध्याभावव्याप्यहेतुमत्त्वं सत्प्रतिपक्षः अतएवोभ
यमतसाधारणायासद्धेतुत्वमेव यथाजल्लमिश्रादिनोदाहृतवान् ॥ नेत्युक्तमिति । उष्णत्वाभावव्याप्यतेजस्त्व
वदिदमिति ज्ञानमुक्तरूपसाध्यधीप्रतिबंधकमिति भावः ॥ सत्प्रतिपक्षफलं तु परस्परप्रतिबंधेन परस्परा
नुमितिप्रतिबंध एव । तथाहि । पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यादौ वह्निव्याप्य
वत्तापरामर्शसत्त्वान्न वह्न्यभावानुमितिः वह्न्यभावव्याप्यवत्तापरामर्शसत्त्वाच्च न वह्न्यनुमितेरुत्पत्तिः । तद्विशि
ष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादिति ॥ निबंधनकृतस्तु ॥ प्रकृतसाध्य
साधकहेत्वोः किं तत्त्वमिति जिज्ञासा सैव सत्प्रतिपक्षफलं । अतएव प्रकृतकार्यसाध्यसाधकहेत्वोः किंतत्त्वमि
ति जिज्ञासाजनिका सैव पक्षधर्मतोपस्थितिः प्रकरणसम इति तल्लक्षणमपीत्याहुः । रत्नकोशकारास्तु ॥
तत्प्रकारकप्रत्यक्षे तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वेपि प्रयोजनाभावेनानुमितौ न तत्प्रतिबंधकत्व
स्याकल्पनात् ॥ संशयत्वस्यार्थसमाजग्रस्तत्वेपि साध्यतदभावव्याप्यवत्तापरामर्शाभ्यां जायमानानुमितिः
संशयरूपैव जायते उभयप्रकारकत्वेनिश्च्यपायोगात् ॥ संशयानुमितिरेव सत्प्रतिपक्षफलमिति । ननु
तदभावव्याप्यवत्ताज्ञानकाले तत्प्रकारकोपनीतभानानुदये न तत्र तत्प्रतिबंधकत्वे कल्पनीये प्रत्यक्षत्वमनि
वेश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तत्रानुमितिसाधारणमिति कथमुभयपरामर्शकाले

137

उत्तयविधेयकानुमितिरितिचेन्न ।इच्छाकाले आहार्यप्रत्यक्षोत्सत्याचाक्षुषत्वस्पार्शनप्रकारकेच्छानांउभयत्रैत्तेज
कत्वानुरोधेनविशिष्यप्रतिबंधकतायाआवश्यकत्वात् ।।घटस्पार्शनसामग्रीसत्वेघटचाक्षुषेच्छायामसत्यां
चचाक्षुषसामग्र्यां घटस्पार्शनापत्तेस्तासामेकत्रानिवेशायोगात् ।।तत्तत्सामग्रीविशिष्टतत्तदिच्छाकूटस्योत्तेज
कत्वेचातिगौरवमिति। नचशाब्दस्थलेइच्छाया अनुत्तेजकत्वात्तत्रैवप्रत्यक्षान्यज्ञानत्वंतत्प्रतिबध्यतावच्छेद
कं चेत्त्वनुमितिसाधारणमितिवाच्यं ।।प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथोविशेषणविशेष्यभावे विनिगमनाविरह
णात्तदपेक्षया शाब्दत्वस्यैवतत्प्रतिबध्यतावच्छेदकत्वात् ।।परोक्षत्वजातेरनुभवत्वेनसंकरप्रतस्यापितत्सीमि
तितत्प्रतिबंधकस्याक्लृप्ततयानसंशयानुमितौकिंचिद्बाधकमिति ।। अत्र केचित् ।।इच्छायाउत्तेजकत्वा
नुपगमेनतदभावव्याप्यवत्ताज्ञानस्यज्ञानविशिष्टान्य।त्वावच्छिन्नंप्रतितद्वत्ताव्याप्यवत्ताज्ञानत्वेनैक
ष्या॰ ७ मेवप्रतिबंधकत्वं ।।इ[illegible]विशिष्टत्वावच्छिन्नंप्रतिइच्छात्वेनहेतुतयाएककार्यकारणभावेनैवनिर्वाहेतस्या
अनुमितिसाधारणतयानसंशयानुमितिरुत्पत्तुमर्हतितदभावव्याप्यवत्ताज्ञानस्याविरोधिनःसत्वात् ।।
आहार्यानुमितेरनंगीकारेणइच्छाकालेपितदुत्पत्त्यसंभवान्निर्दितिनिर्गर्वः ।। असिद्धिंनिरूपयति ।।असि
द्धिस्त्विति ।।परामर्शेति ।।व्याप्तिप्रकारकपक्ष~~[illegible]~~धर्मताज्ञानंपरामर्शः [illegible]प्रतिबंधकत्वंव्याप्यत्वासि
द्धेः ।।व्याप्तिज्ञानविघटकत्वेनतद्विषयव्यभिचारादावतिप्रसंगात् ।।व्यभिचारादन्यत्वंप्रतिबंधका ।।
वच्छेदकधर्मेविशेषणं ।।परामर्शप्रतिबंधकज्ञानविषयत्वमित्युक्तौघटादेरपिसमूहालंबनात्मक
ज्ञानविषयत्वादतिव्याप्तिरतोप्रतिबंधकतो[illegible]छेदकधर्मेतानुधावनं ।।अवच्छेदकत्वंविषयतया

स्वरूपासिद्ध्याश्रयासिद्ध्योस्तुपक्षधर्मताज्ञानविघटकत्वेन ।व्यभिचारज्ञानस्यापि व्या[illegible]ज्ञानविघटकत्वेन उ

तर्क॰प्र॰६८ + पक्षेतेति। पक्षतावच्छेदकस्याभावइत्यर्थः। गगनीयत्वेति। गगनीयकमलाप्रसिद्धिरिति भावः+६ अनुमान ६८

तत्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणत्वेन। सिद्ध्यादिघटकेनापिनिर्व्याप्तिरिति।। स्वरूपासिद्ध्याद्यन्यतम
त्वमेवतत्वमितिकेचित्।। साश्रयासिद्धिः। यथाक्रमेणलक्षणमाह।। पक्षेत्यादिना।। पक्षतावच्छेदकाविशिष्टपक्षेहेतु
तावच्छेदकावच्छिन्नहेतोरभावः।। स्वरूपासिद्धिरित्यर्थः।। तेनोत्पन्नकालीनोघटःपृथिवीगंधप्रागभावादित्या
ति८ दौनातिप्रसंगः।। नवाद्रव्यंसत्त्वादित्यादौविशिष्टस्यानतिरिक्ततयाविशिष्टसत्ताभावप्रतियोगिनिसत्त्वेतिव्या
प्तिः।। तत्रापिउत्पत्तिकालीनत्वरूपपक्षतावच्छेदकविशिष्टेगंधप्रागभावस्यविद्यमानत्वेनहेत्वभावासंभवात्।। च५
सत्तात्वावच्छिन्नाभावस्यगुणेअसत्त्वाच्चयथोक्तेनदोषः।। एतदुभयेति।। स्वरूपासिद्धिराश्रयासिद्धिभिन्न
त्वविशिष्टासिद्धित्वंव्याप्यत्वासिद्धत्वमित्यर्थः।। तदुभयवारणायउभयभिन्नेति।। घटादिवारणायचविरोध्य
दत्तमिति।। धूलीपटलइति।। पर्वतोवह्निमान्धूलीपटलादित्यादौधूलीपटलेवह्निव्याप्यत्वसत्त्वेनधूमादि
निष्ठवह्निव्याप्यत्वाभावकूटस्यसत्त्वादितिभावः।। यथाश्रुतेतुधूमनिष्ठव्याप्यत्वाभावस्यालोकेपिसत्त्वात्तस्या
प्यसिद्धत्वप्रसंगःसाध्यसाधनभेदेनव्याप्तेर्भिन्नत्वादितीति।। ननुपर्वतःकांचनमयवह्निमान्धूमात्एवंप
र्वतोवह्निमान्कांचनमयधूमादित्यादौसाध्येसाध्यतावच्छेदकाभावःसाध्याप्रसिद्धिः।। एवंहेतौहेतुतावच्छे
दकाभावोहेत्वप्रसिद्धिरित्येवंरूपयोःसाध्याप्रसिद्धिहेत्वप्रसिद्ध्योरपिआश्रयासिद्धिवत्अतिरिक्तत्वसं
भवेनासिद्धेस्त्रिविधत्वमनुपपन्नमित्यतआह।। साध्याप्रसिद्धिरिति।। वाशब्दःअप्यर्थेतथाचसाध्या
प्रसिद्धिहेत्वप्रसिद्धिरपिव्याप्यत्वासिद्धिरित्यर्थः।। हेतुतावच्छेदकावच्छिन्नेसाध्यतावच्छेदकावच्छिन्न

मनुर

त्वं २

निरूपितनियतसामानाधिकरण्यमेव व्याप्तिः साध्यतावच्छेदकहेतुतावच्छेदकयोरप्रसिद्धौ तादृशव्याप्तेरसंभ
वितत्वेनैतयोर्व्याप्यत्वासिद्ध्यंतर्गतत्वमेव ॥ आश्रयासिद्धेस्तु तथात्वासंभवादतिरिक्तत्वमेवेति नाधिक्यंसि
द्धेस्त्रैविध्यानुपपत्तिरिति भावः ॥ यस्तु तस्तु ॥ स्वरूपासिद्ध्याश्रयासिद्धिभिन्नत्वविशिष्टासिद्धित्वस्य
व्याप्यत्वासिद्धित्वगौरवात्‌ लघुलक्षणांतरमाह ॥ साध्याप्रसिद्धिरिति ॥ पर्वतो वह्निमान्नीलधूमादित्यादौ
नीलरूपविशेषणस्य संकोचकविशेषणत्वेन नीलधूमत्वं व्याप्यतावच्छेदकं व्यभिचारावारकत्वात्‌ ॥
व्याप्तिग्रहानौपाधिकत्वाच्च किंतु धूमत्वमेव तथा स्वसमानाधिकरणव्याप्यतावच्छेदकांतराघटितधर्म
स्यैव व्याप्यतावच्छेदकत्वनियमात्‌ धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरणेति ॥ स्वस्यापि स्वघटि
तत्वात्‌ ॥ अनंतरेति ॥ तदघटितत्वं च तदविषयकप्रतीतिविषयत्वमेव ॥ तथा च नीलधूमत्वावच्छिन्ने व्याप्य
तावात्‌ व्याप्यत्वासिद्ध एवैतदंतर्भावः ॥ अत एवैतदुद्भावने वादिनियहोपि ॥ ननु व्या[illegible]पाके व्यर्थविशे
ष्यत्वं ॥ न दोषः ॥ व्याप्ये तु दोष इति नियमे किं विनिगमकमिति चेत्तद्वेहि ॥ हेतुतावच्छेदकावच्छिन्नसाध्य
सामानाधिकरण्यमेव हि व्याप्तिः एवं च समनियते लघुधर्मे विच्छेदके संभवति गुरौ तदत्तावादिति
न्यायेन स्वरूपसंबंधरूपावच्छेदकस्य गुरुधर्मे नंगीकारात्‌ ॥ नीलधूमत्वावच्छिन्नसमानाधिकरणा
त्तावप्रतियोगितानवच्छेदकत्वस्य धूमसमानाधिकरणात्तावप्रतियोगितावच्छेदकत्वापेक्षया गु
रुत्वेन प्रतियोगितानवच्छेदकतया तादृशात्तावाप्रसिद्ध्या न तेन रूपेण व्याप्तिरिति ॥ केचित्तु कंबुग्रीवादि
मान्नास्तीति प्रतीतेरविशेषात्‌ गुरुधर्मोपि प्रतियोगितावच्छेदकः ॥ एवं च समानाधिकरणतादृश

हेतुसमानाधिकरणात्तावप्रतियोगितावच्छेदकत्वयोर्भावविशिष्टसाध्यतावच्छेदकावच्छिन्न
वच्छिना १

१५७

धर्मांतराघटितधर्मस्यैवव्याप्यतावच्छेदकत्वमिति नियमस्याप्रयोजकत्वात्॥ नीलधूमत्वमपिव्यापकताव
छेदकमेव अत एव नीलधूमत्वादेरवारणीयत्वमिति दीधितिकारोप्याह॥ नचैवंगुरूद्भावनेवादिनिग्रहा
नुपपत्तिः॥ मन्मते तेनरूपेणव्याप्यत्वासिद्ध्यैवतन्निग्रहोपपत्तेरितिवाच्यं॥ धूमादिवक्तव्येनीलधूमादि
त्युक्तिरनुचितेति॥ अधिकोक्त्यावादिनिग्रहादित्यास्तांपल्लवितेन॥ बाधंलक्षयति॥ पक्षेति॥ पक्षताव
छेदकविशिष्टपक्षेसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववत्वमित्यर्थः॥ तेनरूपे
कालावच्छिन्नोघटोगंधवान् पृथिवीत्वादित्यादौ आद्यक्षणावच्छेदेन घटेगंधाभाववत्वेपिनातिव्या
प्तिः॥ एवंमहानसीयवह्न्यभावस्यपर्वतेसत्वेपिनपर्वतोवह्निमान् धूमादित्यादेर्बाधित्वापत्तिरिति॥ बा
धदशायामपक्षधर्मोहेतुरनैकांतिकोवेतिनियमात्बाधस्यप्रतिबंधकत्वेमानाभावइत्याशंकते॥
नचेति॥ अग्रेति॥ अत्रह्रदोवह्निमान् धूमादित्यादौ॥ असिद्धिरेव॥ स्वरूपासिद्धिरेव॥ कृतंव्यर्थं॥ बा
धेनेति॥ बाधस्यप्रतिबंधकत्वेनेत्यर्थः॥ परामर्शोजातः॥ वह्निव्याप्यधूमवान्ह्रद इति परामर्शोदयेना
सिद्ध्यादेरदूषकतया बाधस्यैवदोषत्वमितिभावः॥ ननुवह्निव्याप्यवत्ताज्ञानकालेकथंवह्न्यभाव
ताज्ञानंतदभावव्याप्यवत्ताज्ञानस्यप्रतिबंधकस्यसत्वादितिचेन्न॥ अलौकिकज्ञानत्वावच्छिन्नंप्र
सेवतदभावव्याप्यवत्ताज्ञानस्यविरोधितया अनुमानिकभिन्नेंद्रियादिजन्यवह्निव्याप्यवत्ताज्ञा
नकालेपिप्रात्यक्षिकवह्निव्याप्यवत्ताज्ञानोदयेबाधकाभावादितिभावः॥ असंकीर्णबाधस्थलमाह॥

141

ननुपक्षतावछेदकावछेदेन तदनुमितिः६ त् यथाव्यभिचारादेर्यथाहेत्वाभासत्वं तथोपाधेरपि स्यादुपाधिज्ञानस्यापि व्यभिचारज्ञानद्वारा व्याप्तिज्ञानविघटकत्वेनानुमितिप्रतिबंधकतानविषयत्वात्॥३

आद्यकालावछिन्नेति॥दोषांतरेति॥असिद्ध्यादिरूपदोषांतरेत्यर्थः॥दोषांतराभावमेवोपपादयति॥व्याप्य
सत्वेव्यभिचारित्वमेवपक्षावृत्तित्वेचस्वरूपासिद्धिरेवदोषइत्यतः व्याप्तिपक्षवृत्तित्वयोरुभयोरभावनिरा
करणं॥यद्यपिधर्मितावछेदकसामानाधिकरण्येन तदभाववत्ताज्ञानस्य धर्मितावछेदकसामानाधिकरण्ये
न तत्प्रकारकबुद्धौ न तत्प्रतिबंधकत्वं तथाप्यवछेदकावछेदेन तद्विशिष्टबुद्धौ अवछेदकावछेदेन तदभाव
वत्ताज्ञानस्य विरोधितेति बोध्यं॥ननु गंधव्याप्यपृथिवीत्ववत्तापरामर्शाज्जायमाना घटोगंधवानित्यनु
मितौ॥पक्षतावछेदकव्यापकत्वविशिष्टसंबंधघटितव्यापकतायाः गंधेऽग्रहात् व्यापकताघटकसंबंधे
नैवव्यापकस्यानुमितेः॥तथाच सद्धेतोरस्य कथं बाधितत्वमित्यत आह॥दिगिति॥अवछेदकावछेद
नानुमितौ पक्षतावछेदकव्यापकत्वविशिष्टसंबंधेन व्यापकत्वावगाहिपरामर्शस्य साध्यतावछे
दकसंबंधघटितव्यापकत्वावगाहि अवछेदकावछेदेन हेतुमत्तावगाहिपरामर्शयोरन्यतरस्य जन
कत्वेन प्रकृते गंधप्रागभावकालावछिन्नत्वविशिष्टसमवायघटितगंधनिष्ठव्यापकत्वावगाहिप
रामर्शासत्वेपि गंधप्रागभावकालावछिन्नत्वविशिष्टसमवायसंबंधेन पार्थिवत्वरूपहेतुमत्तावगा
हिपरामर्शस्याक्षतमेवेति भावः॥ननु व्यभिचारज्ञानस्यानुमितिकरणव्याप्तिज्ञानविघटकत
या परंपरयानुमितिप्रतिबंधकज्ञानविषयत्वात्तथाच पंचैव हेत्वाभासा इत्यनुपपन्नमित्यभिप्रेत्याशं
कते॥नन्विति॥एतएवेति॥पंचैवेत्यर्थः॥तदन्यत्वमदृते॥सव्यभिचाराद्यन्यतमांतर्गतत्वमुपाधे ॥
रित्यर्थः॥तस्य उपाधेः॥अनैवंभूतत्वात्॥अहेत्वाभासत्वात्॥अत एव व्यभिचाराद्यन्यतमांतर्गतत्वाभावादेव॥

न गंधप्रागभावकालावछेदेन घटे जायमानानुमितिर्भ्रमएवेति तस्याभासत्वं

142

वस्तुतस्तु ॥ सत्प्रत्युपाधिज्ञाने उपाधिना व्याप्तिबाधानुमाने व्याप्तिज्ञानप्रतिबंधाभावादनुमित्युत्पत्त्या अनुमितिका
रणव्याप्तिज्ञानविघटकत्वाभावेन परमुखनिरीक्षकतया [illegible]न हेत्वाभासत्वं । एवं सिद्धसाधनस्यापि पक्षता
विघटकताया न त्वमिति ॥ वादिविजयस्यैककार्यकारित्वेन संगत्या हेत्वाभासानंतरमुपाधिनिरूपणमारभ
ते ॥ नन्विति ॥ आचार्यमते उपाधिपदं पंकजादिवद्योगरूढं उप स्वसमीपवर्तिनि स्वीयं धर्ममादधातीति उपा
धिरिति योगात्स्वनिष्ठव्याप्तिरूपधर्मसंक्रामकत्वं च व्यासाध्यव्यापकत्वं ॥ न केवलं साध्यव्यापकत्वमात्रेण
दूषकत्वमिति साध्यव्यापकत्वे रूढिरपि ॥ तथा च साध्यसमव्याप्तत्वघटितत्वमेवोपाधिलक्षणं तन्नु न स
म्यक् समव्याप्तस्यैवोपाधित्वे विषमव्याप्तेऽपि व्यभिचारोन्नायकत्वसत्प्रतिपक्षोन्नायकत्वादिरूपदूषक
ताबीजस्य सत्त्वेऽपि न तस्याप्युपाधित्वात् चाव्याप्त्यापत्तेरिति साध्यव्याप्यत्वांशमपहाय रूढ्यर्थसाध्य
व्यापकत्वमात्रघटितलक्षणमाह ॥ साध्यव्यापके सतीति ॥ ननु व्यापकत्वं तद्वन्निष्ठात्यंताभावाप्रतियोगित्वं
नहातियोगित्वं वा व्यापकत्वं एवं च साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वे सति साधनसमाना
धिकरणात्यंताभावाप्रतियोगित्वमिति स्यात् तच्च द्रव्यं सत्त्वादित्यादौ संयोगाद्युपाधावव्याप्तं अतिव्याप्तं
च द्रव्यं पृथिवीत्वादित्यादौ संयोगादौ तत्र प्रतियोगिवैयधिकरण्यनिवेशे चातिगौरवं साध्यत्वसा
धनत्वयोः व्यापकत्वव्याप्यत्वरूपतया व्यभिचारिणि तदसत्त्वः ॥ साध्यत्वप्रकारकज्ञानविषयत्वसाध
नत्वप्रकारकज्ञानविषयत्वादिना तयोर्निवेशे समाख्यज्ञानमादाय प्रसिद्धिसंभवेऽपि अत्र न तादृशोक्तमस्त

चानुपपत्तिर्जागरूकैवेत्यत आह ॥ तद्व्यापकं चेति ॥ लाघवाद्भावगर्भव्यापकत्वमाह ॥ तदिति निष्कृष्टम् ॥
तत्समानाधिकरणादिति ॥ तद्धर्मावच्छिन्नसमानाधिकरणा यावन्तो यद्धर्मावच्छिन्नसमानाधिकरणा
स्तद्वत्त्वं तद्धर्मावच्छिन्नेन तद्धर्मावच्छिन्नव्यापकत्वमित्यर्थः ॥ अत्र यावत्पदानुपादाने वह्निमान्धूमादित्या
दौ साधनाव्यापकस्य रासभादेर्वह्निसमानाधिकरणमहानसत्वादिरूपं यत्किंचिद्धर्मनिष्ठसामाना
धिकरण्यनिरूपकत्वे सत्त्वेऽपि रासभादावतिव्याप्तिः ॥ यावत्त्वस्य व्यापकत्वादन्यस्यत्वं च तया तत्समा
नाधिकरणत्वव्यापकसामानाधिकरण्यनिरूपकत्वमर्थः पर्यवस्यति ॥ तद्व्यापकत्वं च तत्समानाधिक
रणत्वसमानाधिकरणाभावप्रतियोगिसमानाधिकरण्यनिरूपकत्वं ॥ सर्वस्यापि घटत्वादिना तादृशाभा
वप्रतियोगित्वात् ॥ तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तदर्थो वाच्यः ॥ तथा च तादृ
शप्रतियोगितानवच्छेदकप्रमेयत्वमादायातिप्रसंगवारणाय यद्धर्मावच्छिन्नसमानाधिकरणत्वं तद्ध
र्मावच्छिन्नसमानाधिकरणत्वनिष्ठाभावप्रतियोगितानवच्छेदकं तद्वत्त्वमेव तद्धर्मावच्छिन्नव्यापकत्वं ॥
एवमव्यापकत्वं तत्समानाधिकरणत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकसामानाधिकरण्यक
त्वं बोध्यं ॥ तद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितानवच्छेदकसामानाधिकर
ण्यत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छेदकत्वे सति यद्धर्मावच्छिन्नसमानाधिकरण
धर्मनिष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छे

148

दकंपद्रूपंतद्धर्मावछिन्नस्तद्धर्मावछिन्नसाध्यसमानाधिकरणतद्धर्मावछिन्नहेतावुपाधिः॥गुणकर्मान्यत्व
विशिष्टसत्तावान्जातेरित्यत्रविशिष्टसत्तायाःसत्तानतिरिक्ततयासत्वाद्यव्यापकतयासाध्याव्यापकत्व
प्रसंगेनद्रव्यंगुणकर्मान्यत्वविशिष्टसत्वादित्यादौसत्वाद्यव्यापकतयासाधनाव्यापकत्वप्रसंगेनसंयोगाद्याव
व्याप्यतिव्याप्त्योर्वारणायलक्षणेतद्धर्मावछिन्नत्वयद्धर्मावछिन्नत्वयोर्विशेषणनिवेशः॥लक्ष्येलक्षणं
गमयति॥यथेति॥तत्र इंधनं॥तत्समानाधिकरणत्वात्॥आर्द्रेंधनसमानाधिकरणत्वात्॥धूमसमानाधि
करणमहानसादिनिष्ठाभावप्रतियोगीसामानाधिकरण्यनिरूपकत्वेनधूमव्यापकत्वमक्षतमितिभावः॥
अयःपिंडइति॥वह्निसमानाधिकरणायःपिंडत्ववन्निष्ठाभावप्रतियोगीसामानाधिकरण्यनिरूपकत्वेन
नधूमव्यापकत्वादितिभावः॥सत्तानुवह्निमान्धूमादित्यादौतुनैवं॥नवह्निव्यापकःधूमव्यापकःकश्चिदित्यर्थः॥
ननुपक्षातिरिक्तेसाध्यव्यापकत्वाग्रहात्उपाधेर्दूषकत्वंतद्धिमहानसाद्यंतर्भावेनवह्निव्यापकत्वस्यपर्वतेबाध
माव्यापकस्यपक्षेतरत्वस्यैवोपाधेःसंभवात्कथंनतत्रोपाधिरित्यतआह॥तत्रहेतोरिति॥हेतोर्धूम
स्यसाध्यव्याप्यत्वात्॥वह्निव्याप्यत्वात्॥ननुततःकिमित्यतआह॥साध्यव्यापकस्यचेति॥तथाचपक्षे
तरत्वंवह्न्यव्यापकंवह्निव्याप्यधूम[illegible]व्यापकत्वादित्यनुमानेनधूमएववह्न्यव्याप्यत्वंसिद्ध्यतांव्याप्तिग्रह
स्योभयत्रसमत्वादितिवाच्यं॥धूमत्वावछिन्नंप्रतिवह्नित्वेनहेतुतयाकार्यकारणभावरूपानुकूलतर्कः
सत्वोत्तत्वादेवधूमेवह्निव्याप्यत्वंसिद्ध्यतितद्व्यापकत्वेनपक्षेतरत्वेवह्न्यव्यापकत्वानिश्चयादितिभावः॥
साध्याव्यापकत्वान्नपक्षेतरत्वोपाधिः॥ नचधूमः वन्ह्यव्याप्यः वन्हिव्यापकपक्षेतरत्वाव्याप्यत्वादित्यनेन २

इत्युक्तोपाधिलक्षणं॥यथाकाकइति।मित्रातनयस्यपक्षत्वे साधनावच्छिन्नसाध्यव्यापकपक्षधर्मावच्छिन्नसाध्यव्यापकयोरैक्यप्रसंगेनवक्ष्यमाणदोषासंगतेरनयोरसंकरप्रदर्शनायकाकपर्यंतानुधावनं॥तत्र।शाकपाकजत्वं॥श्यामत्वेति॥शुद्धश्यामत्वव्यापकत्वमित्यर्थः।किंचेति।साधनीभूतमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकत्वमित्यर्थः।विवक्षितमिति।मित्रातनयत्वरूपसमानावच्छिन्नश्यामत्वव्यापकत्वात् गौरीमित्रातनयेऽवृत्तित्वेनच मित्रातनयत्वरूपसाधनाव्यापकत्वाच्च॥शाकपाकजत्वेनलक्षणसमन्वयः॥शुद्धसाध्यव्यापके आर्द्रेंधनादौ शुद्धसाध्यव्यापकत्वादेवस्फुटतरां साधनावच्छिन्नसाध्यव्यापकत्वमितिस्ताक॥वायुरिति॥वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादित्युक्ते प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनावच्छिन्नप्रत्यक्षत्वव्यापकतयाव्याप्यसंगतिरतः प्रमेयत्वपर्यंतानुधावनं॥तद्रूपवत्त्वं॥ननुशुद्धसाध्यव्यापकसाधनावच्छिन्नसाध्यव्यापकोऽप्ययंबहिर्द्रव्यत्वस्यनोपाधित्वमेवेत्यतआह॥किंचेति।तथाचसाधनावच्छिन्नसाध्यव्यापकस्यैवपक्षधर्मावच्छिन्नसाध्यव्यापकस्यापिव्यभिचारोन्नायकत्वादिरूपदूषकताबीजसाम्येनोपाधितया तत्राव्याप्तिरितिभावः॥तद्वतीति॥बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववतीत्यर्थः॥बहिष्ट्वंचात्मान्यत्वं मानसान्यत्वंवा तदवच्छिन्नप्रत्यक्षत्वंरूपादावपितत्रचनरूपसत्त्वमिति द्रव्यत्वनिवेशः॥द्रव्यत्वावच्छिन्नप्रत्यक्षत्वमात्मादावपीतिबहिष्ट्वनिवेशः॥यथोक्तस्थले।काकःश्यामोमित्रातनयत्वादित्यादौ॥तथाविधेति।पक्षधर्मस्फुटतद्व्यत्वावच्छिन्नेत्यर्थः॥पक्षेकाकादौ॥प्रसत्त्वादिति।इदमुपलक्षणं॥प्रा

१५६

नावोविनाशी प्रमेयत्वादित्यादौ जन्यत्वावच्छिन्ने विनाशित्वव्यापके सावकत्वोपाधेउदासीनधर्मावच्छिन्नसाध्य
व्यापकेऽव्याप्तेरित्याशंकते ॥ अथेति ॥ क्वचित् ॥ काकः श्यामो मित्रातनयत्वादित्यादौ क्वचिद्वायुः प्रत्यक्षः प्र
मेयत्वादित्यादौ धूमवान्वह्नेरित्यत्र शुद्धसाध्यव्यापकार्द्रेंधनादौ च पक्षधर्मद्रव्यत्वादिकमादाय संगतिः ॥ उपाधि
त्वापत्तेरिति ॥ तथा च यदनुमानमात्रोच्छेद इति भावः ॥ तादृशवह्निमति ॥ महानसान्यत्वावच्छिन्नवह्निमति पर्व
तौ ॥ असत्वादिति ॥ महानसत्वाभावस्येति शेषः ॥ स्वनाधिकरणेति ॥ स्वं उपाधित्वेनाभिमतं धूमवान्वह्नेरित्या
दौ स्वं आर्द्रेंधनं तदनधिकरणं च धूमाधिकरणं अयोगोलकं तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नधूमव्यापकत्व
दार्द्रेंधने त्वलक्षणसमन्वयः ॥ स श्यामो मित्रातनयत्वादित्यादौ स्वं शाकपाकजत्वं तदनधिकरणं च मित्रातनय
त्वाधिकरणं गौरमित्रातनयः तद्वृत्तिमित्रातनयत्वरूपधर्मावच्छिन्नश्यामत्वव्यापकत्वात् शाकपाकजत्वमु
पाधिः ॥ एवं वायुः प्रत्यक्षः स्पर्शाश्रयत्वादित्यादौ स्वं च ~~स्पर्शनत्वं~~ उद्भूतरूपवत्वं तदनधिकरणं यत्र स्पर्शाश्रय
त्वाधिकरणं वायुः तद्वृत्तिबहिर्द्रव्यत्वरूपधर्मावच्छिन्नप्रत्यक्षत्वव्यापकत्वादुद्भूतरूपत्वे लक्षणसंगतिः ॥ व
ह्निमान्धूमादित्यादौ तु महानसत्वाभावो नोपाधिः ॥ तत्र हि स्वं महानसत्वाभावः तदनधिकरणं यद्धूमाधि
करणं तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नवह्निमति महानस एव तस्याः सत्वान्नातिव्याप्तिरिति ध्येयं ॥ ननु द्रव्यं
सत्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्वे अव्याप्तिः ॥ विशिष्टसत्तायाः सत्तानतिरिक्ततया विशिष्टसत्तानो
पाधित्वापत्त्यानधिकरणसाधनाधिकरणाप्रसिद्धेः ॥ एवं धूमवान्वह्नेरित्यत्रार्द्रेंधनादीनां द्रव्यत्वादिनोपाधि

व्यापतिश्च सत्त्वमाह । यद्वेति । स्वपदं उपाधितावच्छेदकानभिमतपरं । एवं च विशिष्टस्यानतिरेकेऽपि विशिष्टनिरूपि
अ२ ताधिकरणतानियामकत्वाद्गुणकर्मान्यत्वविशिष्टसत्त्वत्वावच्छिन्नानधिकरणं सत्त्वाधिकरणं गुणाद्येव प्र
सिद्धं तद्भिन्नसत्त्वादिरूपधर्मावच्छिन्नद्रव्यत्वादिव्यापकत्वात् गुणकर्मान्यत्वविशिष्टसत्त्वेन लक्षणसमन्वयः ॥ घ
टान्यहेरित्यादौ स्वपदेन द्रव्यत्वं नोपपादयितुं शक्यं तत्र द्रव्यत्वावच्छिन्नानधिकरणवृत्त्यधिकरणाप्रसिद्धेः ॥ किं वा आ
र्द्रेन्धनत्वाद्येव तथा चार्द्रेन्धनत्वेनोपाधित्वं न तु द्रव्यत्वेनेति नोक्तदोष इति भावः ॥ व्यापकत्वस्याभावादिघटि
तत्वेन गुरुतया लघुतदाह । तत्रेति । तादृशसाध्यव्यापकत्वं चेत्यर्थः ॥ धूमवान्वह्नेः वायुः प्रत्यक्षः प्रत्यक्ष
स्पर्शाश्रयत्वात् स श्यामो मित्रातनयत्वादित्यादौ आर्द्रेन्धनोद्भूतरूपशाकपाकजत्वादिषु यथाक्रमं लक्षणं सं
गमयति ॥ सर्वत्रेत्यादिना ॥ वह्निमान्धूमादित्यत्र महानसा नावेति प्रसंगं वारयति ॥ नन्वेवमिति ॥ सद्धेतोः प
त्वं न च संभवतीत्यन्वयः ॥ सद्धेतौ धूमादेः एवं उक्तधर्मावच्छिन्नाक्रान्तः कुत्रापि उपाधिर्न संभवतीत्यर्थः ॥ त
त्राह ॥ नहीति ॥ वह्निमान्धूमादित्यादौ पक्षेतरत्वानधिकरणधूमवत्पर्वतानिष्ठद्रव्यत्वादिरूपधर्मावच्छिन्न
वह्निसमानाधिकरणाः पर्वतत्वादयोऽपि तेन पर्वतेतरत्वावच्छिन्नसमानाधिकरणा इति पर्वतेतरत्वेऽतिव्याप्तिरित्य
त आह ॥ अत एवेति ॥ तादृशधर्मावच्छिन्नसाध्यव्यापकत्वाभावादेवेत्यर्थः ॥ तदेवाह ॥ पक्षेति ॥ धर्मे पर्वतत्वादौ
ताहामानाधिकरण्याभावात् ॥ पर्वतेतरत्वसामानाधिकरण्याभावात् ॥ वह्निरनुष्णः कृतकत्वादित्यादौ पक्षे बा
धेन साध्यव्यापकतया प्रमितेन वह्नीतरत्वादौ बाधोन्नीतत्वासंयाप्यत्वमेवेति हृदयं ॥ उपाधेर्दूषकताबीजं व्य
भिचारोन्नायकत्वं सत्प्रतिपक्षोन्नायकत्वं वा ॥ तथाहि ॥ धूमवान्वह्नेरित्यत्र वह्निः धूमव्यभिचारी धूमव्यापका

इंधनव्यभिचारित्वात्॥ व्यापकव्यभिचारित्वे व्याप्यव्यभिचारित्वस्यावश्यकत्वात्॥ एवं वह्निमदयोगोलकं धू-
माभाववत्॥ व्यापकाभावे व्याप्याभावावश्यंभावादिति व्यभिचारोन्नायकत्वे कथं न सत्प्रतिपक्षोन्नाय-
कत्वेन वा इंधनस्योपाधित्वात्॥ यथा हेतोः साध्यव्यापकोपाधिव्यभिचारेण साध्यव्यभिचारः साधनीयस्त-
था साध्यव्याप्यहेत्वव्यापकतयोपाधेः साध्याव्यापकत्वमपि सेत्स्यतीति विनिगमनाविरहात्॥ व्याप्तिग्राहस्यो-
न्यत्रापि स्याप्यादिति वाच्यं॥ अनुकूलतर्कादिनोपाधेः साध्यव्यापकतानिश्चये निश्चय एवोपाधेर्दूषकताबीज-
खिंतनमिस्यभिसंधायाह संक्षेपइति॥ स्वार्थपरार्थभेदेनानुमानं द्विधा॥ यत्र स्वयं धूमादग्निमनुमाय वह्न्य-
र्थं प्रवर्त्तते तत्स्वार्थानुमानं॥ यत्र तु स्वयं वह्निमनुमाय परप्रतीत्यर्थं वाक्यं प्रयुङ्क्ते तत्परार्थानुमानं। तत्र स्वा-
र्थानुमानं सुगमत्वादुपेक्ष्य परार्थानुमानप्रकारमेवाह॥ तच्चानुमानमिति॥ ननु पक्षधर्मत्वं सपक्षे सत्त्वं वि-
पक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेत्यादिपंचरूपोपपन्नलिंगप्रतिपादकवाक्यत्वं न्या-
य्यत्वं पंचरूपोपपन्नो धूम इति वाक्येऽतिव्याप्तेरतोऽन्याय्यत्वं निवृत्ति॥ न्यायश्चेति॥ धूमात्पर्वतो वह्नि-
मानित्यादिव्युत्क्रमोक्तप्रतिज्ञादिसमुदायेऽतिव्याप्तिवारणाय क्रमिकेति॥ कथकसंप्रदायाविरुद्ध इत्यर्थः॥ न्याय-
त्वं पंचसु पर्याप्तमिति सूचनाय समुदाय इति। तेन पंचग्रहणेनैव समुदायलब्धेः समुदायग्रहणेनेति दूषणम-
नवकाशं॥ तथाचार्यं। तस्मात्तथेत्युपनयनिगमने प्राचां मतेन नवीनमतेनाह॥ वह्निव्याप्येत्यादि॥ ज्ञा-
तिज्ञाद्यघटनेन घटितन्यायत्वज्ञानार्थं परार्थासिद्ध इति प्रतिज्ञात्वादिकं लक्षयति। तत्रेति। तेषु॥

गतिज्ञानादिषु मध्यस्थ इत्यर्थः ॥ तत्र स्फुटतादित्यर्थ इति क्वचित् ॥ पर्वतो वह्निमानित्युदासीनवाक्येऽतिव्याप्तिवारणाय न्या-
यघटकेति ॥ पर्वतो वह्निमानालोकादित्यादिन्यायांतरघटकप्रतिज्ञायाः पर्वतो वह्निमान् धूमादित्यादिन्यायघटकप्रतिज्ञात्वा-
पत्तिवारणाय एतन्न्यायेति ॥ अवयवेति ॥ अवयवविभाजकानां पंचोपाधयः प्रतिज्ञात्वहेतुत्वउदाहरणत्वउपनयत्वनिग-
मनत्वभेदात् ॥ तत्र यथायोग्यं लक्षणान्यवसेयानि ॥ पक्षे साध्यनिर्देशः प्रतिज्ञेति लक्षणं तत्पक्षविशेष्यकसाध्यप्र-
कारकज्ञानजनकं वाक्यं प्रतिज्ञेत्यर्थकं तच्च पर्वतो वह्निमान् इत्युदासीनवाक्येऽतिप्रसक्तमिति तन्नोट्टंकितं ॥ एतद्धूमा-
दिति ॥ अयं चोदासीनवाक्येऽतिव्याप्तिवारणाय न्यायघटकेति ॥ पर्वतो द्रव्यं धूमादित्यत्र हेतुमवेव पर्वतो वह्निमान् धू-
मादित्यत्र हेत्वाभासवारणायैतन्न्यायघटकेति वक्तव्यतया लाघवात् एव इति ॥ एतन्न्यायघटको यो धूमादित्यवय- द्र
वत्वमित्यर्थः ॥ तादृशेति ॥ अवयवविभाजकस्येत्यर्थः ॥ प्रतिज्ञात्वहेतुत्वघटकीभूततमवयवत्वं नैवेति ॥ अवयवत्वं चेति ॥
अवयवमात्रेन संवादमाह ॥ उक्तं चेति ॥ ननु प्रतिज्ञासाधनत्वमनुमत्वं प्रतिज्ञाभिन्नत्वे सति हेत्वादिभिन्नत्वं च तद्भिन्न-
त्वं न च प्रतिज्ञात्वं पर्वतो वह्निमानिति भागयोः प्रत्येकं पर्याप्तौ व्यासज्यवृत्तिर्वा ॥ आद्ये प्रतिज्ञात्वावच्छिन्नप्र-
तियोगिताकभेदस्यैव तत्र घटकेऽसत्त्वेन प्रतिज्ञैकदेशेऽतिव्याप्तिः ॥ द्वितीये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभे-
दस्य प्रत्येकं पर्वतो वह्निमानिति भागयोः सत्त्वेन प्रतिज्ञाभिन्नत्वादृशभागद्वयभेदस्य प्रतिज्ञायामसंभवमिति
चेन्न ॥ प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नप्रतियोगिताकभेदाधिक-
रणतावच्छेदकं यत्तदवच्छिन्नत्वस्य विवक्षितत्वात् ॥ प्रतिज्ञात्वस्य व्यासज्यवृत्तित्वोपगमेन प्रतिज्ञैक-
देशे प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदसत्त्वात् प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदाधिकरण-

तावच्छेदकंपर्वतत्वमितिसाध्यत्वंतदवच्छिन्नप्रतियोगिताकभेदासमानाधिकरणतावच्छेदकंचप्रतिज्ञात्वमितिप्रतिज्ञात्वम
तिहेतुकदेशव्याप्तिप्रतीयते॥ व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमात्॥ प्रतिज्ञाहेतुसमुदायोनप्रतिज्ञेतिनिगमनेति॥ प्र
तिज्ञाहेतुसमुदायेप्रतिज्ञाभेदसत्वात्प्रतिज्ञाहेतुसमुदायेव्याप्तिव्याप्तिः॥ व्यासज्यवृत्त्यधिकरणताकभेदानंगीकारेतुप्र
तिज्ञात्वाद्यवच्छिन्नभेदपंचकाधिकरणतानवच्छेदकत्वेप्रतिज्ञात्वाद्यवच्छिन्नाधिकरणताकभेदप्रतियोगितावच्छे
दकंयत्तदवच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकंयत्तदवच्छिन्नत्वमर्थोऽवसेयः॥ प्रतिज्ञैकदेशवारणाय
सर्वांतनिवेशः॥ पर्वतोवह्निमानितिवाक्ययोः प्रत्येकंप्रतिज्ञाभेदसत्वेनतादृशसमुदायस्यप्रतिज्ञात्वावच्छिन्नप्र
तियोगिताकभेदाधिकरणतावच्छेदकत्वात्॥ व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमात्प्रतिज्ञाहेतुसमुदायप्र
तिज्ञाभेदासत्वेनप्रतिज्ञाहेतुसमुदायेऽतिव्याप्तिवारणायविशेष्यदलनिवेशः॥ तत्रप्रतिज्ञांशेप्रतिज्ञाहेतुस
मुदायसत्वेनतादृशभेदप्रतियोगितावच्छेदकंतादृशसमुदायत्वंतदवच्छिन्नभेदस्यचतादृशसमुदायेऽस
त्वेनातिव्याप्तिविरहादिति॥ प्रतिज्ञात्वादीनांन्यायघटकत्वघटकत्वाच्चनोदासीनवाक्येऽतिव्याप्तिरितिध्येयं॥
अत्रप्रतिज्ञादिवाक्यैःखंडवाक्यार्थबोधःवाक्यैकवाक्यतयान्यायरूपमहावाक्यार्थबोधः॥ अवांतरवा
क्यार्थज्ञानस्यमहावाक्यार्थबोधेहेतुत्वात्॥ वह्निसंबंध्यभिन्नःपर्वतः धूमीयत्तान्व्यापकत्वंवासाध्यतायाःप
र्यवसानतयावह्निरूपस्यधूमव्यापकवह्नेर्लक्षणयावह्निसंबंध्यभिन्नः धूमव्यापकवह्निसंबंध्यभिन्नइ
त्युदाहरणार्थबोधः॥ वह्निव्याप्यधूमसंबंध्यभिन्नःपर्वतः वह्निव्याप्यपक्षवृत्तिधूमश्चान्नव्याप्यवह्नि

संबंध्यभिन्नःपर्वताभिन्नधूमव्यापकवह्निसंबंध्यभिन्नधूमसंबंध्यभिन्नवह्निव्याप्यधूमसंबंध्यभिन्नःपर्वतःवह्नि
व्याप्यपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्नइतिवाक्यैकवाक्यतयान्यायार्थबोधः॥ततःन्यायार्थज्ञानसहकृ
तमनसाधूमवान्वह्निमानितिधूमविशिष्टवह्निवैशिष्ट्यमितिन्यायेनमानसज्ञानंजन्यतेतेनचपरामर्शःउत्पद्यते॥
ततःपरामर्शानुमितिः॥नचन्यायार्थज्ञानेनाहार्यएवपरामर्शउत्पद्यतांतदनंतरावच्छिन्नवैशिष्ट्यावगाहिज्ञानजननेनैवाव
च्यं॥तस्यवादिवाक्यजन्यत्वेनानाप्तोक्तत्वादप्रमाणशंकाकलंकिततत्वेनानुमित्युपधायकपरामर्शानुत्पादकत्वात्॥
अन्यथाऽऽप्तवाक्यादिवन्न्यायजन्यज्ञानादेवानुमितिस्वीकारापत्तेः॥तथाचन्यायजन्यज्ञानेनतत्पदार्थोपस्थि
पनेसतिधूमविशिष्टेवह्निवैशिष्ट्यमितिमनसापरिच्छेदानंतरंपरामर्शोत्पादकत्वमंगीकरणीयं॥अतएवचिंतामणि
कारेणानुमितिचरमकारणलिंगपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वंन्यायत्वंतादृशशाब्दज्ञानजनक
वाक्यत्वमवयवत्वमितिलक्षणमुपन्यस्तं॥यद्यपिविप्रतिपत्तेःपक्षपरिग्रहेहेत्वभिधानस्याकांक्षितत्वेनमध्य
मेहेत्वभिधानमेवोचितमितिनप्रतिज्ञान्यायांगंतथापिसम्यक्संबंधानाभिमतिपत्तेरंतरितत्वेनहेतुवाक्यस्यानि
प्रतियोगिकान्वयबोधासमर्थत्वात्प्रतिज्ञान्यायांगं॥पर्वतोवह्निमान्कुतइत्याकांक्षायांप्रतिज्ञानंतरंहेतूप
न्यासः॥अत्रचपर्वतोवह्निमानितिप्रतिज्ञायांज्ञानविषयेवह्निलक्षणा॥धूमादित्यत्रहेतुत्वंपंचम्यर्थः॥
तस्यचनिरूपकतयाप्रतिज्ञैकदेशार्थज्ञानेऽन्वयः॥ज्ञायमानलिंगस्यानुमानत्वनयेधूमपदंयथाश्रुतमेवालिं
गज्ञानस्यानुमानत्वनयेतुधूमपदस्यधूमज्ञानमर्थः॥एवंचधूमज्ञानजन्यज्ञानविषयवह्निमानिति

वाक्यैकवाक्यतया प्रतिज्ञाहेत्वर्थयोरन्वयबोध इति केचित्।। केचित्तु।। प्रतिज्ञायां ज्ञाने न लक्षणा प्रथमम् अनाकां
क्षितत्वात्।। किंतु धूमपदस्य धूमज्ञाने पंचम्याश्च साध्यत्वे लक्षणा प्रथमस्तु प्रविभक्तार्थेपि लक्षणास्वीकारा
दित्याहुः।। एतन्मते सर्वत्राक्षणिकस्थलेऽन्वयबोधानंगीकारेण सिद्धांतविरोधः।। वस्तुतस्तु।। पंचम्या ज्ञा
नज्ञाप्यत्वमर्थः।। धूमस्य च ज्ञानेऽन्वयः।। ससंबंधिकस्थले एकदेशेप्यन्वयस्वीकारादिके प्रकृतविचार
णकधूमस्य गमकत्वं च व्याप्त्या पक्षधर्मतया चेति।। तत्र व्याप्तिप्रदर्शनायोदाहरणप्रयोगः तत्र प्रथमयत्पदे
यद्बोध्यते द्वितीययत्पदेन तदन्यत्वमनयद्बोध्यते।। एवं च धूमवन्महानसं वह्निमत् धूमवन्महानसान्यच्च वह्निमदिति बो
धे यावत्साधनाश्रयाश्रितसाध्यसंबंधरूपव्याप्तिरुदाहरणेन प्रदर्श्यते तत्र यत्पदस्यैव वीप्सा न तु तत्पदेपि विरूपो
पस्थितयोरपि एकेन तत्पदेन परामर्शसंभवात्।। सर्वनाम्नां बुद्धिस्थत्ववाचकत्वादिति।। अतएव यद्यत्पापं प्रतिज
हि जगन्नाथ नमस्यं तन्मे इत्युक्तं।। ननु संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।। नरेंद्रमार्गाट्ट
इव प्रपेदे विवर्णभावं स स भूमिपालः।। इत्यत्र सा सा साध्यानन्तमुखीवनेत्यादौ च कथं न हि तत्पदेपि वीप्से
तिचेत्।। यत्र प्रत्येकं यत्पदोपस्थाप्य।। पितं प्रत्येकरूपेणैव तत्र न तत्पदे वीप्सा।। यथा यद्यत्पापं प्रजहीत्यादौ इति
न कश्चिद्दोषः।। वस्तुतस्तु।। व्यापकसामानाधिकरण्यरूपव्याप्त्यभिबोधकत्वमुदाहरणस्य पदार्थविधया
वाक्यार्थविधया वा न संभवतीति वह्निपदस्य धूमव्यापकवह्नित्वलक्षणा सावनात्पर्यग्राहिका।। यत्र य
त्पदसमभिव्याहृतपदार्थतावच्छेदकव्यापकत्वं विधेयं भासते तत्र तत्पदेन वीप्सा यथा यो यो धूमवान्

सोऽसोऽग्निः तिनसधम तदसमभिव्याहृतधूमवत्पदार्थतावच्छेदकीकृतधूमव्यापकवह्निविधेयेवकौ भासते ॥ यत्र तु यत्त
दसमभिव्याहृतपद तावच्छेदकीकृतधर्मसामानाधिकरण्यं विधेये भासते तत्र तदेवाभासः ॥ यथा ॥ ससत्त्वमि
पालइत्यादौ ॥ सा क्रियानम्रमुखी च भवेत्यात्रे दोचतत्रयत्तदसमभिव्याहृतपदार्थतावच्छेदकीकृतक्षितिपालत्व
कातराक्षित्वव्यापकत्वस्य विवर्णत्वनम्रमुखित्वरूपविधेययोर्बाधादन्वयासंभवेन क्षितिपालत्वादिसामानाधि
करण्येनैव विधेयत्वावगाहनमावश्यकमिति तत्र तत्सदोषप्रवाह्यमिति रहस्यं ॥ उदाहरणानंतरं पक्षधर्मताप्रदर्शनायोपनय
प्रयोगः ॥ विशिष्टपरामर्शस्यानुमितिहेतुत्वव्यवस्थापनेनोदाहरणांतरमेवं एवन्यायप्रयोगे मीमांसकमतं तभि
रस्तं बोध्यं ॥ उदाहरणोपनयरूपमवयवद्वयमिति बौद्धमतं तमप्यसमंजसं ॥ कथायामाकांक्षाक्रमेण बाभिधा
नात्प्रतिज्ञाद्युपन्यासस्यावश्यकत्वात् ॥ धूमादित्येव प्रयोगो न तु धूमवत्त्वादिति ॥ मतुपोवैयर्थ्यादिति येमन्यं
तेषां मतेऽत्र वह्निव्याप्यो धूमइत्येवोपनयः स्यात् न तु वह्निव्याप्यधूमवानयमिति मतुपोवैयर्थ्यादित्यवधेयं ॥
अबाधितत्वासत्प्रतिपक्षत्वबोधाय निगमनप्रयोगः ॥ न बाधासत्प्रतिपक्षस्य तद्साध्यवत्ताज्ञानस्येन ताकिसवाहे
तुत्वं न तु तज्ज्ञानस्येति किं न बोधे वाच्यं ॥ यद्यागमे सति चयन्न संभवति तत्तद्वत्ताज्ञानसाध्यमिति नियमेन
तज्ज्ञानस्य हेतुत्वात् ॥ न च घटासंदर्शने घटप्रत्यक्षानुदयेन तत्राप्यघटवत्ताभावावज्ञानस्य कारणतापत्तिरि
ति वाच्यं ॥ परोक्षज्ञाने तादृशनियमस्याभ्युपगमात् ॥ अत्र केचित् ॥ पक्षे साध्याभावो बाधः तद्वत्त्वस्य साध्य
मेवेति पक्षे साध्यवत्ताज्ञानमनुमितिहेतुरिति आयातं ॥ तथा च सिद्धसाधनं यदि पक्षे साध्याभावभ्रमतौ बाधः ॥

184

तथापितदसावज्ञानंविनापक्षेसाध्यनिश्चयस्यासंभवात्पासिद्धसाधनतातादवस्थ्यमिति॥यदवगमेसतियन्नस
वक्तितत्तदसावज्ञानेसतिनवस्येवेतिबाधासावज्ञानेसतिनवस्येवेतिबाधाभावज्ञानेसतिबाधज्ञानानुदये
नबाधज्ञानानुदयेनबाधज्ञानप्रतिबंधाभिप्रायेणाबाधितत्वादीतिबोधनंनहुतज्ञानस्यहेतुत्वाभिप्रायेणेति
वदंति॥केचित्तु॥अनुमितिजमायं [illegible] नुरोधेनयोग्यतावद्विशयानिश्चयसाधारणाअबाधितत्वादिरा
न्नापिहेतुरित्याहुः॥नचतथापिगौमनेनकथमबाधितत्वादिबोधनंअपदार्थस्यवाक्यार्थत्वाच्चेतिवाच्यं॥
तस्माद्द्विमानित्यस्यानुवादत्वेनप्रयोजनजिज्ञासायामबाधितत्वादिज्ञानमेवप्रयोजनतयाऽवसीय
ते॥तद्बोधकत्वलक्षणयायद्यपिमानसबोधादिनापितात्पर्यनिर्वाहेलक्षणाकल्पनमन्याय्यं॥यथाघमो
स्तीतिवाक्यवीप्सरस्यापिआनुमानिकवह्निबोधमादायतात्पर्यनिर्वाहस्तथाप्युक्तौभीतिविभाव्य
तदामानसएवतद्बोधइतिरहस्यमत्रानुसंधेयं॥किंचिज्जल्पितमत्रतद्वाऽज्ञरत्न॥हृदिध्यायतादोषे
रावमस्तुयुक्तिनिवहंवाक्यंमदीयंबुधाः॥चंद्रःकिंनकलंकवानपिभवेत्श्लाघ्यःखगः।यःसतांबालकत्वं
यदितत्रहेतुरधुनाबालीयमेतद्वचः॥छ॥इतिश्रीदीक्षितशितिकंठरामविरचितायांसिद्धांतमंजरी
दीपिकायां [illegible] अनुमानपरिच्छेदःसमाप्तिमगमत्॥ ॥ अब्देतारणसंज्ञकेशुभवहेसौम्याख्यवा
रेशुभमासेफाल्गु [illegible] कृष्णपक्षदशमीसायाह्नकालेशुभे॥श्रीमद्दीक्षित भास्कराख्यविदुषःपादा
श्रीलग्नर. स्मिनैतल्लिखितंजकाराजनकेतर्कजकाशास्तिर्ध॥१॥ ॥ - ॥ छ ॥ छ ॥ ॥

१३३५

पतत्त्वेऽनिलस्पर्शितादिविशेषेषु उपगंतव्यः॥ यद्वा वाचादनेनंतरं तत्रादृशानुव्यवसायः॥ एवं चानुमित्यनुव्यवसायस्य तादृशविषयताविशेषविषयकत्वेनोपपत्तेरलमनुमितित्वरूपजातिस्वीकारेणेति कुतस्तदवच्छिन्नकरणतया प्रमाणांतरत्वमिति चेन्न॥ लिंगपरामर्शविरहे तादृशविषयताकज्ञानानुत्पत्त्या तदवच्छिन्नकरणतयैव तस्य प्रमाणांतरत्वमिति॥ वस्तुतस्तु अनुमिनोमीत्यनुव्यवसायस्य तादृशविषयतामात्रविषयकत्वे आपत्तिः॥ शाब्दबोधानंतरमपि तादृशानुव्यवसायापत्तेः॥ अनुमित्यापत्तिश्च॥ शाब्दबोधादिषु तादृशविषयताया ऐक्यात्॥ अनुमितित्वजातिस्वीकारे तु आपत्त्यादिषु तादृशजात्यसत्त्वान्न तादृशानुव्यवसायापत्तिरिति तदवच्छिन्नकरणतयाऽनुमानस्य प्रमाणांतरत्वमावश्यकमेवेति॥ एवं शाब्दश्रवणानंतरं जायमानज्ञानोत्तरं शाब्दयामीत्यनुव्यवसायोत्पत्त्या तद्विषयतया सिद्धशाब्दत्वाख्यजातिविशेषावच्छिन्नकरणतया शाब्दप्रामाण्यसिद्धिः॥ एवमुपमिनोमीत्यनुव्यवसायबलादुपमानस्यापि प्रमाणांतरत्वमिति॥ ननु अस्तु अनुमितित्वादितयापि प्रत्यक्षत्वव्याप्यमेवास्तां तदवच्छिन्नकरणस्य न प्रमाणांतरत्वं॥ अन्यथानुमित्यादेर्मानसत्वे तदुत्तरं साक्षात्करोमीत्यनुव्यवसायापत्तिः॥ अनुमित्यादेः साक्षात्कारत्वादिति चेन्न॥ लौकिकविषयताशालिसाक्षात्कारत्वस्यैव तादृशप्रतीतिविषयत्वात्॥ अत एव सुरभि चंदनमित्यादावुपनीतभानानंतरं चंदनं पश्यामि सौरभमिति सार्वजनीनः प्रत्ययः संगच्छते न यात्र लौकिकविषयतायाः साक्षात्कारव्यंजकतया नानुमित्याद्युत्तरं साक्षात्करोमीति प्रत्ययः॥ अथैवं तत्र प्रत्यक्षत्वस्थले मानाभावः॥ साक्षात्करोमीति प्रत्ययाभावेन प्रत्यक्षस्याप्रमेणकल्पनाच्च॥ अनुमानस्य मानसत्वेन वक्तुमशक्यत्वात्॥ अत्र वक्ष्यते॥ अनुमितित्वादेः प्रत्यक्षत्वव्याप्यत्वे लाघवमेव॥ तथाहि॥ अनुमितिसामग्र्याः काले प्रत्यक्षवारणायानुमितिसामग्र्याः प्रत्यक्षं प्रति प्रतिबंधकत्वं क

186

कल्पनीयं॥ प्रत्यक्षत्वव्याप्यत्वेत्वनुमित्सात्मकप्रत्यक्षस्यैवोत्पत्तौ तत्कल्पनप्रयुक्तलाघवमस्माकमेवेति॥ तदसत्॥
अनुमितित्वस्य चाक्षुषत्वव्याप्यत्वे तस्याश्च परामर्शाच्चरोत्पन्नज्ञानेऽनुमितित्वापत्तेः॥ चाक्षुषत्वस्य तद्व्यापकत्वमत
एवासंभवि परस्परव्यभिचारिनयोस्तयोरेकत्रसमावेशे सांकर्यापत्तेरिति चाक्षुषत्वादिविरुद्धं तदुपगन्तव्यं॥ एवं चा
नुमितिसामग्रीकाले चाक्षुषादिवारणाय चाक्षुषादिकं प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वं कल्पनीयं॥ एवं च
सामान्यतः प्रत्यक्षं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वं मयापि न कल्प्यत इति लाघवं॥ ननु अनुमितित्वादेर्मान
सत्वव्याप्यत्वमेवास्तां॥ अनुमितिसामग्रीकाले मानसवारणाय मानसं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वकल्प
ने गौरवं॥ मन्मते अनुमित्सात्मकमानसस्यैवोत्पादेन तत्रेष्टापत्तेः॥ न चैवमनुमितिसामग्रीकाले घटादिमानसवा
रणाय तत्र प्रतिबंधकत्वस्यावश्यकतया घटादिकमनिवेश्य मानसत्वमेव तत्प्रतिबाध्यतावच्छेदकमिति वाच्यं॥
घटं मानसं जायतामितीच्छाया उत्तेजकत्वानुरोधेन विषयं निवेश्यैव प्रतिबंधकत्वकल्पनावश्यकत्वात्॥ एवं शाब्दा
दिस्थलेऽपीति॥ मैवं॥ घटादिचाक्षुषसामग्रीकाले वह्निमानसानुदयेन चाक्षुषसामग्र्याः मानसं प्रति प्रतिबंधकता
यां घटादिचाक्षुषसामग्रीकालेऽप्यनुमित्सुसत्वेऽनुमित्सन्यमानसत्वमेव चाक्षुषसामग्रीप्रतिबध्यतावच्छेदकं
भवतावाच्यमिति अनुमित्सन्यत्वनिवेशे गौरवात्॥ एवमनुमितिसामग्रीकालेऽनुमित्सन्यमानसवारणायानु
मित्सन्यमानसत्वमनुमितिसामग्रीप्रतिबध्यतावच्छेदकमुपेयमित्सनुमितिसामग्र्याः प्रतिबंधकत्वकल्पनमा
वश्यकमनुमित्सन्यत्वनिवेशे गौरवं पुनरधिकं॥ एवं शाब्दोपमितिस्थले शाब्दान्यत्वोपमित्सन्यत्वनिवेशाद्गौरवमिति
तेषां न मानसांतर्भाव इति सूक्तं चत्वारि प्रमाणानीति दिक्॥ ॥ इति श्रीशितिकंठदीक्षितविरचितायां न्यायसिद्धान्तमं
जरीदीपिकायां उपमानपरिच्छेदः समाप्तिमगमत्॥ छ ॥ छ ॥ छ छ छ॥ शुभमस्तु लेखकपाठकयोः॥ छ

157

पं.द.१३

१२८ सिद्धान्तमंजरी दीपिका

उपमान पारिच्छेद.

158